साधर्म्यपदार्थ-निर्णयः

(काव्यप्रकाशग्रन्थानुगुणः)

• भागवतप्रसाद त्रिपाठी

"साधर्म्यमुपमा भेदे" इति मम्मटाचार्यकृतलक्षणघटक साधर्म्यपदार्थः सादृश्यरूप एव, "साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः" इति विश्वनाथ कृतलक्षणेन, "उपमा यत्र सादृश्य-लक्ष्मीरुल्लसति द्वयोः" इति अप्पयदीक्षितकृतलक्षणेन, "सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृतिः" इति पण्डितराजकृतलक्षणादिना च सह संवादात् । ततश्च सादृश्यापरपर्य्यायं साधर्म्यं भेदे सति उपमालङ्कारः इत्येव अभियुक्तानां सिद्धान्तः ।

परन्तु साधर्म्यं सादृश्यं चाधिकृत्य बहवो मतभेदाः परिलक्ष्यन्ते । अतः आलोचनाद्वारेण यथार्थं वस्तु निर्णीयते ।

सादृश्यं नाम-"तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्" यथा—'चन्द्रवन्मुखम्' इत्यादौ चन्द्रभिन्नत्वे सति चन्द्रगता ये भूयांसो धर्माःवर्तुलत्वादयः प्रचुराधर्माः तद्वत्वं मुखे वर्तते इति मुखेचन्द्रसादृश्यम् । धर्मवत्त्वं नाम धर्मः । अतः साधारणधर्म एव सादृश्यमिति । साधारण-धर्मश्च क्वचिद् द्रव्यरूपः, क्वचिद्गुणरूपः क्वचित् क्रियारूपः, क्वचिच्च जातिरूप इति तत्र तत्र सादृश्यस्य अन्तर्भावात् न तत् पदार्थान्तरमिति नव्यनैयायिकाः ।

आलङ्कारिकाणां वैयाकरणानां च मते-'साधारणधर्म-प्रयोज्यः उपमानोपमेययोः परस्पर संवन्धविशेष एव सादृश्यम् । तच्च अखण्डोपाधिमत् । अत एवासौ सादृश्यपदार्थः क्लृप्तसप्त पदार्थातिरिक्तः अष्टमः पदार्थ इति । सदृशवस्तुदर्शनस्य संस्कारोद्वोधकतया, सदृशादिपदशक्य-तावच्छेदकतया च सादृश्यपदार्थः सिद्धः इति ।

साधर्म्यं सादृश्यापरपर्य्यायमिति प्रागुक्त सिद्धान्त सत्त्वेपि—

"साधर्म्यं सादृश्याद्भिन्नम् । सादृश्यमेव उपमा-इति यद्यपि बहूनामालङ्कारिकाणां मतं-तथापि ग्रन्थकार (=मम्मट) मते साधर्म्यमेव उपमालङ्कारः" इति नागेशभट्टादयो नव्य-वैयाकरणाः । तेषामयमभिप्रायो यत्—'समानः धर्मः ययोः तौ सधर्माणौ-अर्थात्-समानधर्म-सम्बन्धिनौ । तयोर्भावः-साधर्म्यं नाम समान (=साधारण) धर्मसंवन्धः । "कृत्तद्धित-समासेभ्यः संबन्धाभिधानं भावप्रत्ययेन" इति वार्तिकोक्तेः । इदं च वार्त्तिकं नापूर्वं वचनम्-अपितु-युक्ति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यतः - "समानेन धर्मेण संबन्ध उपमा" इति काव्यप्रकाश-वृत्तिग्रन्थे—

"धर्मेण" इत्यस्य "धर्मद्वारेण" अर्थात्—"धर्मप्रयोज्यः" इत्यर्थो ग्रहणीयः। न तु तत्र सहार्थे तृतीया, अपितु करणे तृतीया मन्तव्या। एवमेव प्रदीप ग्रन्थेषु, चक्रवर्त्तिग्रन्थे च "साधारण-धर्मद्वारकः संबन्धः" इत्येवमादि व्याख्यानं विरोधनिवर्तकं मन्तव्यम्।

वैयाकरण न्यायविरोधविषये च इदं वक्तव्यं यत् 'सादृश्य' पदस्य व्याकरण सम्मतः अर्थः कः— इति तावदालोच्यताम्। "समान इव पश्यति इति विग्रहेण, समानवद्दर्शनकर्तृत्वमेव सादृश्यं सिध्यति, तदा कथं समानवद्दर्शनकर्मत्वरूपोऽर्थः गृह्यते? अतः यथा तत्र "अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम्, अन्यच्च प्रवृत्तिनिमित्तम्"—इति सिद्धान्तबलात् समानवद्दृश्यमानत्वमेव सादृश्यप्रवृत्तिनिमित्तं भवति, अथवा—समानवद्दर्शनकर्तृत्वरूपस्य वाच्यार्थस्य समानवद्दृश्यमानत्वरूपे रूढ्यर्थे लक्षणा—तथैव साधर्म्यपद बोध्यस्य समानधर्मसंबन्धरूपस्य वाच्यार्थस्य "समानधर्मसंबन्धप्रयोज्यः उपमानोपमेयपरस्परसंबन्धविशेषः" इत्यर्थे निरूढा लक्षणैव मन्तव्या। अतः उद्योत-मञ्जूषाकारो नागेशोऽत्र स्वयमेव भ्रान्तोऽन्येषां भ्रामकश्च इति नूनं निर्णेतव्यम्।

तदिदं सादृश्यापरपर्यायं साधर्म्यं भेदे सति उपमालङ्कारः इति सामान्यतः सूत्रार्थः। ननु- उपमानोपमेययोः भेदे एव सादृश्यस्य वा साधर्म्यस्य वा सम्भवात्-सूत्रे भेदे इत्युपादानं व्यर्थमिति चेत्,—उच्यते—उपमानोपमेययोर्भेदश्चतुर्धा,—उपात्तः, अनुपात्तः, आरोपितः, तिरोहितश्चेति, तत्र आद्यं वाच्योपमा,-यथा कमलमिव मुखं मनोज्ञमेतत्-इत्यादौ। द्वितीये व्यङ्ग्योपमा, यथा—"भद्रात्मनो दुरधिरोहतनोः" इत्यादौ, तृतीये त्वनन्वयः, यथा—"नितम्बिनी सैव नितम्बिनीव" इत्यादौ, चतुर्थे च रूपकम्, यथा—मुखं चन्द्रः इत्यादौ।

एवञ्च आरोपितभेदे अनन्वयालङ्कारे उपमालक्षणस्यातिव्याप्तिर्माभूदिति सूचनाय "वास्तव भेदे एव" इत्यर्थबोधनार्थं "भेदे" इति सूत्रकृता निरदेशीति अखिलं निर्म्मलमित्यलं पल्लवितेनेति शिवम्॥

□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्विवचनस्य प्राकृतादौ तल्लोपस्य च
भाषावैज्ञानिकं चिन्तनम्

• डॉ० हर्षनाथ मिश्रः

संस्कृत भाषायां द्विवचनविभक्तिः सप्तस्वपि विभक्तिषु आकारेण त्रिविधैवोपलभ्यते। प्रथमायां सम्बोधनसमाविष्टायां द्वितीयायाञ्च सा 'औ' स्वरूपा तृतीयायां चतुर्थ्यां पञ्चम्याञ्च तस्या भ्यामित्येवाकृतिः षष्ठयां सप्तम्याञ्च सा ओस्स्वरूपा दृश्यते। देवौ देवाभ्यां देवयोः इत्यादौ वाचौ वाग्भ्याम् वाचोः इत्यादौ च तस्याः साकृतित्रयी स्पष्टा। समानाकारत्वात्तत्कारक विशेषावगमः समन्वित क्रियादिशब्दसन्निधानाधीन एव।

संस्कृते यद्यपि द्विवचनमुपलभ्यते तथापि तस्य रूपभेदवाहुल्याभावः अर्थात् सर्वासु विभक्तिषु स्वरूपपार्थक्याभावो दौर्बल्य व्याधिः भाषासु ततो विकसितासु प्राकृतापभ्रंश हिन्द्यादिषु तस्य भविष्यल्लोपस्य पूर्वाभासं संकेतयतीव।

लैतिनभाषायां द्विवचनं सर्वथा विलुप्तम्! किन्तु लिथुआनिन—गाथिक-प्राचीन ग्रीक भाषासु अस्य चिह्नं वर्तते। ग्रीक भाषायामपि संस्कृत इव द्विवचन रूपं संकुचितमेव दृश्यते। तत्र विभक्तिषट्के द्वे एव द्विवचन विभक्तिचिह्ने दृश्येते-तथाहि लागोस् (Logos) शब्दस्य प्रथमा सम्बोधन द्वितीया विभक्तिषु (Nominative, Accusative, Vocative case मध्ये) लागो एवमन्यासु विभक्तिषु लागाइन (Logoin) इत्येवमेवरूपं दृश्यते। एतेन प्राग्भारोपीयभाषायां द्विवचन रूप प्रयोगोऽल्पिष्ठ एवासीदिति भाषाविदां संभावना तर्कानुमोदितैव।

अस्य प्रयोगो युग्मतया दृश्यमान सहजवस्तुप्रत्यायनायैव सुदूरातीते प्राप्तप्रचार इति सम्भाव्यते[1]। हस्तचरण कर्णनयनादीनां युग्मतैव द्विवचनजन्महेतुः।

कालक्रमेण वेदे तयोर्द्वयोर्देवयोः प्रत्यायनायापि दिवचन प्रयोगः प्रारम्यत, यौ हि

१. Otto Jespersen : The philosophy of Grammar p. 205 and संस्कृत का भाषा शास्त्रीय अध्ययन, पृ० 205.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युग्मरूपेण यज्ञकर्मण्याहूतावभवताम्[1] । यथा किल मित्रावरुणा[2] अश्विना[3] इन्द्राग्नी[4] दयावापृथिवी[5]" सूर्याचन्द्रमसौ[6] इत्यादिषु तत्र तत्र वेदमन्त्रेषु दृश्यते । (अत्र सर्वत्र यत्र द्विवचने आकारान्तता तत्र औकारस्थाने 'डा' देशः[7] ।) शनैः शनैः मातृपितृ-जायापत्यादि शब्देभ्योऽपि युग्मत्वबोधनाय दिवचनं प्रयुक्तमभवत् । ततश्च कयोरपि द्वयोः पदार्थयोः सह-विवक्षा प्रयुक्त द्वित्व बोधनायतस्य प्रयोगोऽजायत ।

संस्कृतवाङ्मये अवर्णान्ताद्धलन्ताच्च शब्दान्निष्पन्ने पुंल्लिङ्ग—द्विवचन सिद्धरूपेषु आरूपम् औरूपं च विभक्ति चिह्नं प्रथमायां द्वितीयायां सम्बोधने चोपलभ्येते । वैदिक पदे "मित्रावरुणा" "द्वा सुपर्णा" इत्यादावाकारः लौकिके पदे औकारः वैदिके च देवौ मधु लिहौ विश्वपौ "सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्" इत्यादावौकारश्च स्पष्टतया श्रूयेते । स्त्रीलिङ्ग—पदेऽपि वाचौ नार्यौ इत्यादावौकार चिह्नं स्पष्टम् । तत्राकारः प्राग्भारोपीय भाषायाः कल्पितायाः ओकाराद् वकाराच्च विकसित इति संभाव्यते । अत एव ग्रीक भाषायाम् ओः (o) भारतेरानीवर्गीयभाषायाञ्च 'आ' इति रूपं प्राप्यते । अवेस्ताभाषायाम् आकार प्रकृतिकपदे 'ओः' हलन्त प्रकृतिकपदे च आः समायाति । अवेस्ता भाषायां यत्र जस्तो (Zasto) स्पान स्पाना (Spana) नर नरा (Nara) इत्यादि प्राप्यते तत्र वैदिकभाषायां हस्ता (हस्तावपि) श्वाना नरा इत्याद्युपलभ्यते रूपम्[8] ।

पुंल्लिङ्गे इकारान्ता दुकारान्ताच्च निष्पन्ने द्विवचनान्त पदे ईकारान्तमूकारान्तं वा रूपं दृश्यते । यथाग्नी पती भानू इत्यादौ । अत्र द्विवचनं प्रकृतिगतचरमस्वरे स्वदीर्घत्व प्रभावं निपात्य

---

१. संस्कृत का भाषा शास्त्रीय अध्ययन, पृ० १६८

२. इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृप्सूनामभवत् पुरोहितिः ॥
इन्द्रावरुण सू० म० ७ सू० ८३, ऋक् सू० सं० पृ० ११५

३. उपयातं दाशुषे मर्त्याय रथेन वामश्विना वहन्ता ।
युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥
ऋ० ७।७१ सू० ऋक् सूक्त सं० पृ० २५९

४. अहं रुद्रभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥
वाक् सू० म० १० सू० १२५ ऋ० सू० सं० पृ० १७६

५. अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं दयावापृथिवी आविवेश ।

६. "सूर्याचन्द्रमसौधाता यथापूर्वमकल्पयत्" अघमर्षणसूक्तम् ।

७. सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः पा० सू० ७।१।३९

८. संस्कृत का भाषा शास्त्रीय अध्ययन, पृ० १६८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वयमदृश्यं जायते। क्वापि 'सखायौ' 'सुधियौ' 'प्राध्यौ' इत्यादौ तु इकारदीर्घेकार प्रकृतिके पदे तस्य य घटितं स्वरूपं दृश्यते।

स्त्रीलिङ्गे आकारान्त शब्दसिद्धपदेषु अयम् 'औः' एकारतां बिभर्ति-यथा 'रमे' 'यमे' उर्वरे' 'उभे' इत्यादौ। अयम् 'ऐः' प्राग्भारोपीयभाषाया 'अइ' इत्यस्माद् विकसित इति भाषाविदः[1]। नपुंसकलिङ्गेऽपि अकारान्त प्रकृतिके द्विवचने एरेवायाति-यथा वने फले इत्यादौ। नपुंसक लिङ्गे हलन्ताद् वचस् इत्यादेः शब्दादीकारो द्विवचन चिह्नतया श्रूयते 'वचसी' इत्यादौ। इकारान्तादुकारान्तादृकाराच्च नकारपूर्वक ईकारः प्रयुज्यते तेन अक्षिणी जानुनी कर्तृणी इत्यादौ 'नी' इति श्रूयमाणं भवति। अयं च नकारो वैयाकरणैर्नुमागमलब्ध इति भण्यते। नुम्-कार्यं प्रकृतिसमुदायान्तावयवस्तेन प्रकृतिर्नान्ता जायते। तत् प्रयुक्तकार्यं बहुवचने 'ज्ञानानि' इत्यादौ उपधादीर्घो भवति। नकारस्य प्रकृति समुदायान्तत्व स्वीकारस्य फलं प्रथमा द्वितीया द्विवचने अह्नी "अक्ष्णोः" इत्यादौ नान्तशब्द प्रकृतिकस्यानो विधीयमानोऽकारलोपः सम्पद्यते[2]।

तृतीया चतुर्थीपञ्चमीनां विभक्तीनां द्विवचन चिह्नं भ्यामित्यस्ति। अयं 'भ्यां' सर्वेषु लिङ्गेषु पुष्करपलाशवन्निर्लेपोऽप्राप्तपरिवर्तनः सन् चकास्ति। अस्यसंयोगादितया महाप्राण-वर्णादितया च पूर्वस्मिन्नकारे बलाघातः पतति। तेन वृक्षाभ्यामित्यादौ प्रकृतौ भ्यां पूर्व-वर्तिनोऽकारस्यस्थाने दीर्घाकार उच्चारितो भवति। इकाराद्यन्तप्रकृतिकाद् भ्यामि निष्पन्ने रूपे कविभ्यामित्यादौ भ्यांघटकाकारस्वर वैजात्यान्न बलाघातः पतति। अतो न तत्र दीर्घत्वम्। राजभ्यामित्यादौ नकारं जग्ध्वा बलाघातः शाम्यति। अतो न तत्प्रभावजन्यो दीर्घोऽकार मात्मसात् करोति। वैयाकरणैरिदमेव तत्थ्यं नलोपासिद्धिरूपेण प्रकारान्तरेण प्रतिपाद्यते[3]।

युष्मदस्मच्छब्दयो र्यत्र किल प्रथमाया द्वितीयायाश्च द्विवचनमौकार आम् रूपेण अम् रूपेण[4] वा परिणमति यथा युवाम् आवाम् इत्यादौ तत्रापि युवाभ्याम् इत्यादौ भ्यामविकृत एव तिष्ठति। अतएव भ्यामिति विभक्तिर्नितरां बलवतीति भाषाविदो विदन्ति। यत्र च प्रकृता-वन्तिमो वर्णो वर्ग प्रथमोऽघोषस्तत्रायं 'भ्याम्' प्रत्ययस्तं वर्गतृतीयतां नयति। इत्थं स घोषत्वं प्राप्नोति। तेन जगद्भ्यामिति जायते। पयोयुग्भ्यामित्यादौ तु विकारद्वयम्। प्रथमं चकारः कुत्वं भजते ततश्च स ककारो जश्त्वं याति। वस् प्रत्ययान्त विद्वदादिशब्दे स्रंस् ध्वंस शब्दाभ्यां क्विवन्ताभ्यां निष्पन्न स्रस् ध्वस् प्रकृतिके रूपे अनडुड्शब्दे चायं 'भ्यां' स्व पूर्व वर्णं दकारं करोति[5]। स्वप् शब्दस्य भ्याम्यपि पकारः प्रथमं तकारस्ततो दकारो जायते। तेन

---

१. संस्कृत का भाषा शास्त्रीय अध्ययन पृ० १६६

२. विभाषा ङिश्योः ६.४.१३६ अह्नी, अहनी।
अल्लोपोऽनः पा० सू० ६.४.१३४

३. नलोपः सुप्स्वरसंज्ञातुग् विधिषु कृति पा० सू० ८.२.२

४. ङे प्रथमयोरम् पा० सू० ७.१.२८

५. वसु स्रंसुध्वंस्वनडुहां दः पा० सू० ८.२.७२

वेदस्याध्ययनं सर्वं गुर्वाध्ययनपूर्वकम्
वेदाध्ययनं सामान्यद् अधुनाध्ययनं ...

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वद्भ्यामिति रूपं जायते[1]। नान्तात् प्रतिपादिकादन्त्यनकारस्याल्पप्राणस्यलोपो जायते, महाप्राण भकारादिघटित संयोगवान् भ्यामतिबलोऽल्पप्राणं दुर्वलं सुकुमारं नकारं बलाघातेन हन्ति। अतएव राजभ्यामिति जायते। अहन् शब्दः पदान्तेसुपिऽहरिति स्वरूपमधिगच्छति[2]। अयं नकार स्थानिको रेफः "अहरहः:" इत्यादौ रेफरूपो विसर्गरूपश्च दृश्यत एव। पत्यादि शब्द परत्वे अहर्पतिः अहः पति रित्यादौ रेफ विसर्गयोरुभयोः प्रयोगः साधुर्मन्यते[3]। "अहोरात्रगणा गताः" अहोरूप मित्यादौ तु नकार ओभावं प्राप्नोति[4]। अहोभ्यामित्यत्रापि नकारस्य स्थाने ओकार एव जायते[5]। नकारः ओरूपमवाप्य प्रबलो भूत्वा स्वसमभिव्याहृतेन भ्यामा सह प्रबलेन स्थातुं काञ्चिद् योग्यतामर्जयति। अहन् शब्दे नकारात् पूर्वस्थो हकारोऽपि महाप्राणः। 'भ्याम्' घटको भकारोऽपि तथाभूत एव। महाप्राणयो र्मध्ये स्थितो नकार ओत्वं गतो पूर्व वर्णेन च सह सन्धि प्राप्य 'हो' स्वरूपपरिणतः प्रबलो भूत्वैव तत्र स्थातुमर्हति न स्वरूपेणाल्प प्राणेन कोमल स्वभावेनेति विकृतिमाश्रयति। सान्तशब्दस्यापि मनोभ्यामित्यादौ रूपमोकार घटितं दृश्यते। महाप्राणोऽपि सकारो दन्त्यः, तमप्येष 'भ्याम्' केवल दन्त्यरूपमात्मना सह स्थातुं नानुमनुते। अतः स ओत्वं प्राप्य दन्त्यौष्ठ्यसांकर्यं लब्ध्वा ओष्ठ्यभकारघटितस्य भ्यामः सादृश्यं भजते। विद्वद्भ्याम् ध्वद्भ्यामित्यादौ तु सकार पूर्ववर्ती वर्णः द्वध्वेति दन्त्यदकार धकारसंयुक्त दन्त्यौष्ठ्य वकारात्मकः प्रबलतमः। अतस्तस्यैव दन्तस्थानकवर्णद्वयस्य प्रभावेण सकारो दकारतामङ्गीकरोति।

प्राग्भारोपीय भाषायां 'भ्' इत्यनेन समभिव्याहृतस्य 'म्' इत्यस्य मिश्रणेन प्राप्त स्वरूपा काचिन्मिश्र विभक्तिरासीदिति संभाव्यते भाषाविद्भिः[6]। 'म्' इत्यस्य संयुक्तं रूपं बाल्तोस्लाविक वर्गस्य भाषासु विकासं गतं दृश्यते। 'भ्यामि' अवेस्तासंस्कृतपदयोर्महत्साम्यं दृश्यते यतः संस्कृते प्रयुज्यमाने 'नराभ्यां' ब्रुवद्भ्याम् इत्यत्र अवेस्ताभाषायां च प्रयुज्यमाने 'नरव्य' ब्रवत्व्यम् इत्यत्र च महत्स्वरादि साम्यं श्रुतं भवति। अवेस्ताभाषायां तत्र प्रायः अकारान्तात् प्रातिपदिकाद् ध्वनि युग्मस्य प्रकृतावकृतदीर्घस्य प्रयोगो दृश्यते यत्र संस्कृतेऽन्तिमस्य ह्रस्वाकारस्य स्थाने दीर्घाकारः प्रयुज्यते। अतएव संस्कृतस्य 'हस्ताभ्याम्' इत्यस्य स्थाने अवेस्ताभाषायां जस्तएब्य (Zastaebya) इति प्राचीन फारसी भाषायां च 'दस्त इबिय' (Dasta ibiya) इति रूपं भवति[7]।

---

१. अपो भि पा० सू० ७.४.४८
२. रोऽसुपि ८.२.६९
३. अहरादीनां पत्यादिषु वा रेफः, पक्षे विसर्गोपध्मानीयौ, सि० कौमुदी, पृ० ४४
४. रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्, सि० कौ० पृ० ४४
५. अहन्, ८.२.६८
६. संस्कृत का भाषाशास्त्रीय अध्ययन, पृ० १६९
७. वही

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृते षष्ठी सप्तम्योर्द्विवचन विभक्ति चिह्नम् 'ओस्' इति वर्तते। अस्य श्रूयमाणं रूपम् "ओः" इति वर्तते। तच्च हलन्त प्रातिपदिकनिष्पन्ने पदे "वाचोः" इत्यादौ स्पष्टं श्रूयते। अवर्णान्त प्रातिपदिक सिद्धे पदे इयमोस् विभक्तिः "अयोः" इत्येवं रूपं प्राप्नोति तत्र अय् इति प्रकृत्यंशः। सर्वनाम सिद्ध रूपेऽपि सर्वयोः तयोः द्वयोः इत्यादौ तस्याः सैवाकृतिः। युष्मद स्मच्छब्दयोरपि युवयोः इत्यादौ सा तथैव श्रूयते। वैयाकरणास्तत्र दकारं यकारादेशं विदधति। तन्मतेन तत्रापि यकारः प्रकृति विकृतिः, विभक्तिस्तु "ओः" इत्येव। इवर्णान्ते "योः" उवर्णान्ते पुलिङ्गे "वोः" इति सुधियोः कटप्रुवोः इति तस्या क्वाचित्कं स्वरूप मुपलश्यते। 'प्रध्योः' इत्यादौ तु यण् घटित मेव रूपम्। स्त्रीलिङ्गेऽपि 'स्त्रियोः' 'श्रियोः' इत्यादौ मत्योः नार्योरित्यात्यौ च इयङ्यण् घटित स्वरूपा सा दृश्यते। नपुंसके वारिणोः मधुनोः इत्यादौ नसहितं "नोः" इत्येव जायते तत्रापि नकारः प्रकत्यंशः विभक्तिस्तु ओ;" इत्येव। भारतेरानीयम् 'अउ' इति अवेस्ता भाषायां: ओ इति षष्ठयाः, भारतेरानीयम् 'आस्' इति अवेस्तायाः 'अस्' इति सप्तम्याश्च चिह्नानि [आसन् तान्येव संस्कृते "ओः" इतिरूपेण विकसितानि[1]।] अतः अस्या उत्पत्तिः प्राग्-भारोपीय भाषा गताद् "आय" इत्यस्मात् 'आउस्' इत्यस्माच्च भाषावैज्ञानिकैः स्वीक्रियते[2]।

तिङन्त रूपेष्वपि द्विवचनं दुर्वलमेव दृश्यते। वर्तमानकालबोधक तिङन्त रूपेषु एक वचन चिह्नेषु तिसिमिषु (तिप्सिप्मिप्सु), बहुवचन चिह्नेषु अन्तिथमःसु यथा मिथः पार्थक्यं तथा न द्विवचन चिह्नेषु तस्थस् वस्सु। तस् थस्मस्सु अकाररूपा न केवलमचः समानाः किन्तु दन्त्यानि व्यञ्जनान्यपि समानानि। सर्वत्र सकाराः दन्तस्थाना स्तकार थकारौ दन्त्यौ वकारश्च दन्तोष्ठस्थानत्वात् ओष्ठसम्मिश्रदन्तस्थान एव। यच्च वसि तत्रौष्ठत्व संमिश्रणं तदपि पूर्ववर्तिनो मिपः परवर्तिनश्च मसः प्रभावात्। तसि थसि च केवलं भेदोऽल्पप्राणमहाप्राण प्रयोज्यः। प्रयुज्यमानेषु भवतः भवथः भवाव इत्यादिषु विसर्गः समानः।

परोक्षभूते लिटि बभूवतुः, बभूवथुः बभूविव इत्यादौ प्रथममध्यम पुरुषयोरल्पप्राणकृत एवोच्चारणभेदः, सच लटीव वर्तते। उत्तमपुरुषे च स एव वर्तमानकालदद्योतको लुप्तसकारो 'वस्' प्रयुज्यते।

लोटि ङिल्लकारेषु लङादिषु च द्विवचने प्रयुज्यमाना विभक्तय स्तांतंवरूपाः सर्वत्र समानाः। तामि तमि च केवलं भेदो दीर्घह्रस्वोच्चारणजन्यः। उत्तमपुरुष द्विवचने प्रयुक्तः वकारस्तु तत्रापि स एव, यो लिटि दृश्यते।

एकवचनं वर्तमाने ति सि मि रूपं स्पष्टमुच्चारणभेदमावहति तकार सकारयोः

---

१. Wacker nagal:—Altindische Grammatik, Vol. III, p. 57, संस्कृत का भाषा शास्त्रीय अध्ययन पृ० १६९-१७०

२. वही

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दन्त्यत्वसाम्येऽपि अल्पप्राण महाप्राणानुष्मत्वोष्मत्व प्रयोज्य भेदस्य स्पष्टं श्रुति गोचरत्वात्। लोटि तत्र तुहितातङ् निरूपादेशविकारा[1] उद्भवन्ति, लङादौ क्वापि तिपः स्वर रहितः तकारः[2] सिपः विसर्गः[3] क्वापि च तकार सकार[4] लोपः मिपोऽमादेशश्च[5] जायन्ते। बहुवचने लोटि 'अन्तु' 'अतु' 'अति' इत्यादयः प्रथम पुरुषे ङिल्लकारेषु च अन् उस् इत्यादय आदेशा दृश्यन्ते। इत्थमेकवचन बहुवचनयोस्तत्तल्लकारेषु यद् विभक्ति रूप वैविध्यं दृश्यन्ते तन्न विलोक्यते द्विवचने परस्मैपदस्य।

आत्मनेपदेऽपि द्विवचनस्थ विभक्तयो दृश्यन्ते 'आते आथे वहेरूपा भ्वादि दिवादि तुदादि चुरादि गणेषु। तत्रापि आते आथे इत्यनयो रल्पप्राण महाप्राण जन्य एव भेद उच्चारणे। वहे इति तु परस्मैपदस्य वस एव आत्मने पद कृतैकारघटितरूपम् केवलं तत्र सकारो हकारत्वं प्राप्तो दृश्यते, एकारे परे सकार एधिताहे[6] इत्यादौ हत्वं भजत एव। सोम सप्ताह सिन्धु शब्दादौ होम हप्ता हिन्दुरूपेण सकारस्य हकारप्राप्तिरूपा विकृतिः अवेस्ता फारसी प्रभृतिषु दृष्टैव, मार-वाड़ी भाषायां "यूयं तु सकलं खादथे" त्यर्थकं यदा "थे तो हगलो खालो' इति प्रयुज्यते तदा 'नैसर्गिकः परिहास उद्भवत्येव। भ्वादि दिवादि तुदादि चुरादि गण चतुष्टये एधेते एधेथे इत्यादि वर्तमान कालिके रूपेऽपि अल्पमहाप्राण प्रयोज्य एव भेदः। लोटि 'एधेताम् 'एधेथाम्' कुर्वाताम्' 'कुर्वाथाम्' इत्यादौ च तत्कृत एव भेदः। लोटि 'वहै' इति यद्दृश्यते तदपि लटः 'वहे' इत्यस्य तल्लकारकृतमेव वैशिष्टयं यच्च'एत ऐ'[7] इत्यनेन व्याकरणे प्रतिपाद्यते। टिल्लकारे दृश्यमाने 'वहे' इति रूपे ङिल्लकाराणां रूपाद् 'वहि' इत्यस्माद् रूपाद् दृश्यमानो भेदोऽपि मात्रा कृत एव। आत्मने पदे प्रथम पुरुषादिषु एकवचन बहुवचन विभक्तिचिह्नेषु 'एधते' 'एधसे' 'एधे' एधन्ते एधध्वे, एधामहे इत्यादौ एधताम् एधस्व एधै एधन्ताम् एधध्वम् एधामहै, ऐधिष्ट ऐधिषत इत्यादिषु आकृति वैविध्यं यथा दृश्यते न तथा द्विवचन रूपेषु।

किञ्च नाम रूपेषु द्विवचन दौर्बल्यात्परवर्तिनीषु भाषासु तल्लोपे तिङन्त रूपेष्वपि तस्य स्वाभाविको लोपो जातः, " छिन्ने मूले नैव शाखा न पत्रम्" इति न्यायात्। तच्च बहुवचने समाविष्टम्[8]।

आदेश दृष्ट्याऽपि द्विवचनं न वैविध्यमावहति। पुंल्लिङ्गे प्रथमा द्वितीया द्विवचनं क्वापि

---

१. ए रुः—३.४.८६, सेर्ह्यपिच्च ३.४.८७, तुह्योस्तातङ्० ७.१.३५ मेर्निः ३.४.८९।
२. यथाऽभवत् इत्यादौ
३. यथाऽभवः इत्यादौ
४. यथाऽहन् इत्यादौ
५. अभवम् भवेयम् इत्यादौ यथा।
६. ह एति- पा. सू० ७.४.५२
७. पा. सू० ३.४. ९३
८. प्राकृत प्रकाश सू० ६/६३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वकीय मूल प्रकृति मौकार रूपां न जहाति। स्त्रीलिङ्गेऽपि हलन्त प्रातिपदिके वाचौ दिशौ इत्यादौ द्विवचनस्यौ काररूपता वृक्षावित्यादा विवैव दृश्यते । ह्रस्वदीर्घे कारोकार प्रकृतिके स्त्री लिङ्ग द्विवचने यणियङ् उवङ् घटिते रूपे मत्यौ नार्यौ श्रियौ भुवा वित्यादौ औकार एव श्रूयते। आवन्त स्त्रीलिङ्गाद् विधीय मानस्य द्विवचनस्य प्रथमायां द्वितीया याञ्च विभक्तौ जायमानो विकार ईकाररूपः गुणसन्धिना एकारत्वं भजमानः समान एव। आवन्त भिन्न प्रकृतिके गोपौ (देव्यौ) इत्यादौ विश्वपौ (देवौ) इत्यादाविव औकार एव श्रूयते।

नपुंसकलिङ्गे औङः स्थाने ईकार एव जायते। अत एव विकार दृष्ट्या विचार्यते चेत् औङः स्थाने जायमानं परिवर्तनं स्त्रीलिङ्गे नपुंसके च समानमेव प्रतीयते। रमे फले चेत्युभयत्र श्रूयमाण रूपयोः साम्यं स्पष्टम्। वारिणी मधुनी इत्यादौ नुम्घटित दीर्घेकारत्वं तुल्यम्। भ्यामादि द्विवचनचिह्नानि तु त्रिषुलिङ्गेषु समान्येव। युष्मदस्मच्छब्दयो र्यत्र किलैकवचन बहुवचने विविधेषु तत्तद्विकारेषु परिवर्तिते दृश्येते, भ्यामादयो विभक्तयो द्विवचन प्रत्यायिका वीतराग द्वेषा योगिनश्चित्तवृत्तय इवागृहीत परिवर्तना एव तिष्ठन्ति। सर्वनाम प्रकृतिकं द्विवचनमपि न सर्वनामजन्यं परिवर्त्तनमादत्ते। सर्वनामशब्दे 'स्मै' 'स्मात्' सुड्शी जन्यं सर्वं परिवर्तनं सर्वस्मै सर्व स्मात् सर्वेषां सर्वे इत्यादचेकवचन वहुवचनयो रेव दृश्यते[1]। अतएव महाभाष्ये नित्यद्विवचनान्तस्योभशब्दस्य सर्वादिगणे सर्वनामसंज्ञार्थकृत पाठवैयर्थ्यमाशङ्क्य तस्य तत्र पाठस्य अकच् प्रत्यय सम्पादनरूपं प्रयोजनं स्वीकृतम्[2]। इत्थं नपुसकलिङ्गे द्विवचनस्य ईकाररूपमेक मेव विकारं विलोक्यान्यत्र लिङ्गद्वये औकाररूपां मूलप्रकृतिं स्त्रीलिङ्गे च तत्स्थाने ईकाररूपामेकामेव विकृतिं दर्शं दर्शमादेश दृष्ट्याऽपि वैविध्यरहितस्य तस्य स्थितिर्न प्रबलेति भाषातत्त्व विदो वदन्ति।

नपुंसक लिङ्गमपि प्राकृतादौ जीवदपि संस्कृते स्वकीय दुर्बल स्थित्यैव ततः पम्परया विकसितासु हिन्दयादि भाषासु स्वस्य स्वतन्त्रं स्थानं द्विवचन वज्जहौ। प्रथमायां द्वितीयायाञ्च जायमानानां प्रातिपदिक रूपाणां नपुंसके भेदाभावः तृतीयादौ विभक्तौ पूंवद्रूपता च तस्य लिङ्गस्य दौर्बल्यं सूचयतः। वारिणा वारिणे वारिण इत्यादावपि नुमागमसाम्यान्नास्ति तथा रूपभेद वैविध्यं यथा हरिणा हरये हरेरित्यादौ। यत्र च सुवारिणः सुवारेर्वा सरस इत्यादौ विकल्पेन पुंवद्भावो विधीयते[3] तत्र तु दृश्यमाना पक्षे पुंवत्ता तस्य पुंल्लिङ्ग रूपवलवत्ताप्रयोज्यात्मसमर्पणकार्याद्दौर्वल्यं सूचयत्येव। इदमेव रूपवैविध्याभावरूपं दौर्वल्यं नपुंसकलिङ्गस्यापि साम्प्रतिक भाषासु संस्कृतात्परम्परयाविकसितासु विलोपस्य कारणम्। सबलमेवात्र जीवितुं प्रभवति निर्बलस्य तु मरणमेव शरणमिति लोक नियमो भाषामपि न त्यजति। अत एव चिराद्

---

१. सर्वनाम्नः स्मै ७.१.१४, ङसिङ्योः स्मात्स्मिनौ ७.१.१५ आमि सर्वनाम्नः सुट् ७.१.५२ जसः शी ७. १. १७

२. उभस्य सर्वनामत्वेऽकजर्थः, किमुच्यतेऽकजर्थ इति न पुनरन्यान्यपि सर्वनामकार्याणि ? अन्याभावो द्विवचन टाब्विषयत्वात्। उभशब्दोऽयं द्विवचन टाव् विषयः। अन्यानि च सर्वनाम कार्याणि एकवचन बहुवचनेषूच्यन्ते इति। सर्वादीनि सर्वनामानि पा. सू० १.१.२७ महाभाष्यम्।

३. तृतीयादिषु भाषित पुंस्कं पुंवद् गालवस्य ७.१.७४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विनष्टेन द्विवचनेन सह नपुंसकलिङ्गमपि साम्प्रतिकभाषासु हिन्द्यादिषु परित्यक्त स्वस्थानं जातम् ।

पालि भाषायां सुबन्त तिङन्त रूपेषु प्रायः द्विवचनस्याभावो जातः[1] । प्राकृतेऽपि तस्याभाव एव प्राप्यते[2] । 'निय' प्राकृतन्त्वस्य नियमस्यापवादः, तत्र द्विवचनप्रयोगस्य क्वापि क्वाप्युपलम्भात्[3] । "आरेलस्टेन" इत्याख्येन विदुषा पुरातत्त्वान्वेषणपरेण चीनगततुर्किस्तानस्य 'निय' नामके प्रदेशे 'खरोष्ठी' लिपि लिखिताः कतिचिल्लेखाः प्राप्ताः । 1937 तमे ख्रिष्टाब्दे 'टी बरो' महोदयेन भाषाशास्त्र विदा तेषां लेखानामध्ययनं कृत्वा ते लेखाः प्राकृतभाषाया इति निर्णीतम् । 'निय' प्रदेशोपलब्धतया सा भाषा नियप्राकृतमिति नाम्नाऽऽख्यायते[4] ।

धम्मपद प्राकृतस्येव नियप्राकृतस्यापि प्रयोगक्षेत्रं भारतस्य पश्चिमोत्तरप्रदेश इति भाषा तत्त्व विदो वदन्ति । इयं ख्रिष्टस्य तृतीय शताब्द्या भाषेति तेषां विश्वासः । इयं नियप्राकृतभाषा ईरानीय मङ्गोलीयतोखारीयभाषाप्रभावितेत्यपि तेषां स्वीकृतिः[5] ।

अपभ्रंशे द्विवचनं व्यलुम्पत् । आधुनिकीषु हिन्दी मैथिलीभोजपुरी पञ्जावी राजस्थानी वंगाली गुजराती मराठी प्रभृतिषु तद् विलुप्तमेव । द्वित्ववोधाय तत्र द्वित्व संख्या बोधकः शब्दः प्रयुज्यते । दित्व बोधक शब्द प्रयोगं विनापि शब्दान्तरसन्निधि साहचर्यादिनाऽभिधानियामकेन हेतुनाऽपि दित्ववोधो जायते । अतएव तत्तद्व्याकरणे बहुवचनमनेकवचननाम्नाऽपि प्रोच्यते । द्विवचनं बहुवचनेनैव समाहृतम्[6] । क्रियापदेषु च सैव स्थितिः द्विवचनस्य[7] ।

नपुंसक लिङ्गत्वं तु दुर्वलमपि पालिप्राकृतादिषु स्वकीयस्वतन्त्र स्थितिं नाजहात् तस्य स्थानं तु साम्प्रतिक भाषासु समागत्य व्यलीयत किन्तु स्वकीय चिन्हवैविध्याभावविकलतया दीनं द्विवचनं पालिप्राकृतादि भाषास्वेव स्वतन्त्रस्थान रहितं बभूवेति शिवम् । □

---

१. प्राकृत विमर्श पृ० २०३

२. "द्विवचनस्य बहुवचनम्" प्राकृतप्रकाश सू० ६।६३

३. नियाप्राकृत में द्विवचन का प्रयोग दो उदाहरणों में मिलता है—पदेभ्याम् और पदेयो। प्राकृत विमर्श पृ० ७४, भाषा विज्ञान—डा० तिवारी पृ० १८२

४. भाषा विज्ञान—डा० तिवारी पृ० १७२

५. भाषा विज्ञान—डा० भोलानाथ तिवारी पृ० १७६ और प्राकृत विमर्श—डा० सरयू प्रसाद अग्रवाल पृ० ११-१२

६. द्विवचनस्य वहुवचनम्—प्राकृत प्रकाश—परिच्छेद-६ सू० ६३ संज्ञा सर्वनाम आदि के प्रयोग बहुवचन के रूप में सम्मिलित हो गये—प्राकृत प्रकाश पृ० १३७

७. प्राकृत प्रकाश पृ० २०३—भवति, होति, भवन्ति, होन्ति (प्र० पुरुष) भवसि होसि, भवथ होथ (म० पुरुष) भवामि, होमि, भवाम होम (उत्तम पुरुष) परस्मै पद । भवते, भवन्ते, भवसे, भवह्वे, भवे भवम्हे—आत्मनेपद ।

क्रियापदों में द्विवचन का लोप हो गया, वह बहुवचन में सम्मिलित हो गया।—प्रा० प्रकाश, पृ० ५८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दु विधिशास्त्रे मीमांसाशास्त्रस्योपयोगः

● डॉ० गजाननशास्त्रि मुसलगाँवकरः

अनवद्य विद्याविद्योतिन आर्यावर्तस्य ललामभूतेषु षट्सु दर्शनेषु पूर्वमीमांसाशास्त्रमेव महता प्रयत्नेन उपचरितव्यमित्याचक्षते भट्टपाद प्रभृतयः प्राञ्चो दार्शनिकाः। इतरेषु दर्शनेषु जगत्तत्त्वं प्रतिपादयत्सु अपि पुरुषाणामनुष्ठानेन अभ्युदयं निःश्रेयसं च सम्पादयन्तं वेदोदितं धर्मं साकल्येन न्यायतो यथास्वं निर्णीय लोकानुद्धर्तुं नान्यत्तन्त्रं प्रववृते विना मीमांसाशास्त्रम्[१]। मीमांसा शास्त्रनिर्दिष्टान् न्यायाननवलम्ब्य वेदस्य याथार्थ्येनार्थो मितंपचमतिभिरवगन्तुं न पार्यते। तेषु च न्यायेषु अज्ञातेषु दुर्ज्ञातेषु वा न यथावद् वेदार्थोऽवबुध्यत इति यत्किञ्चित् प्रतिपद्यमानो महान्तं प्रत्यवायमासादयेदिति प्रयत्नेन किल उपचरितव्या भगवती प्राची मीमांसा[२]।

न खलु उपदिशति पूर्वमीमांसाशास्त्रं नूतनं किमपि अलौकिकं तत्त्वम्। तस्यां च जगदुत्पत्तिः, परमेश्वरस्य साकारता, को नु आत्मा, इत्यादीनां प्रधान भूतानां वेदान्तविषयाणां नैव कृतो विचारः। एतत्सत्यमपि नहि हीयते एतावतैवास्य शास्त्रस्य गौरवं मनागपि। जगतो नैतिक शासनदात्री शक्तिः अस्मिन् शास्त्रे वर्तते। अस्मिन् शास्त्रे वेदानां प्राचीनतमत्वं, कर्तव्यविषयकाः केचन सारगर्भिता नियमाः, शब्दानां वाक्यानाञ्च अर्थावगमविषये उपपत्तिः सुष्ठु प्रदर्शिता। स्वीयोक्तेः समर्थनाय आदृता विशिष्टा तर्क पद्धतिः इत्यादयोऽनेके असाधारणाश्च विषयाः सप्रपञ्चं विवेचिताः। तेन चेदं शास्त्रं विन्दति अद्ययावद् बहुमान पात्रतां विदुषाम्।

अन्यच्च यस्य योगेन शास्त्रमिदं प्रेक्षावतां प्रवरैरारोपितं बहुमानपदवीं, तस्य विशिष्टतमस्य विषयस्य निरूपणमवशिष्टमेवेह। येषां ग्रन्थानां वचनानि वहु मान्यन्ते सर्वैः शिरसा-निष्पक्षपातं, तेषां वचनानां यथावदर्थावगतये सौलभ्यसम्पादका अत्युपयुक्ता नियमाः खलु इह विस्तरशः संगृहीताः। न भवन्त्येते नियमाः केवलं वेदानामेवार्थ प्रतिपात्तौ सौकर्यसम्पादकाः, अपि तु धर्मशास्त्रीयवाक्यानामपि अर्थवैशद्य सम्पत्तये विद्वद्भिः प्रयुज्यन्ते। जनैः प्रत्यहं प्रतिपालनीया आचाराः के? कीदृशं वा लोकानां वृत्तं? कानि वा तेषां कर्तव्यानि कर्माणि? दत्त परिग्रहः, विभागः, दायभागीयं स्वत्वं, इत्यादीनां राजकीयानुशासन (LAW) गतानां विष-

---

३. प्रतिज्ञा सूत्र, श्लो० वा० ११

२. प्रतिज्ञा सूत्र, श्लो० वा० १५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

याणां व्यतिकरः (Complications) च कथं शमनीय इति विवेचनावसरेऽपि मीमांसाशास्त्र प्रदर्शितान्नियमान् विना न प्रचलति मनागपि लोकव्यवहार इति चेदुच्येत, नैषोक्तिरतिशयकोटि भाजनं भवेत् सर्वथा।

श्रुत्यर्थस्पष्टीकरणाय प्रदर्शितानां नियमानां विमर्शनं तावत् किञ्चिन्मात्रं क्रियते। स्थूलदृष्ट्या विलोकिता नियमा हि द्वैविध्यं साधारण विशिष्टभेदेनाधिगच्छन्ति। विद्यते विधिषु कश्चिद्विशिष्टोऽधिकारः। यावद् विधिभिः सह विसंवाद मनापन्ना अर्थवादा एव न प्रदर्शयन्ति किल तेषाभपूर्णतां तावदेव अर्थवादानां प्रामाण्यम्। इदमादिमवर्गस्य उदाहरणम्। द्वितीये च यथा शुद्धविधिः, नियमः, परिसंख्या चेति विभाग एव। शेष-शेषिणोः अंगांगिभावनिर्णयावसरे सहकारीणिषट् प्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यादीनि। एषां च द्वयोः समवाये परस्मात् पूर्वं बलीयः[१]। एष नियमः आदिमे वर्गे प्रविशति। विश्वजिद् यागे यजमानः सर्वस्वदानं कुरुते इत्यर्थका श्रुतिः श्रूयते। यच्च यावद्वा स्व-स्वामिकं वस्तु विद्यते, तावत्सर्वं विश्वजिन्नामके यागे दद्यात्[२] इति तस्याः स्पष्टोऽर्थः। इत्येवं जातीयो न्यायः द्वितीयं वर्गं (विशिष्ट नियमम्) अनुप्रविशति। तथैव च रात्रिसत्रविषयकाणि वचनानि,[३] 'श्येन' इति याग विशेषस्य[४] अभिधानमिति च न्यायद्वयं द्वितीयवर्गमेव समाश्रयति।

महर्षिणा जैमिनिना अर्थविशदीकरणाय प्रणीताः मीमांसानियमाः साम्प्रतिके च समये 'मक्स्वेल' नाम्ना प्रसिद्धतमेन आंग्लकुलसंभूतेन राजकीयानुशासन विचक्षणेन प्रचलितानां राजकीयानुशासनानामर्थं विशदीकरणाय प्रदर्शिता नियमाश्च एकजातीया एव। जैमिनीया नियमाः भारतीय राजकीयानुशासनेषु वर्तमानैः कैश्चन नियमैः एकीभावमेवाधिगच्छन्ति। एष पुन र्नियमः प्रथमोराजकीयानुशासनार्थ विशदीकरणाय प्रयुक्तः, यत् राजकीयानुशासन गतानां शब्दानां वाक्यानां च अर्थः साधारणतया लोकव्यवहारे यादृशः क्रियते जनैः, तादृश एव स करणीयः। मीमांसाया अर्थनिर्णायकं यच्छ्रुत्यात्मकं साधनं वर्तते तत्रापि एव एष नियम उपदिष्टः। अनुशासनस्य केनचन विशिष्टेन प्रकारेण अर्थकरणे केषांचन अनुशासनीयशब्दानां तेन अर्थेन सम्बन्धे अनुपपद्यमाने नैषोऽर्थ आदरणीयः। अनुशासनान्तरेण सामयिकाखिल सन्दर्भानुरोधेन समापतितायामावश्यकतायां तादृशोऽप्यर्थो विवक्षणीय एवेत्यन्यदेतत्[५]।

विधेः समनन्तरं प्रवृत्ता अर्थवादा विधीनामेव अर्थस्य उपबृंहणाय प्रतिपादिताः[६]।

---

१. मीमांसा० ३।३।१४
२. मीमांसा० ६।७।-१२
३. मीमांसा० ४।३ १७,१९
४. मीमांसा० १।४।५
५. उपरिनिर्दिष्टोऽयं नियमः मक्सवेलस्य षष्ठे संस्करणे ३३ तमे पृष्ठे लिखितः
६. मीमांसा, १।२।१,७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत एव हि विधेः समनन्तरं श्रूयमाणानामर्थवादानां न कोऽप्यर्थ इतीदृशी शङ्का न केनापि पुरस्कर्तुं शक्यते । पूर्वमीमांसी यमिदं तत्त्वं मक्सवेलतत्त्वेन काममैक्यमधिगच्छति ।

अनुशासनानां स्पष्टीकरणाय अन्यः कश्चनापि नियमो वर्तते । अर्थविवेचनावसरे अनुशासनानां सर्वेषामंशानां विचारः समकालं कर्तव्यः । प्रत्यंशं पृथक् पृथक् विचारकरणं तु महान् प्रमाद एव । तथैव च कस्यचन शब्दस्य परस्परं विरुद्धयोरर्थयोः संभवे, यो वाऽर्थोऽनुशासनस्याभिप्रायं साकल्येनानुसरति तस्यैवार्थस्य अंगीकरणं न भवेत् प्रमादः[1] । एवंविध एव नियमः जैमिनीये शास्त्रेऽपि संलभ्यते[2] ।

नैव मन्तव्यं यावच्छक्यं द्वे अनुशासने परस्परं विरोधिनी भवत इत्यनुशास्ति मक्सवेल महोदयः । कथमपि विरोधेच संभवति सति तयोरुभयोरनुशासनयोस्तात्पर्येण विवक्षितौ विषयौ भिन्न-भिन्नौ भवत इति मन्तव्यम् । अत एव च प्रत्येकमनुशासनस्य भाषा तदनुशासनमात्र एवेत्यवगत्य तदनुरोधेनैव तस्यानुशासनस्यार्थः प्रतिपत्तव्यः । मीमांसाशास्त्रेऽपि चैतादृश एव नियमः प्रदर्शितः । स चेदृशः—यत् अनुशासनस्य अर्थ विवेचनावसरे अर्थद्वयस्य संभावनायां को वार्थस्तत्रांगीकरणीयः ? इति विषये सति सिद्धान्तनिर्णायकोपायदौर्गत्ये वैकल्पिकोऽर्थः स्वीकरणीयः[3] । अन्यदा च ग्रन्थविशेषस्य उद्देश्यं विषयविशेषमात्र एव वर्तत इति मत्वा तदनुरोधेन व्यवस्था करणीया भवति ।

अनुशासनेषु यत्र-यत्र एकवचनान्तः शब्दः, तत्र सर्वत्र तस्मिन् शब्दे बहुवचनस्यान्तर्भावो भवतीत्यर्थात्मकः अनुशासनस्य एकोंऽशः (Section 13) विद्यत इति प्रोक्तं भारतीय 'जनरल क्लजेज् अक्ट' नामकेऽनुशासनग्रन्थे[4] । अस्तीदृगेवमतं जैमिनीये नयेऽपि[5] । 'ग्रहं संमार्ष्टि' इत्यस्मिन् वाक्ये एकवचने प्रयुक्तो ग्रह शब्दः 'सर्वाणि पात्राणि' इत्यर्थपरतया बहुवचनान्त एव ग्राह्यः । मीमांसा शास्त्रीय नियमानुरोधेन प्रतिवाक्यंक्रियापदमेव मुख्यः शब्दः । वाक्यस्यार्थश्चयत् किमपि कर्तव्यम्, साधनीयं वेति, इत्येवंजातीयको वर्तते । आक्षेपलभ्यत्वात् कर्ता चात्र गौणः । अत एव च तस्य (कर्तुः) विशेषणानां वाक्ये प्रयुक्तानां वाक्यगत मुख्यार्थेन साकं न कोऽपि विद्यते सम्बन्धः । यथाह नारदः—'अविभक्तानां बन्धूनां धार्मिकेषु कर्मसु समान एव अधिकारः' इति स्मरति । तत्र 'बन्धु' शब्दः अविभक्तकुटुम्बान्तर्गतस्य पुरुषस्य विशेषणतया प्रयुक्तः । अत एव ये-ये वा पुरुषा अविभक्त कुटुम्बे पितृव्यः, पौत्रः अन्यः कोऽपि वा विद्यन्ते तेषामपि एष एव नियमः ।

---

१. मक्सवेल पृ० ९५

२. सन्दिग्धेषु वाक्यशेषात्-मीमां० १।४।१९

३. एवमेषोष्टदोषोऽपि यद्व्रीहियववाक्ययोः । विकल्प आश्रितस्तत्र गतिरन्या न विद्यते ॥ तं० वा० १।३।२ पृ० १७५

४. जनरल क्लॉजेज अक्ट, १८९७ ई० स० दशमः अनुशासनांशः

५. मीमांसा ३।१।१३, १५ ग्रहैकत्वन्यायः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जैमिनीये मीमांसाशास्त्रे नियमविशेषेष महदेव प्रदर्शितमौदार्यं जैमिनिना। साम्प्रतिके स्त्रीस्वातन्त्र्यसम्पादक समये यजनकर्मणि दम्पत्योः समान एवाधिकार इति जैमिनीयं मतम्[१]। स्त्रीणां क्रय-विक्रयौ च निषेधति जैमिनीः। श्रुतिषु श्रूयते केषुचन स्थलेषु स्त्रीणां क्रय-विक्रय विषयक उल्लेखः[२]। न स भवति वस्तुतो विद्यमानानां विषयाणां निदर्शकः, सांकेतिको लाक्षणिको वा वर्तते। यद्यपि मनुना 'स्त्री-पुत्र भृत्यानां स्व-स्वामिकं न किमपि धनं भवति' इति स्मृतं, तथापि स्त्रीणां पुनः स्व-स्वामिकं धनं विद्यत इति श्रूयते मीमांसा शास्त्रे[३]। यजमानः पत्न्या सहकृतः एव भवति याग कर्मणि अधिकारी, इत्येवंजातीयकानि प्रशस्यतमानि वचनानि जैमिन्याचार्यः साम्प्रतिकानां संस्कारकंमन्यानां कृते प्रागेव व्यलिखत्। शूद्राणां यजनकर्मणि नाधिकार इति जैमिनिना यत् प्रोक्तं, सत्यं खलु तत्[४], यतः शूद्राणां यजन कर्मण्यधिकार सम्पादकानि वचनानि वेदेषु क्वापि न श्रुतानि। आचार्येण जैमिनिना शूद्रा वर्णेन नीचाः, नातस्तेषां श्रुतौ यज्ञ कर्मण्यधिकार इति न जातु प्रोक्तम्। तस्मिन्नपि काले बादरिः शूद्रा अपि यागे अधिकारिण इति प्रोवाच[५]। रथकारा ब्राह्मणादि प्रथमवर्णत्रये लब्धजन्मानो नासन्। तेषामपि अग्नीनामाधाने अधिकारो विधिसम्मतत्वाद् वैधानिकः[६]। निषादकुल प्रसूतस्यापि राज्ञो रौद्रयागकरणे श्रूयतेऽधिकारः[७]। बौधायन प्रमुखैः मुनिप्रवरैः निषादस्य जातिः प्रोक्ता[८]। निषादस्य रौद्रयाग करणेऽधिकारश्रवणादेव शूद्रस्यापि होमादि ब्राह्मणद्वारा सम्पाद्यं संभवति यथाविधि दत्तपरिग्रहेऽधिकार इति प्रोक्तं व्यवहारमयूखे। किन्तु नैतदनुमन्वते शुद्धिविवेकग्रन्थकारः प्राचीन मतानुयायिनो विद्वाँसश्च। दत्तपरिग्रहे होमः पुनर्वैदिकैरेव मन्त्रैः स्मृतः। वैदिकविधिना होमस्तु न संभवति शूद्रस्य विप्रद्वाराऽपि।

मीमांसायां धर्मशास्त्रे चाधिगत नैपुण्याः पुण्यश्लोकाभट्टकुल ललामभूताः कमलाकरभट्ट प्रभृतयः पण्डितपुण्डरीका अपि योषितां धन भागार्हतया सम्प्राप्तस्वत्व विषयेऽतिमात्रमनुकूलमेव मतं प्रकटीचक्रुः स्वीयेषुग्रन्थेषु। विवाहितोऽपि पुरुषो दत्तकत्वेन परिग्राह्य एव, नात्र कमपि दोषं पश्यामः इत्यामनन्ति स्म। विचारान्तराण्यपि एवं विधानि तैः प्रतिपादितानि। अस्मिन्नेव भट्टकुले लब्धजन्मना गागाभट्टनाम्ना महापण्डितेन महाराजस्य छत्रपतेः शिवाजिराजस्य वैदिक विधिना संवृत्ते राज्याभिषेक महोत्सवे प्रामुख्य मंगीकृतमासीत्।

---

१. मीमांसा, ६।१।६
२. 'भर्त्रा क्रीतापि स्त्री पुरुषेण परेण रमते' इत्यादीनि।
३. मीमांसा, ६।१।१६
४. मीमांसा, (६।१।२५-२८)
५. मीमांसा, (६।१।२७)
६. मीमांसा, (६।१।५५)
७. मीमांसा, (३।१।५१)
८. बौ० ध० सू०, १।६।२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महीपतेरात्मनो राज्यस्य विषये निःशेषं स्वामित्वं विद्यते इति नानुमनुते मीमांसाशास्त्रम् । यथा कश्चित् पुरुषः स्व-स्वामिकं क्षेत्रं पारितोषिकत्वेन दातुं, अन्यस्मै विक्रेतुं, वा प्रभवति, न तथा महीपतिः[1] । मोहमयी विभागीये 'लँड रेह्विन्यु कोड, नामके अनुशासनग्रन्थे (३७) सप्तत्रिंशतितमेंऽशे यन्महीपतेः स्वत्वविषये तस्वं ग्रथितं, तदपेक्षया मीमांसायां ग्रथितं तत्त्वं काममनुकूलं प्रशस्यतमं च प्रजायाः कृते । व्यवहारमयूखे तु राज्ञा प्रजाभ्यः करग्रहणमात्रं कर्तव्यं, क्षैत्रस्याधिपत्यं पुनः कृषीवलस्यैवेति प्रोक्तम्[2] । अत्र व्यवहारमयूखकर्त्रा मीमांसा शास्त्रमेव प्रमाणत्वेन परिगृहीतम् ।

प्रभवति विश्वजिद्यागे यजमानः सर्वस्वं दातुम्, किन्तु पत्न्या अन्येषां पुत्रदीनां च सम्बन्धिनां दाने तस्य नाधिकारः । न तेषु अनुशासनसम्मतं स्वत्त्वं विद्यत इति मीमांसाशास्त्रीयमेकं तत्त्वम् । एतदेव तत्त्वं प्रमाणीकृत्यमनुष्यस्यकलत्र पुत्रादिषु सम्बन्धिषु न संभवति अनुशासन संमतं स्वत्त्वंकथमपीति प्रत्यपादयद् व्यवहारमयूखकारोऽपि[3] । किन्त्वेतद् विज्ञानेश्वरकृतया मितारक्षया विरुद्धम्[4] । स्मृतीनां सङ्ख्यापि नाम यथासमयं वृद्धिमधिगच्छतिस्म । यदा तासामर्थं विशदीकरणमतिमात्रं दुष्करं संवृत्तं, तदा धर्मशास्त्रविदामान्तरं करणं मीमांसा शास्त्रमनुप्रविष्टम् । मीमांसाशास्त्रे श्रौतानां वचनानामर्थस्य विशदीकरणाय सुगमतमास्तर्कान्तिमकोटिं समारूढा नियमाः प्रोक्ताः । एते धर्मशास्त्रीय निबन्ध काराणां सुतरां सम्मता आसन् । धर्मं शास्त्रीय वाक्यार्थ विवेचनावसरे सवहुमानं तैरंगीकृताश्च । मेधातिथि-विज्ञानेश्वर प्रभृतयो मुनिकल्पाः पण्डितोत्तंसा धर्मशास्त्रीय निबन्ध लेखन समये सर्वत्र विधि-नियम-परिसंख्यार्थवाद प्रमुखानां शब्दानामुपयोगं चक्रुः । यथा—श्रीयाज्ञवल्क्यस्मृतीयैकाशीत्यधिकशततमपद्य विवरणावसरे भगवता विज्ञानेश्वरेण मिताक्षरायां 'विधिः नियमः, परिसंख्या वा' इत्यस्मिन् विषये विस्तराद् विवेचनंकृतम् । मिताक्षरा प्रभृतिषु अनेकेषु धर्मशास्त्रीयेषु प्रधानेषु निबन्धेषु अनल्पवारमकारि अर्थवादस्योल्लेखः । यस्मिन् कस्मिन्नपि मानवे आततायिनि तमविचारयन् हन्यादेवेत्यर्थवाचकश्लोको मिताक्षराकर्त्रा अर्थवादपरत्वेन व्याख्यातः, नैतत्पद्यं विधायकम् । धर्मस्य विप्रतिपत्तौ, आत्मनः संरक्षणे, गवां परिपालने, विग्रहे च विप्रस्यापि शस्त्रग्रहणंधर्मं सम्मतमिति धर्मशास्त्रकाराः कामं प्रशंसन्ति । नियमस्यास्य विवेचनावसरे एव आततायिविषयकं पद्यमर्थवादपरतया विज्ञानेश्वरेण व्याख्यातम् । पितरि जीवति पुत्राणामेवंविध विभागे न भवत्यधिकारः, यतो धर्मस्य सम्पदो वा विषये नहि स्वातन्त्र्यं जीवत्पितृकाणामिति स्मरति शङ्खः । व्यवहार मयूखकारस्तु समनन्तरोक्त विषय विवेचनावसरेऽत्रोदाहृतं शङ्खवचनं केवलमर्थ-

---

१. न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात्

२. सम्पूर्ण पृथ्वीमण्डलस्य तत्तद्ग्रामक्षेत्रादौ स्वत्वन्तु तत्तद्भौमिकादीनामेव राज्ञां तु करग्रहणमात्र म्—(मं० प्र० व्यव० म० पृ० ३२)

३. गवादाविव भार्यायां स्वत्वाभावेन तस्मात्तदुत्पन्नेऽपत्ये तदभावात्—(मं० प्र० व्यव० म० पृ० ३२)

४. या० स्मृ० २-१७४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाद एवेति प्रतिपादयति । 'पितरि जीवति पुत्राणामित्यादि प्रागुक्तं तत्त्वमेत्र सुस्पष्टं विशदीकृत्यनिरूपयितुमेव पुरस्कृतं शंखेन द्वितीयं धर्मस्येत्यादि' तत्त्वम्[१] । नातः परं किमपि विशिष्टमुद्देश्यं शंखवचनस्यास्य । एतेन मीमांसा शास्त्रीये विवेचने अर्थवादो नाम काचन महीयसी संज्ञा वर्तत इति सुस्पष्टं भवति । परमेषा सज्ञा धर्मशास्त्रीय परिभाषायां सुदूरमुत्सारिता तन्निबन्धकर्तृभिरिति यत् 'कीथ[२]' महोदयेन उक्तम्, नूनंतत् प्रमाद संभवमेवेति प्रतिभाति ।

मीमांसाग्रन्थेषु ऋत्वर्थ—पुरुषार्थविधि विचारोऽपि वैशद्येन कृतोऽस्ति । ऋत्वर्थविधीनां यथावदनुष्ठानेन यज्ञस्य सम्पूर्तिर्भवतीत्यत्रगम्यते । पुरुषार्थविधयश्च केवलमुपदिश्यन्ते पुरुषं सुपथे प्रवर्तयितुमिति । पुरुषार्थ विधीनामननुष्ठाने पुरुषः केवलं प्रत्यवैति । नैतिकदृष्टया केवलं पुरुषः (यजमानः) माननीयेषु न गण्यत इत्येतावदेव । पुरुषार्थ विधीनामननुष्ठानेन यज्ञ सम्पूर्तिर्नभवतीतिन । ऋत्वर्थ-पुरुषार्थयोर्विद्यमाना महती एषा विभिन्नता धर्मशास्त्रीय निवन्ध कर्तृभिरपि स्वीकृतास्ति । 'अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां कन्यकामुद्वहेद् वरः' इति सस्मार भगवान् याज्ञवल्क्यः[३] । अस्यां स्मृतौ 'असमानार्षगोत्रजाम्' इति वचनं ऋत्वर्थम् । 'अरोगिणीं भ्रातृमतीम्' इति शब्दद्वयं पुरुषार्थकम् । मिताक्षरायां— न जातु कश्चित् पुरुषः-सपिण्डायाः सगोत्रायाश्च कन्याया भवति भर्ता । परं रोगिणीं कन्यामुद्वहन् निषेधवचन वशाद् भवेत् कदाचित् प्रायश्चित्ती[४] । न स्यादयं विवाहः पुनरशास्त्रीयः । रोगिणीं कन्यां समुद्वहन् वरो न प्राप्नोति संसारसंभवं सुखम् । न च विन्दति प्रजामरोगिणीम्, इत्यादीनि फलानि दृश्यानि अन्ति ।

माता पिता वा परस्परानुज्ञया पुत्रं प्रतिग्रहीतुः समानजातीयं दत्तकत्वेन समुत्पन्नायामापदि सानुरागं, नतु भयादिना उदकपूर्वं दद्यात् । प्रतिग्रहीता च तं दत्तकत्वेन प्रतिगृह्य प्रतिपालयेत् इति मनुः स्मरति[५] । अत्र मिताक्षरायां विज्ञानेश्वर एवमभिप्रैति 'यन्मनोर्वचने स्फुटं 'आपदि' इति शब्दः स्मर्यते, तेन अविपत्तौ न प्रभवति कश्चित् स्वीयं तनयमन्यस्मै दातुं कथमपि । एष पुनः प्रतिवन्धो दातुरेव, न प्रतिग्रहीतुः । यदि प्रयच्छति कश्चन पुरुषः सप्रेम तनयमन्यस्मै, न भवेदेष दत्तपरिग्रहोऽशास्त्रीयः । प्रतिवन्धोऽयं पुरुषार्थ पदमनुप्रविष्टः, न तु ऋत्वर्थकः[६] । मिताक्षराऽपि एवमेव कथयति 'वंशपरंपराजितधनसहायमन्तरैव सम्पादयेद्धन-

१. पूर्वनिषेधार्थवादार्थानन्तरा स्वातन्त्र्योक्तिः—मं० प्र० व्यव० म० पृ० ३१

२. कर्ममीमांसा—पृ० ९९

३. या० स्मृ० १-५३

४. सपिण्डासु समानगोत्रासु सप्रवरासु भार्यात्वमेव नोत्पद्यते । रोगिण्यादिषु तु भार्यात्वे उत्पन्नेऽपि दृष्टविरोध एव ।—'मं० प्र० व्यव० म० पृ० ३९

५. मनुः ९-१६८

६. अयं निषेधो दातुरेव पुरुषार्थो न ऋत्वर्थ इति विज्ञानेश्वरः ।—मं० प्र० व्यव० म० पृ० ३९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्यत् पुरुषः इत्यर्थकं याज्ञवल्क्यवचनं अन्यत्रापि संवदति । मिताक्षरा तावत् जैमिनीय तृतीयाध्यायगतं वचनं 'शेषः, शेष-शेषिणोः सम्वन्धि' इत्युपयुनक्ति, इति सुस्पष्टं दृश्यते । मुख्य-गौणयोः कः सम्बन्धः ? ग्रन्थगतानि तत्त्वानि परिस्थित्यनुरोधेन कथं व्यवहर्तव्यानि ? इति निर्णयावसरे मीमांसा शास्त्रं 'क्रम' शब्दस्योपयोगं करोति । केषुचन स्थलेषु वाक्ये शब्दानां विन्यासः कया दिशा कृत इति निपुणं विविच्य अर्थः समुचितः प्रतिपत्तव्यः । केषुचन स्थलेषु शब्दरचनायां मनः अनिवेश्यैव 'केषां पदार्थानां क्व निर्देशः कृतः ? का-वा क्रिया ? कदा समुत्पन्ना ? इति विमृश्य अर्थोऽवसेय इत्युपदिशति मीमांसाशास्त्रम् । एवंविधे च समये क्वचित् क्वचिच्छब्दरचनायामपि परिवर्तनमावश्यकं भवति । आनुशासनिके वाङ्मये क्रियते तत्त्वयोर-नयोरुपयोगः । यथा—आत्मबन्धुः, पितृबन्धुः, मातृबन्धुः इति भेदेन त्रिविध बन्धवः स्मृताः । शास्त्रे वन्धुत्रय प्रकारोऽयं प्रदर्शितः अनुक्रमेण । तेनास्मिन् बन्धुत्रये कः पुनरत्र प्रथमं सम्मन्तव्य इति विमर्शनावसरे शास्त्रसंमतेन पथा प्रदर्शनीय इति मीमांसक शिरोमणिः श्री शंकर भट्टः प्राह । प्रागात्मबन्धुः, ततः पितृबन्धुः ततो मातृबन्धुः इति क्रमः संमतो भट्टनीलकण्ठस्येति सारः ।

आरण्यकेषु सन्न्यासिषु ब्रह्मचारिषु च विपन्नेषु तेषां सम्पदः शास्त्र सम्मतोऽधिकारी गुरुः, शिष्यः, सहाध्यायी वा भवतीत्यर्थकं वचनं स्मरति स्म योगीश्वरो याज्ञवल्क्यः । वचनस्या-स्य विवेचनावसरे विज्ञानेश्वरेण 'या हि सूची वनौकसां धन भागिनां प्रदर्शिता भगवता योगी-श्वरेण सा व्युत्क्रमेण प्रतिपत्तव्या । यथा—आरण्यकादिसम्पत्तेरधिकारी प्राथमिकः सहाध्यायी, तस्याभावे शिष्यः तस्याप्यभावे च गुरुरिति क्रमः । शिष्टाचारस्यापि अयं क्रमः संमतो भवतीति कथयति स्म । 'नञ्' शब्द निर्णयावसरे महानेव प्रयासः समारब्धो मीमांसाशास्त्रे । कुत्रचित् 'न' शब्दस्योपयोगो निषेध प्रदर्शने, क्वचिदपवाद प्रदर्शने, कुत्रचन अर्थवादे च कृतः । यदा वा कस्मिन्नपि ग्रन्थे कस्यचन कर्मणः कर्तव्यता उपदिश्यते, तत्तुल्यवलेऽपरस्मिन् ग्रन्थे च तस्यैव कर्मणो निषेधः क्रियते, तदा द्वितीयग्रन्थगतवचनस्य प्रतिषेध इति व्यवहारः[1] । यथा—'नातिरात्रे षोडशिनं गृह्णाति' । एवंविधेषु परस्परविरुद्धेषु वचनेषु समापतत्सु संभवति महदेव सौकर्यं कर्तुः स्वानुकूलवचनानुरोधेन प्रवर्तितु मिति नैतद् विचारसहम् । अनेन चोभयविधस्यापि ग्रंथस्य गौरवहानिर्भवेत् । एवं विधात्संकटात् मोक्षलाभायैव नकारदर्शकं वचनं अपवादा (पर्युदासा)-र्थवादान्यपरतया ग्राह्यम् । पर्युदासस्य विवेचनाय पूर्वमीमांसाशास्त्रे कश्चन नियमः प्रोक्तः । उदाहरणानि च अनल्पानि प्रदर्शितानि । यथा—'यजतिषु ये-यजामहं करोति नानूयाजेषु' इत्यत्र अनूयाजेषु ये-यजामहकरणं निषिद्धमिति न विविक्षोऽर्थः, किन्तु अनुयाजयाग भिन्नेषु यजतिषु ये-यजामहकरणमावश्यकमिति । अत्र नञर्थस्य अन्वयो न करोत्यर्थेन, अपितु अनुयाजशब्दार्थेन । कुत्रचित् समग्रं नकारसंवलितं वाक्यमेव अनुवादत्वेन व्यवह्रियते । अनुवादोनाम अर्थवादस्यै-कोंऽशः । एवं जातीयकं वचनं तु केवलं विहितानां कर्मणां स्तुतौ, विध्यसंस्पृष्टानां (अविहितानां) निन्दायां वा प्रयुक्तम् । यथा—अग्नेश्चयनं (प्रज्वलनं) भूमौ, अन्तरिक्षे, स्वर्गे वा न कर्तव्यम्' एतदर्थकं किंचन वेदवचनं श्रूयते, 'अन्तरिक्षे अग्नेः प्रज्वलनमसंभवदुक्तिकमि'ति नैतदविदितं

---

१. मीमांसा १०।८।६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वेषामपि । अथापि वाक्यमिदं पृथिव्यां प्राक् सुवर्णं निधाय तत्र अग्नेः प्रज्वलनं कार्यं मिति विधिं पुनर्दार्ढ्येन स्तोतुं प्रवृतम् । शब्दान्तरैश्च एतदेव अर्थवाद इति भवति सुस्पष्टम् । प्रपञ्चितोऽयं विषयो मीमांसा शास्त्रे महता वैशद्येन[1] ।

'निक्षेपः, प्रतिभूद्रव्यं (Pledge), पुत्रः, पत्नी इति वस्तूनि न भवन्ति अन्यदेयानि ।' इति नारदवचनस्य 'आत्मनः, पत्न्याः, पुत्रस्य हानिमनापादयन्नेव पुरुषः प्रभवति कस्यापि वस्तुनः प्रदाने' इति योगीश्वर याज्ञवल्क्यस्य वचनस्य च विवरणावसरे व्यवहारमयूख कर्त्रा पर्युदासानुवादौ आश्रितौ । यद् यद् वा स्यात् स्व-स्वामिकं वस्तु, तस्य सर्वस्यापि दाने प्रभवति पुरुष इति सत्यं खल्वेतत् । किन्तु दृष्टं किल अनेकशः, यत् निक्षेपपुत्रदारेषु[2] अनुशासनसम्मतं स्वामित्वं न विद्यते पुरुषस्य । एवञ्च यच्च विदितं सर्वेषां तस्यैव इह पुनर्निर्देशः कृतः, एष पुनर्नित्यानुवादः ।

मनुना प्राक् नियोगपद्धतौ मान्यतां प्रकटीकृत्य अन्ततः सा त्याज्यकोटौ प्रवेशिता । अत्र पुन रेकः प्रश्नः स्वयमेव प्रादुर्भवति, यन्नियोगो मुख्यः ? उत त्यागः ? इति । अत्र सौकर्यदान-मुचितं न वेति विवेचनावसरे प्रोक्तं मिताक्षराकारेण 'नात्र सौकर्यदाने पश्याम औचित्यम्' इति । सर्वथाकिल निषेधति मनुर्नियोग पद्धतिमितिच प्राह स मिताक्षराकारः । यत् प्राक् प्रादर्शि मनुना तस्यां सम्मतिः, तत्केवलमापद्धर्मत्वेनेति । महता नैपुण्येन तस्या उपयोगः कर्त्तव्यः । कस्याश्चन वाग्दत्तायाः कन्याया विवाहात्पूर्वं पत्युर्मरणे तद्भ्रात्रा साकमेव विवाहे नियोगपद्धत्या अंगीकार इह भवति सह्यः ।

आगन्तुकानामन्ते[3] निवेश इति न्यायस्योपयोगः, पुरुषस्यमरणानन्तरं तदुत्तराधिकारी को वा भवतीति विषय निर्णयावसरे प्रदर्शितो व्यवहारमयूखे भट्टनीलकण्ठेन । 'मातरि मृतायां पितुर्माता धनं (अनपत्यस्य पुत्रस्य) गृह्णीयात्' इति प्रोवाच मनुः । याज्ञवल्क्यस्तु पत्नी, कन्या, दौहित्रः, माता, पिता, बन्धुः, भ्रातृव्यः इत्युत्तरोत्तरमधिकारिण इति सूचीमेवाधिकारिणां प्रादर्शयत् । एवं च याज्ञवल्क्योपदिष्टाधिकारिणामसंभवे पितुर्माता उत्तराधिकारिणीतिसारः । विवादताण्डवेऽपि मतमिदमेवानुमन्यतेऽस्मिन् विषये । सर्वमिदं समालोच्यैव मनीषिभि 'धर्मस्य तत्त्वं निहितं गुहायामि' त्युच्यते । यतः शास्त्रकाराः भिन्न-भिन्नया विधया धर्मतत्त्वं वर्णयन्ति । अतः सर्वाणि शास्त्रीयाणि वचनानि विविच्यैव धर्मतत्त्वं निर्धारणीयं भवति । तत्र विवेचनं मीमांसाशास्त्रमवलम्ब्यैव कर्तुं सुशक्यं भवति । शास्त्रसमादिष्टेन विवेचितेन पथा निर्धारितो धर्म एव उभयत्र महते श्रेयसे कल्पते । अन्यथा एष प्रत्यवायप्रद एव सर्वथा । अत आधुनिके युगे मीमांसाशास्त्राध्ययन संवलितमेव धर्मशास्त्राध्ययनमत्यावश्यकमितिमेमतिः ।

---

१. मीमांसा १।२।५, १८।१०।८।७

२. मं० प्र० व्यव० म० पृ० ७७ निक्षेपं पुत्रदारांश्च सर्वस्वं चान्वये सति । अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम् ॥ अत्र पुत्रदारान्तेषु स्वत्वाभावात्तद्विषये नांतरिक्षे न दिवीतिवत् निषेधानुवादमात्रम् । एतेन 'स्वकुटुम्वाविरोधेन देयंदारसुतादृते' इति याज्ञवल्कीयः पर्युदासोऽपि व्याख्यातः ।

३. मीमांसा,५।२।१६, ६।३।६ शाव० भाष्येऽपि १०।५।३ 'युक्तं यद्वास्तव्यैराक्रान्ते देशे आगन्तुजनोऽसंभवादन्ते निवेश्यते ।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'लघुशब्दरत्नः', 'शब्दरत्नेन्दुशेखरो' वा ?

• वासुदेव घुशे

नत्वा गणेशपादाब्जं गुरूनथ दिवाकरान् ।
लघुनः शब्दरत्नस्य नाम किं तद्विमृश्यते ॥

१. अभिनवा उपलब्धिः

नव्य-व्याकरण-परम्पराया इतिहासे हरिदीक्षित-कर्तृकस्य 'शब्दरत्न'-ग्रन्थस्य उपलब्धिः एका अत्यन्तं महत्वपूर्णा घटना । तया वहोः कालात् विद्वत्सु प्रचलितः एको महान् विवादः प्रशमं यातः । किन्तु सहैव केचन प्रश्ना अपि समुद्भूताः । अतस्तेषाँ विमर्शनाय अयं प्रयासः ।

यथोक्तमुपरि हरिदीक्षित-कर्तृकस्य (बृहतः) शब्दरत्नस्य प्रकाशनात् पूर्वं (लघुनः) एकस्यैव शब्दरत्नस्य उपलब्धत्वेन तत्कर्तृत्व विषये आसीत् महान् विवादः । [1]केचन तदा उपलब्धं तं (लघुं) शब्दरत्नमेव हरिदीक्षित कर्तृकं मन्यन्ते स्म । नागेशभट्ट-कर्तृकत्वं च अस्य निराकुर्वन्ति स्म । [2]अपरे पुनः परम्परया अनुश्रुतं तस्य (लघुनः) शब्दरत्नस्य [3]नागेश-भट्ट-कर्तृकत्वं समर्थयन्तः तस्य तेन गुरुनाम्ना प्रकाशितत्वमनुमोदयन्ति स्म ।

किन्तु वाराणसी-तः डा० सीतारामशास्त्रिमहोदयैः संपादितायाः [4]बृहच्छब्दरत्न-लघुशब्दरत्नसहितायाः प्रौढमनोरमायाः प्रकाशनान् पुण्यपत्तनतश्च श्री वेङ्कटेश कश्यप जोशी महोदयैः [5]समीक्षात्मकपद्धतया (अनेकैः परिशिष्टैः सह) संपादितायाः 'शब्दरत्न'सहितायाः प्रौढ-

---

१. अस्य मतस्य पुरस्कर्तारः पं० सभापति शर्मोपाध्यायाः ।
द्र०—ल० म० भूमिका, पृ० ३ पादटिप्पणी ।

२. अस्य मतस्य समर्थका अस्माकं गुरुवर्याः स्वर्गीया पं० दिवाकर शास्त्री जोशी महाभागाः ।
द्र०—प्रौ० म० श० र० तत्वादर्श व्याख्या-प्रस्तावना ।

३. आफ्रेक्ट महोदयेनापि बृहत्सूचीपत्रे 'लघुशब्दरत्नः' नागेशभट्ट कृतिषु एव परिगणितः ।

४. हिन्दूविश्वविद्यालयीय-नेपाल राज्य-संस्कृत-ग्रन्थ मालाया अष्टमं कुसुमम्-प्रकाशन वर्ष १९६४

५. Deccan College Monograph Series : 31, Publication year—1966

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनोरमायाः प्रकाशनाच्च विवादोऽयं सर्वथा प्रशमितः।

विद्वद्वराभ्यां संपादकाभ्यां नैकैर्हेतुभिः संसाधितमिदं यत् हरि दीक्षित-कर्तृकः 'शब्दरत्नः' अन्यः नागेशभट्ट कर्तृकश्च 'लघुः' अन्य इति। तत्र नागेशभट्टस्य साक्षाच्छिष्येण पायगुण्डे-वैद्यनाथेन 'लघुनः शब्दरत्नस्य 'स्वीय'-'भावप्रकाश' व्याख्यायां 'मान्य'-मतैस्सह 'गुरुचरण'-मतानां यो विभेदः प्रदर्शितः स एव अनयोः (शब्दरत्नयोः) भिन्नकर्तृकत्व साधने मुख्यो हेतुः इति प्रदर्शितं श्री जोशीमहोदयैः स्कीयपरिशिष्टेषु। मान्याश्च इमे नागेशभट्टस्य गुरवः हरि दीक्षिता एव इत्यपि स्फुटं [1]तत्रैव।

किन्च लघुनि शब्दरत्ने नागेशभट्टस्य रचनान्तराणां [2]संकेता अपि अस्यार्थस्य साधकाः। किन्च [3]'लघुनि शब्दरत्ने बृहतः शब्दरत्नस्य स्थले स्थले खण्डनं वर्तते' इत्यपि मतस्यास्य परिपोषकं तथ्यम्। तेनेदं सुनिश्चितं यद् एकः शब्दरत्नः (बृहत्) हरि दीक्षित कर्तृकः अपरश्च 'लघुः' नागेशभट्टकर्तृकः इति।

२ अपरामृष्टो विषयः

किन्तु हरि दीक्षित-कर्तृकस्य 'शब्दरत्न' ग्रंथस्य उपलब्ध्या 'लघुनः शब्दरत्नस्य नागेशभट्ट-कर्तृकत्वे' सिद्धेऽपि [4]अपरामृष्ट एवायं विषयः यत्—'तत्कर्तृकस्य तस्य लघुनः शब्दरत्नस्य स्वकर्तृकत्व प्रकाशनं नागेशभट्टस्य अभिमतं न वा' इति।

यो ग्रंथः यत्कर्तृकः तद्ग्रन्थस्य तत्कर्तृकत्व-प्रसिध्या भाव्यम् परन्तु एतद्ग्रन्थविषये अस्ति विद्वत्सु प्रसृतेयं [5]प्रसिद्धिः यत् 'शब्दरत्नः' (यः कोऽपि तत्कर्तृकः, इदानीं तु लघुरेव) नागेशभट्टेनैव विरच्य स्वगुरु-नाम्ना प्रकाशितः, यथा तेन [6]वाल्मीकि-रामायणस्य [7]टीका (संभवतः तिलका'ख्या) स्वयं विरच्य स्वाश्रयदातुः '[8]श्रृंगवेराधीशस्य रामस्य नाम्ना प्रकाशिता इति सा च प्रसिद्धिर्निराधारा भवितुं नार्हति। 'नामूला तु जनश्रुति' रिति न्यायात्।

---

१. द्र०—प्रौ० म० श० र० (ख) परिशिष्टम्-१

२. द्र०—प्रौ० म० श० र० (ख) परिशिष्टम्-२

३. द्र० —प्रौ० म० श० र० (ख) परिशिष्टम्-३

४. उपर्युल्लिखित संपादक-द्वयेन।

५. द्र०—प० शे० 'मराठी भाषान्तर' प्रस्तावना पृ० ४ (भाषान्तर कर्ता-न्या. भू वाडेगांवकर)

६. क्वचिद् 'अध्यात्म रामायणस्य' इति उल्लेखः।

७. आच्प्रेक्ट् महोदयेन इयं टीकापि नागेश कृतिष्वेव परिगणिता।

८. यथोक्तं नागेशभट्टेन—
'श्रृंगवेरपुराधीश-रामनो लब्धजीविकः।' बृ० श० शे० मं० श्लोक २

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्च उपर्युलिलखिताभ्यां संपादकाभ्यामपि [1]स्वीकृतोऽयमर्थः प्रसिद्धिमूलकत्वादेव । अतः विषयोऽयम् अवश्यं विमर्शनीयः ।

३ विषयेऽस्मिन् कश्चन विमर्शः

अनुश्रुत्यादि-बाह्य प्रमाण-निरपेक्षतया केवलम् आभ्यन्तर प्रमाणाधारेणापि विमृष्टे अस्मिन् विषये इदमेव सिध्यति यत्—'लघुनः' शब्दरत्नस्य स्वकर्तृकत्व-प्रसिद्धिर्नागेशभट्टस्य वस्तुतोऽनभिप्रेतैव—इति ।

कुतश्चेत् ? तर्हि सन्ति इमे अत्र हेतवः—

(१) नागेशभट्टेन लघुनि शब्दरत्ने पृथङ् मङ्गलं न कृतम्, किन्तु [2]"शेषविभूषणम्' इत्यादि (बृहतः) शब्दरत्नस्यैव मङ्गलं स्वग्रंथेऽपि स्थापितम् । 'शेषविभूषणम् इत्यादि तु न नागेशकर्तृकम् । मानं चात्र नागेशकृतमङ्गलेभ्यः अस्य शैलीभेद एव । नागेशकर्तृकाणि मङ्गलानि [3]प्रायः [4]साम्ब शिव-मुद्दिश्य नति-पूर्वकाणि सरलार्थानि च । परमिदं श्लेषगर्भम् विष्णुशिवोभय स्तुति रूपम् । किं च पायगुण्डे वैद्यनाथेन दर्शित-चतुर्थपक्षरीत्या[5] श्री लक्ष्मीनृसिंहस्तुतिरूपं वा । अतश्चेदं हरि दीक्षित कृतमेव । एतद्ग्रन्थस्य (लघुनः शब्दरत्नस्य) स्वकर्तृकत्वप्रसिद्धेरभिमतत्वे नागेशभट्टेनात्र अभिनवं स्वकृतं मङ्गलंनिवन्धनीयमासीत्, परं तन्न निबध्यते तेन ।

(२) किं च पायगुण्डे-वैद्यनाथेन मङ्गलमिदं [6]व्याख्यायता 'ईडे'-पदस्य व्याख्यानं न

---

१. द्रष्टव्यं—(i) बृ. श. शे., प्रास्ताविके-उपशीर्षकम् बृहच्छब्देन्दुशेखरो, लघुशब्दरत्नश्च पृ. ४६
(ii) 'किञ्च स्वगुरु हरि दीक्षित नाम्ना प्रकाशनां नीतस्य.........
प्रौ. म. श. र. [ख] प्रस्ता० पृ ४६

२. शेषविभूषणमीडे शेषाशेषार्थलाभाय ।
दातुं सकलममीष्टं फल मीष्टे यत्कृपा दृष्टिः ॥
प्रौ० म० श० र० (क)
प्रौ० म० श० र० (ख)

३. बृहच्छब्देन्दु शेखर-लघुशब्देन्दु शेखरयोः न 'साम्ब-शिव'-नति रूपम् ।

४. उद्योत-मञ्जूषा-परिभाषेन्दु शेखरादौ 'साम्बशिव'-नति रूपमेव ।

५. अत्र (१) शेषः विभूषणं यस्य (२) शेषवी भूषणे यस्य (३) शेषव्योः भूषणम् इति पक्षत्रयं व्याख्याय अन्ते तेनोक्तम्—
'वस्तुतस्तु हरिहरात्मकं श्री लक्ष्मी नृसिंहमित्यर्थः । भा० प्र०, पृ-२

६. चतुर्भिः पक्षैः पद्यमिदं व्याख्यायता 'तृतीय-'पक्षविषये 'केचित्' इति वदता तेन 'पद्य-मिदं केनचिद् व्याख्यातपूर्वम्' इति सूच्यते । सा च व्याख्या हरि दीक्षितकृत-'शब्द-रत्नस्यैव संभवति, न नागेशभट्टकृतस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृतम् । अस्याः क्रियायाः कर्तृविषयेऽपि मौनमेवावलम्बितं तेन । नागेश भट्टस्य अस्य ग्रन्थस्य (लघुनः शब्दरत्नस्य) स्वकर्तृकत्व प्रसिद्धेरभिमतत्वे तच्छिछ्येण अत्र किमपि स्फुटीकृतं स्यात् । परं विषये ऽस्मिन् सर्वमपि निगूहितं तेन ।

(३) किं च बृहच्छब्देन्दु शेखर-लघुशब्देन्दु शेखरयोः 'साम्बशिव'—नतिरूपं मङ्गलं विहाय [1]'फणीश'-नतिरूपं मङ्गल माचरता नागेशभट्टेन संसूचितः कश्चन गूढार्थः । 'शब्दरत्न'-मङ्गले हरि दीक्षितेन केवलं शेष'-स्तुतिरूपं मङ्गलं नाचर्य यत् 'शेष-विभूषण'-स्तुतिरूपं मङ्गलमाचरितं तत् केनचिद् [2]अभिप्राय विशेषेणैव । स चेत्थं यत् केवलं 'शेष'-स्तुतिः कृत्स्न फलदाने न समर्था, किन्तु 'शेषविभूषण' स्तुतिरेव सर्वफल[3] दात्री इति ।

किन्तु नागेशभट्टेन (फणीश नतिरूपं मङ्गलमाचरता) स्वकीय मङ्गलेन 'शेष'-स्तुतिरपि सर्वफलदाने समर्था इति सूचितम् । केवलं 'शेष'-शब्द प्रयोगे दोषात्, तं शब्दमपहाय [4]'फणीश'-शब्दः प्रयुक्त स्तेन । अस्य ग्रन्थस्य (लघुनः शब्दरत्नस्य) स्वकर्तृकत्व-प्रसिद्धेरभिमतत्वे तेन 'फणीश'-स्तुतिरूपं मङ्गलमत्रापि निबन्धनीयमासीत्, परं तन्न निबध्यते तेन ।

---

१. (i) नत्वा फणीशमीशानं कौमुद्यर्थप्रकाशकम् ।
मनोरमोमार्द्धदेहं तन्वे शब्देन्दु शेखरम् ॥
वृ श. शे. मं. श्लोक० ३

(ii) नत्वा फणीशं नागेशस्तनुते ऽर्थ प्रकाशकम् ।
मनोरमोमार्द्धदेहं लघुशब्देन्दु शेखरम् ॥
ल. श. शे., मं. श्लो. ३

२. प्रकटितश्चायमभिप्रायः पायगुण्डे-वैद्यनाथेन 'शेषविभूषणम्'[1] इति पदे तद्गुणसंविज्ञान वहुव्रीहिं स्वीकृत्य विशेषण-विशेष्ययो रुभयोः स्तुतेश्च सार्थक प्रदर्शनेन ।
द्र०—भा० प्र०, पृ० २

३. यद्यपि पायगुण्डे-वैद्यनाथेन शेष-स्तुतिरपि सर्वफलदात्री, अतश्च 'शेषसुनायकमीडे' इति पाठ्यम्' किन्तु 'शेष'-शब्दस्य अवशेषार्थकतया दोषात् तस्य देवतार्थकत्वाय विभूषणपदम् इति तत्प्रयोजन मुक्तं, तथापि तत् 'उक्तपाठेनैव सिद्धौ विभूषणपदं व्यर्थम्' इति कस्यचन पूर्वपक्षस्य निरसनमेव । एतेनापि 'पद्यमिदं केनचिद्व्याख्यात पूर्वम्' इति संभावयामः ।

४. फणीशं—पतञ्जलिम् ।
—चिदास्थिमाला (पायगुण्डे वैद्यनाथ कृता ल. श. शे. टीका)
—श. शे. पृ. ४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(४) किं च 'शब्दरत्नस्य 'प्रस्तावना श्लोके' यथा हरि दीक्षितेन स्वकीय परिचय प्रदान-पूर्वकं ग्रन्थरचनायाः प्रयोजनमुक्तं तथैव अस्य (लघुनः शब्दरत्नस्य) स्वकर्तृकत्व प्रकाशनाभिमतत्वे नागेशभट्टेनापि [2]तद्रचना प्रयोजनं वक्तव्यमासीत्, परं तन्नो-च्यते तेन।

(५) किं च 'मनोरमा'-खण्डनस्य स्वकर्तृकत्व प्रकाशनस्य स्वाभिमतत्वेन यथा व्यङ्ग्य मर्यादया [3]उभय-शब्देन्दु शेखरयोः मङ्गलश्लोकेषु—

'मनोरमोमार्द्धदेहं तन्वे शब्देन्दु शेखरम्' इति

.'मनोरमो मार्द्धदेहं लघुशब्देन्दु शेखरम्।'

इति च तेनोक्तम्, तथैव अत्रापि

'लघुं[४] कुर्वे शब्दरत्नं शब्दरत्नैकजीवितम्!

इत्यादिप्रकारकं किञ्चित् तेन वक्तव्यमासीत्, परं तन्नोच्यते तेन।

(६) किं च 'शब्दरत्न'-खण्डन प्रकाशनस्याभिमतत्वे [5]येषु स्थलेषु पायगुण्डे-वैद्यनाथेन 'मान्य'-मतैः सह 'गुरुचरण'-मतानां भेदः स्पष्टीकृतः, तेषु स्थलेषु नागेशभट्टेन स्वयमेव 'मनोरमा-खण्डन-शैल्या (उभय-शेखरस्थया)

इदं प्राचामनुरोधेन।

इदमर्वाचामनुरोधेन।

इदं नव्यानामनुरोधेन।

इत्यादिरीत्या स्वीयमतभेदः स्पष्टीकरणीय आसीत्, परं स न स्पष्टीक्रियते [6]तेन।

---

१. गूढोक्ति ग्रथितां पितामह कृतां विद्वत्प्रमोदप्रदाम्
भक्त्याधीत्य मनोरमां निरुपमाद्रामाश्रयात् सद्गुरोः
तत्वाज्ञानवशात्परेण कलितान्दोषान्समुन्मूलयन्।
व्याचष्टे हरिरेष तां फणिमतान्यालोड्य वैरेश्वरिः॥
प्रौ० म० श. र. (ख) मं. श्लो. २

२. हरि दीक्षित-खण्डनस्य प्रकाशनाभि मतत्वे तदेव प्रयोजनं प्रकटतया निवन्धनीय मासीत्।

३. द्र०—पा० टि०—२०

४. मत्कल्पनैषा। तत्र 'लघुं कुर्वे' इत्यस्य व्यङ्ग्यमर्यादया ग्रन्थगौरवमपि 'लघूकुर्वे इत्यर्थः।

५. इमानि स्थलानि प्रौ० म० श० र० [ख] ग्रन्थस्य परिशिष्टेषु अंशतः सङ्कलितानि।

६. किन्तु पायगुण्डे-वैद्यनाथेनैव तेषु स्थलेषु उक्त शैल्या अनयोर्मतभेदः स्पष्टीक्रियते। यथा—

यत्तु 'षष्ठी स्थाने' इत्यस्य बाध एव क्लेश इति मान्याः तत्प्राचामनुरोधेन
भा० प्र०, पृ० १९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(७) किं च 'शब्दरत्न'-खण्डनस्याभिमतत्वे 'शब्दरत्नो' परि एव स्वतन्त्रां व्याख्यामेकां विधाय 'मनोरमा'-खण्डन शैल्या तत्खण्डनं तेन कर्तव्यमासीत्, परं न सा विरचिता तेन।

इत्थं च एभिर्हेतुभिः स्पष्टमिदं यत् 'प्रकटतया स्वगुरु कर्तृक-शब्दरत्न-खण्डनस्य अनभिप्रेतत्वेन नागेशभट्टेन लघुनः शब्दरत्नस्य स्वकर्तृकत्व प्रकाशनमपि नाभिलषितं किन्तु 'गुरुकर्तृकत्वेनैव तस्य प्रसिद्धिर्नागेशभट्टस्य अभिमता आसीत् इति।

४ गुरुनाम्ना ग्रन्थ-विरचने हेतुः

एवं स्व-रचितस्य लघुनः शब्दरत्नस्य स्वगुरु कर्तृकत्व-प्रकाशने नागेशभट्टस्य को हेतुः ? इतिचेत् [3]'गुरुभजनान्मुवितरेव' हेतुः इति अस्मद् गुरुवर्याः। [4]'विद्वत्सदसि स्वगुरो वैदुष्य-स्यापि संस्थापनम्' [5]हेतुरिति डा० सीताराम शास्त्रिणां कल्पना। किमपि भवतु तेन सर्वथा

---

१. (i) नागेशभट्टेन लघुनि शब्दरत्ने प्रकटतया 'शब्दरत्न-खण्डनं' नैव क्रियते। क्वचिदेव तु हरि दीक्षितस्य पृथङ् मतं उध्रियते। परं न तत् 'मनोरमा-खण्डन शैल्या' किंतु 'मत वैविध्य प्रदर्शन शैल्यैव।' यथा—'संज्ञाया एकत्वात् ज्ञापकस्य च विशेषा-पेक्षत्वेन संज्ञाभेदविषयत्वादिति भाव इति केचित्। परे तु... .....'

प्रौ० म० श० र० (क) पृ. २५३

(ii) केचिदिति। मूलानुयायिनो मान्या इत्यर्थः।

भा० प्र०, पृ० २५३

२. एवं च—"'उच्च' इति सूत्रे नव्यानां प्रमाद एव"

प्रौ० म० श० र० (क) पृ. १३८

इति तु न हरि दीक्षितस्य खण्डनं किन्तु भट्टोजी दीक्षितानामेव। उक्त दृष्ट्या लघुनः शब्दरत्नस्यापि हरि दीक्षित कृतित्वेन स्वयमेव स्वखण्डनस्य प्रकटतया कर्तुमशक्य-त्वात्।

एवं च—'नव्यानां मूलकृत्प्रभृतीनाम्'

भा० प्र० पृ, १३८

इत्यस्य न हरि दीक्षितानाम् इत्यर्थः। तथात्वे पायगुण्डे वैद्यनाथेन—

'नव्यानां मूलकृतां, तदनुयायि मान्यानां च' इति वक्तव्यत्वात्।

३. द्र०—प्रौ० म० श० र० 'तत्वादर्श'—व्याख्या प्रस्तावना पृ० 'च'।

४. द्र० वृ० श० शे०— प्रास्ताविकम्, पृ० ४६

५. हेतुरयं न साधकः। कुत इतिचेत्
'अधीत्य फणिभाष्याब्धि सुधीन्द्र हरि दीक्षितात्।
न्यायतन्त्रं रामरामाद्वादि रक्षोघ्न रामतः।' इति

—ल० म०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वगुरुकर्तृकत्वेनैव स्वग्रन्थः प्रसिद्धिं नेतुमभिलषितः इति तु स्पष्टमेव ।

अत एव नागेशभट्टेन स्वरचित ग्रन्थस्य पृथङ नामकरणमपि न कृतम् । किन्तु [1]स्वगुरु-ग्रन्थनाम्नैव स्वग्रन्थः प्रसिद्धिं नीतः । पृथङनामकरणे तन्निबन्धनाय ग्रन्थादौ ग्रन्थान्ते वा किमपि पद्यं निबन्धनीयं भवति परमेतादृशम् अस्य ग्रन्थस्य (लघुनः शब्दरत्नस्य) नामबोधकं, नागेशभट्टकर्तृकं किमपि पद्यं नोपलभ्यते कुत्रापि ।

किञ्च अस्य पुष्पिकासु [2]प्रायशः सर्वत्र हरि दीक्षितनाम्न एव उल्लेखः । [3]क्वचिदेव तत्-(लघु-शब्दरत्न) पुष्पिकायां नागेशभट्टनाम्न उल्लेखः, किन्तु सः पायगुण्डे वैद्यनाथेन अस्य रहस्योद्घाटनात्पश्चात् कृतो बोद्धव्यः । किञ्च क्वचिन् मातृकासु—

'विस्तरस्तु अस्मत्कृते शब्दरत्ने, मदन्तेवासिकृते शब्देन्दुशेखरादौ च द्रष्टव्यः ।'

इति [4]पाठ उपलभ्यते । स च नागेशभट्टस्य अभिमतं मन्तव्यं प्रकाशयितुमलम् । एतेन लघुनः शब्दरत्नस्य स्वकर्तृकत्व प्रसिद्धिर्नागेशभट्टस्य नाभिमता किन्तु स्वगुरुकर्तृकत्व प्रसिद्धिरेव इति स्पष्टम् ।

नागेशभट्टो नागेशभाषितार्थ विचक्षणः ।
हरि दीक्षित पादाब्ज सेवनावाप्य सन्मतिः ॥'

—उद्योत मं० श्लो० २

इति च नागेशभट्टेन द्विवारं गुरुवराणां गौरवस्य प्रकाशनात् तेषां विद्वत्सदसि स्थानं पूर्वत एवासीत् इति प्रतीयते । किञ्च नागेशभट्टस्येव परम्परा समालोचकत्वेन विदुषां मध्ये मान्यता-प्राप्तौ काठिन्यं संभावनीयम् । न पुनः प्राप्तमान्यताकस्य तद्गुरोः हरि दीक्षितस्य इति प्रतीमः ।

१. गुरुकर्तृकस्य ग्रन्थस्य नाम'शब्दरत्नः' इत्येव । ततः पार्थक्याय नागेशभट्टकृत ग्रन्थार्थे 'लघुशब्दरत्न'-नाम्नः व्यवहारः प्रचलितः । न तस्मात् पार्थक्य बोधनाय गुरुग्रन्थार्थे 'वृहच्छब्दरत्नः' इति व्यवहारः प्रचलितः इति बोध्यम् । वस्तुतस्तु उभावपि शब्द-रत्नावेव 'लघु-वृहत्' इति तु पार्थक्यबोधके विशेषणपदे एव । उभाभ्यामपि ग्रन्थकृद्भ्यां 'वृहच्छब्दरत्न'-'लघुशब्दरत्न'-नाम्नां स्वग्रन्थेषु निबन्धनं नैव कृतम् इति विशेषतोऽवगन्तव्यमत्र ।

२. मुद्रित पुस्तकेषु ।

३. यथा बृहच्छब्दरत्न संपादकैरुल्लिखिते 'छ' पुस्तके-'इति नागेशभट्ट विरचितायां मनोरमा व्याख्यायां समासाश्रयविधयः' इति उल्लेखः । द्र० प्रामा० पृ० ३६
विशेषतोऽवधेयम् —अत्र नागेशभट्टनाम्ना सह 'मनोरमा व्याख्या' शब्दस्यैव उल्लेखः न तु 'लघुशब्दरत्न'-नाम्नः ।

४. बृ. श. र.—सपादकैरुल्लिखितयोः 'घ'-'च' पुस्तकयोः ।
द्र०—बृ. श. र.—प्रास्ताविकम्, प. ३८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५. अल्प ग्रन्थस्य रचना-वैशिष्ट्यम्

एवं नागेशभट्टस्य स्वगुरुनाम्नैव स्वग्रन्थप्रसिद्धेरभिमतत्वेऽपि तेन स्ववैदग्ध्यवशात् अस्मिन् ग्रन्थे (लघुनि शब्दरत्ने) निगूढ-शैल्या स्वगुरुकर्तृकस्य (बृहतः) 'शब्दरत्न'-ग्रन्थस्यापि खण्डनं निबद्धम् इति तु तस्यैव नव्यवैयाकरण-कुलगुरोः नागेशभट्टस्य बुद्धिकौशलं रचना-कौशलं च। तत्कर्तृकमिदं 'शब्दरत्न'-खण्डनं न प्रथमदृष्टावेव बुद्धिगम्यं प्रकटं च। किन्तु निपुणतया दृष्टिप्रदाने एव बोधगम्यं निभृतं च।

अत एव एतत्खण्डन-शैलीविषये 'शब्दरत्न' संपादकैः निम्नशब्दैः [1]स्वमतं प्रकटीक्रियते—

शब्दरत्नस्य [2]साक्षाच्छब्दोपनिबद्धं खण्डनं लघुशब्दरत्नेन स्वल्पेष्वेवोदाहरणेषु क्रियते। [3]अन्यत्र प्रायः व्यङ्ग्यमर्यादया अत्यन्तं सूक्ष्मतया कामप्यरुचिं वा मनसि निधाय वक्रोक्ति-भङ्ग्यादिभिस्तथा खण्डनं क्रियते, यथा आपाततोऽवलोकितं तत् शब्दरत्न-खण्डनं वर्तते, इति ज्ञातुं कोऽपि न प्रभवेत्।'' इति।

एवं च नागेश भट्टेन प्रकटतया अस्य ग्रन्थस्य स्व-गुरु-हरिदीक्षित कर्तृत्वेनैव प्रकाशनात् नात्र स्वग्रन्थस्य स्वकर्तृकखण्डनम् अनुभवगम्यम्। किन्तु निगूढतया भिन्नकर्तृत्वेन तत्र तस्य खण्डनं बुद्धिगम्यं भवतीति अपूर्वं वैशिष्ट्यम् अस्य ग्रन्थस्य। इत्थं च न केवलं व्याकरण-क्षेत्रे एव स्वकीयरचना वैशिष्ट्यात् ग्रन्थोऽयम् अत्यन्तं महत्वपूर्णः अपि तु समग्रेऽपि संस्कृत-साहित्ये महत्वपूर्ण इति बोध्यम्।

६. प्रथमतः रहस्योद्घाटनम्

एतादृशस्य महत्वपूर्णस्य अस्य ग्रन्थस्य (लघुनः शब्दरत्नस्य) कर्तृत्व-विषये विद्यमानस्य अस्य रहस्यस्य-'यदयं न हरि दीक्षित-कर्तृकः किन्तु नागेशभट्ट-कर्तृक एव' इत्यस्य-प्रथमतः प्रकाश-नस्य कार्यं तु नागेशभट्टस्य प्रधानशिष्यस्य पायगुण्डेवैद्यनाथस्यैव। तेन गुरुमुखात् रहस्यमिदं जानता स्वकीयव्याख्यायां 'भावप्रकाशिका'-ख्यायां स्वगुरुचरणानां मान्यैरस्मद् गुरुचरणैः सह मतभेदं प्रदर्शयता प्रकटितोऽयं भेदः। किन्तु तेनापि न क्वचिदपि स्फुटमुक्तं यदयं ग्रन्थो नागेशभट्टकृत एव, किन्तु [4]व्यङ्ग्यमर्यादयैव सूचितोऽयमर्थः मतभेदादिप्रदर्शनमुखेन तेन।

---

१. द्र०—प्रौ० म० श० र० [ख] परिशिष्ट-३, पृ०-३१०

२. एतदपि पूर्वप्रदर्शितपादटिप्पण्योः (३०-३१) मध्ये प्रदर्शित स्थलयोः प्रकटखण्डनम-भ्युपगम्यैव। वस्तुतः न तत् प्रकट-खण्डनम् इत्युक्तं पूर्वम्।

३. एतदुदाहरणम् (मन्मतेन) 'अन्तरङ्गं बलीय' इति पृथक् परिभाषा विषये-'पूर्वा तु अन्तरङ्ग बहिरङ्गयोर्युगपत्प्राप्तावेवेति भावः' प्रौ. म. श. र. (क) पृ. १२१ इति बोध्यम्।

४. एतेनापि नागेशभट्टस्य 'लघुनः' शब्दरत्नस्य स्वकर्तृकत्वप्रकाशनम् अनभिप्रेतम् इति बोध्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किंच 'लघुनः' 'शब्दरत्न'-ग्रन्थस्य विषये नागेशभट्टेन यत्किमपि [1]मङ्गलाचरणादिः कर्तव्यम् आसीत् तत्सर्वं पायगुण्डे-वैद्यनाथेनैव सूचितम् 'भावप्रकाशिका'या मङ्गलश्लोकेषु [2]द्वितीयश्लोकेन। किं च ग्रन्थस्यास्य 'नामकरण'-विषयेऽपि प्रकटितः कश्चन अभिप्राय-विशेषस्तेन। अतः तद्विषयेऽपि किञ्चिद्विमृश्यते अत्र।

७ 'नामकरण'-विषये विवादः

'हरि दीक्षित'-कर्तृकस्य शब्दरत्नस्य नामकरणविषये [3]यथायं विवादः तत्संपादकाभ्याम् उपस्थापितः किं तस्य नाम 'बृहच्छब्दरत्नः उत शब्दरत्नः' इति। तथैव 'नागेश भट्ट'-कर्तृकस्य शब्दरत्नस्य नामकरणविषयेऽपि विवादोऽयं स्वशिरः उत्थापयितुं वाञ्छति यदयं 'शब्दरत्नः उत लघु-शब्दरत्नः' इति।

तत्र प्रथमस्य कृते 'बृहच्छब्दरत्न' इति नाम स्वीकुर्वद्भिरपि डा० सीताराम-शास्त्रिभिः तस्य ग्रंथस्य ग्रन्थकृत्कृतं नाम [4]'शब्दरत्न' इत्येव इति मतं प्रकटितम्। किन्तु श्री वे० के० जोशी महोदयैः केवलं [5]'शब्दरत्न' इत्येव नाम अभ्युपगतम्। तन्मतेन अस्य कारणं तु 'बृहच्छब्द रत्न'-शब्दः नागेशभट्ट कृतस्य लघुशब्दरत्नस्य प्रतिद्वंद्वितया पश्चात् प्रसिद्धिमागतः। अतएव नागेशभट्टेनापि हरि दीक्षित-ग्रंथस्यार्थे 'शब्दरत्न'-शब्द एव प्रयुक्तः न 'बृहच्छब्दरत्न'-शब्दः।

किन्तु एवमेव हरि दीक्षित-कृतस्य ग्रंथस्यार्थे 'बृहच्छब्दरत्न'-शब्दस्य प्रसिद्धत्वेन पश्चात् केवलं 'शब्दरत्न'-शब्दः नागेशभट्ट-कृतस्य लघुनः शब्दरत्नस्य कृते एव रूढ़िमागतः इत्यपि विचारणीयं तथ्यम्। तेन बहु कालं यावत् 'शब्दरत्न'-शब्दस्य लघुनि शब्दरत्ने प्रयोगात् [6]अयं भ्रमः विद्वत्सु दृढमूलः संजातः यत् 'शब्दरत्न-नामकः कश्चन एक एव ग्रंथः नापरः कश्चन 'बृहच्छब्द रत्न' इति। किम्बहुना अद्यापि प्रायः नागेशभट्ट-कृतस्य लघुनः शब्दरत्नस्य कृते एव

---

१. अत्र पूर्वोक्तः [३.(१)—(७)] हेतवोऽनुसंधेयाः।

२. शेषालङ्कारकं दुर्गारमोमा-कान्तया युतम्।
गुरुं नत्वा श्रेये वद्धशब्दरत्नेन्दुशेखरम्॥

भा० प्र० म० श्लो० २

तृतीयोऽपि अनेनैव एकान्वयः—

भावप्रकाशिकां व्याख्यां कर्तुं वाल दयान्विनः।
पायगुण्डेत्युपाख्यानो वैद्यनाथो यथामति॥

भा० प्र०, मं० श्लो० ३

३. द्र०—(i) प्रौ. म. बृ. श. र., प्रास्ताविकम्, पृ. २३
(ii) प्रौ. म. श. र. [ख] प्रस्तावना, पृ १०५

४. द्र०—प्रौ. म. बृ. श. र., प्रास्ताविकम् पृ. २३

५. द्र०—प्रौ. म. श. र. [ख] प्रस्तावना पृ. १०५

६. द्र०—प्रौ. म. बृ. श. र. प्रास्ताविकम् पृ. १८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'शब्दरत्न'-शब्दस्य प्रयोगो भवति न 'लघु शब्दरत्न'-शब्दस्य।

एवं एतद्ग्रन्थस्य विषये गुरुशिष्ययोः कर्तृत्वस्येव 'नामकरणविषयेऽपि विवादमालक्ष्य वयं रहस्यवेदिनं पायगुण्डे-वैद्यनाथमेव शरणीकरवाम इत्येत्र उचितम्।

८ अभिनवं नामकरणम्

विषयेऽस्मिन् पायगुण्डे-वैद्यनाथस्य मतं ज्ञातुं प्रयतिते मयि लब्धोऽयमत्र मया समाधिः यत् भाविनमिमं विवादं अनुमिमता तेन अस्य विवादस्य प्रशमायैव नूनं स्वगुरुविरचितस्य अस्य ग्रंथस्य (लघु-शब्दरत्ने ति प्रसिद्धस्य) कृते [1]अभिनवमेव किञ्चित् नाम सूचितम् इति।

प्रमाणं चात्र तेन स्वीय-भावप्रकाशिकायाः मङ्गल श्लोकेषु [2]द्वितीयश्लोके प्रयुक्तं 'बद्ध-शब्दरत्नेन्दुशेखरम्' इति विशेषणपदमेव। यद्यपि पद्यस्यास्य श्लेषगर्भतया पदमिदं बह्वर्थं बहूनां विशेषकं च तथापि संभवत्सु [3]नैक-पक्षेषु गुरु-ग्रन्थ पक्षयोः इदं ग्रन्थनामसूचकम्।

तथा च श्लेकोयम् एकान्वयेन तृतीय-श्लोकेन सह एवं पठ्यते—

"शेषालंकारकं दुर्गारमोमाकान्तया युतम्।
गुरुं नत्वा [4]श्रये बद्धशब्दरत्नेन्दु शेखरम्॥
भावप्रकाशिकां व्याख्यां कर्तुं बालदयान्वितः।
पायगुण्डेत्युपाख्यानो वैद्यनाथो यथामति॥" इति

अत्र 'नत्वा', 'श्रये' इति क्रियाबोधकपदद्वयस्य 'कं नत्वा ?', 'कं' श्रये ?' इति आकांक्षा-द्वयं संभवति। तत्र [5]'गुरुं नत्वा गुरुमेव श्रये' इति एका आकांक्षापूर्तिः अथवा [6]'गुरुं नत्वा ग्रंथं श्रये' इति अपरा आकांक्षापूर्तिः यदा, तदा गुरु-ग्रन्थपक्षौ संभवतः।

तत्र गुरुपक्षे 'शेषालंकारकम्' इत्यादि विशेषणत्रयं गुरोरेव। एवं च 'बद्ध शब्दरत्नेन्दु शेखरम्' इत्यस्य 'बद्धः शब्दरत्नेन्दुशेखरो येन' इत्यर्थात् 'शब्दरत्नेन्दु शेखरः' इति ग्रंथनाम सूचितं भवति। अत्र पक्षे [7]'शेषालंकारकोऽपि गुरुरेवः [8]"दुर्गारमोमा कान्ता'-युतोऽपि गुरुरेव

---

१. तच्च 'शब्दरत्नेन्दु शेखरः' इति अनुपदमेव स्फुटीभविष्यति।

२. द्र० पा० टि० ४४।

३. अथ 'गुरुं नत्वा' 'शेषालङ्कारकं श्रये' इति आकांक्षापूर्तौ 'शेषालङ्कार'-शब्दस्य विष्णु-शिवोभयबोधकतया विष्णु-शिव पक्षावपि अत्र संभवतः। एवं व्यत्यासोऽपि अत्र संभव-तीति नैके पक्षाः अत्र संभवन्तीति बोध्यम्।

४. क्वचिन् 'नत्वाऽऽश्रये' इत्यपि पाठः। द्र०—वृ. श. शे. प्रास्ताविकम्, पा. टि. पृ. ५१।

५. अत्र आवृत्या 'गुरुम्' इत्यस्य क्रियाद्वये अन्वयो बोध्यः।

६. अत्र 'ग्रन्थम्' इत्यस्य अध्याहारः।

७. शेषावतारस्य पतञ्जलेर्भाष्यस्य 'उद्योते' न अलंकरणात्।

८. 'दुर्गा' अथ च 'रमा' (विशेषेणपदे एते) 'उमा' (संभवतः नागेशभट्टपत्न्याः नाम) कान्ता, तया युतम्। **बृहच्छब्दरत्न संपादकैः 'दुर्गा-देवी' इति नागेशभट्टपत्न्याः नाम उक्तम् (बृ. श. शे, प्रास्ताविकस्थ, ५१ पृष्ठे) तत्र दृढतरं प्रमाणमन्वेषणीयम्।**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति बोध्यम्।

किन्तु पक्षोऽयं न मुख्य:, 'व्याख्यां कर्तुं श्रये' इत्यस्य अभिप्रेतत्वेन 'व्याख्येय ग्रन्थाकांक्षाया: पूरणस्यैव मुख्यतया, अत्र पक्षे तत्पूरणाभावात्। अत: द्वितीयपक्षे (ग्रन्थपक्षे) 'गुरुं नत्वा', 'शेषालंकारकं, दुर्गारमोमाकान्तया युतं, 'बद्धशब्दरत्नेन्दुशेखरं 'ग्रन्थं' व्याख्यां कर्तुं श्रये' इति ग्रन्थाध्याहारेणैवार्थो वाच्य:। तथा च 'बद्धशब्दरत्नेन्दु शेखरम्' इत्यस्य 'बद्ध: 'शब्दरत्न:' (हरि दीक्षितकर्तृको ग्रन्थ:) इन्दुरिव शेखरे यस्य' इत्यर्थ:। एवं च अत्रपक्षे व्याख्येयत्वेन आश्रयणीयो ग्रन्थ: 'शेषालंकारक:' 'दुर्गारमोमाकान्तया युत:' बद्धशब्दरत्नेन्दु शेखर'-श्च इति बोध्यम्। अत्रपक्षे अन्य पदार्थस्य प्राधान्येन शब्दमर्यादया 'शब्दरत्नेन्दुशेखर:' इति ग्रन्थनाम सूचितं न भवति, किन्तु अर्थतस्सूचितमेवेति वक्तुं शक्यम्।

अनयो: क: पक्ष उचित इति चेत् उभावपि समुचितावेव इति ब्रूम:। कथमिति चेत्, तत्र पूर्वोक्त-गुरुपक्षेऽपि "'शेषविभूषणम्' इत्यत्र पायगुण्डे-वैद्यनाथोक्त-रीत्यैव तद् गुणसंविज्ञान बहु-व्रीह्याश्रयणात् विशेषण-विशेष्ययोरुभयोरपि क्रियान्वयस्यौचित्येन "बद्ध: 'शब्दरत्नेन्दु शेखर:' येन तं गुरुम्" विशेषणीभूतं "शब्दरत्नेन्दुशेखरं" ग्रन्थं च श्रये-इत्यर्थलाभेन व्याख्येय ग्रन्थाकाङ्क्षाया श्चापि पूर्तिसंभवेन स पक्षोऽपि युक्त:। किं च 'बद्ध' पदस्वारस्येन 'बद्ध: शब्दरत्न: इन्दुरिव शेखरे यस्य' इत्यपेक्षया 'बद्ध: शब्दरत्नेन्दु शेखर: येन' इति तृतीयान्तेन विग्रहस्यैव न्याय्यत्वात् स एव पक्षो युक्त इति प्रतिभाति।

एवं ग्रन्थपक्षेऽपि 'लाघवात् 'बद्धश्चासौ शब्दरत्नेन्दु शेखरश्च' इति विग्रह एव सर्वथा उचित:। किंच अत्र विग्रहे 'ग्रन्थ'-इत्यस्य अध्याहारोऽपि न कार्य: इति महल्लाघवम्। तेन अत्र पक्षेऽपि शब्दमर्यादयैव 'शब्दरत्नेन्दु शेखर:' इति ग्रन्थनाम सूचितं भवति। किञ्च अत्र विग्रहे 'बद्ध' इत्यस्य 'गुरुणा निपुणं निबद्ध:' इत्यपरोऽपि व्यङ्ग्यार्थ: शब्दमर्यादयैव उपोद्बलक: अस्यार्थस्य इति बोध्यम्।

---

१. अत्र पायगुण्डे वैद्यनाथस्य ल. श. शे. व्याख्याया: 'चिदास्थिमालाया:' मङ्गलम् निदर्शनम्—

'नत्वा गुरुं वैद्यनाथ: पायगुण्डाख्यको वृत्तिम्।
चिदास्थिमालां तनुते लघुशब्देन्दुशेखरे॥'

२. अत्र 'परिभाषेन्दु शेखर' इत्यस्य 'परिभाषा इन्दुरिव शेखरे यस्य' इत्यर्थ: निदर्शनम्। द्र. भूमि पृ. ३

३. अयं पायगुण्डे वैद्यनाथेन व्याख्येयत्वेन आश्रयणीयो ग्रन्थ: स्वरचना वैशिष्ट्यात् अस्त्येव शेषालंकारक:। पतञ्जलि (शेष) परम्पराद्यम् अपूर्वत्वादस्य ग्रन्थस्य। किञ्च दुर्गा = कठिना रमा = प्रौढमनोरमा सैव उमा कान्ता, तया युतं = तस्य टीकारूपं 'शब्दरत्न:' (हरि दीक्षित कर्तृक:) आधारभूतत्वेन इन्दुरिव शेखरे युक्तो बद्धो यस्य तं नागेशभट्टकृतं (लघुं शब्दरत्नं) व्याख्यां कर्तुं व्याख्येयत्वेन श्रये इति वाच्यार्थ:।

४. द्र०-पा. टि.-२१।

५. निषाधस्थपति-न्यायेन।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्थं च व्यङ्ग्यमर्यादया व्याख्येय ग्रन्थस्य पक्षद्वयेऽपि 'शब्दरत्नेन्दु शेखरः' इति नाम सूचयता पायगुण्डे वैद्यनाथेन एतद्ग्रन्थ रचनाकुर्तुः रहस्योद्घाटनस्येव एतन्नामकरण विषयस्यापि रहस्योद्घाटनं विहितम् इति बोध्यम् ।

६ युक्तायुक्तत्व-विमर्शः

एवं नागेशभट्टेन स्वग्रन्थस्य स्वगुरुनाम्ना प्रकाशने अभिलषितेऽपि तत्प्रधान-शिष्येण पायगुण्डे-वैद्यनाथेन एतद्रहस्यस्य प्रकटीकरणात् तेनैव तद्ग्रन्थस्य 'वास्तविकं नाम' अपि संसूचितम् । परम्, एतद्रहस्य प्रकाशनं तेन गुरुसम्मत्या विहितम्, असम्मत्या वा इति तु 'निर्णेतुमशक्यम् । एवमेव तेन सूचितं 'शब्दरत्नेन्दु शेखरः' इति नामापि नागेशभट्टसम्मतं न वा इत्यपि वक्तुं न सुलभम् ।

किन्तु यदि वयं पायगुण्डे वैद्यनाथप्रामाण्यात् अस्य ग्रन्थस्य (लघुनः शब्दरत्नस्य) नागेशभट्टकर्तृकत्वम् अङ्गीकुर्मः तर्हि तुल्यन्यायात् तत्सूचितं नामापि अङ्गीकार्यमेव । अथ नागेशभट्टकर्तृत्वमस्य नाङ्गीक्रियते अस्तु लघुः शब्दरत्नः' इत्येव तस्य नाम यथाप्रसिद्धम् । किञ्च हरि दीक्षितकर्तृकत्वमेव तथा सति 'अङ्गीक्रियतां तस्य इत्येवास्मिन् विषये युक्तियुक्तं शक्यं वक्तुम् ।

वस्तुतस्तु युक्तमेव 'शब्दरत्नेन्दु शेखरः' इति नागेशभट्टकृतेः (लघु-शब्दरत्नेति प्रसिद्धस्य) नाम । कुत इति चेत् नागेशभट्टस्येयं शैली यदयम् एकस्यैव ग्रन्थस्य संस्करणत्रयं विदधाति, यथा-मञ्जूषा, लघुमञ्जूषा, परमलघुमञ्जूषा चेति । तथैव तस्य 'शेखर'-ग्रन्थस्यापि संस्करणत्रयेण भाव्यम् 'शब्देन्दु शेखरः, लघुशब्देन्दु-शेखरः; परमलघुशब्देन्दु शेखरश्चेति । तत्र परमलघुशब्देन्दु शेखर-स्थानीय एवायं तृतीयः शेखरः' प्रस्तुतो ग्रन्थः । किन्तु स्ववैदग्ध्यवशात् तेन अत्र 'शेखरे' 'शब्दरत्नो'ऽपि विमृष्टो विशेषेण इति युक्तमेवास्य 'शब्दरत्नेन्दु शेखर' इति नाम । किञ्चास्य शेखरद्वयापेक्षया महत्वपूर्णत्वेन' तौ तु शब्देन्दु शेखरावेव' अयं तु शब्दरत्नेन्दु-शेखरः' इति अत्रत्यो 'रत्न'-शब्दः अस्य महत्वसूचको ऽपि । एवं च अयमपि 'शेखर'-मालिकाया एव तृतीयं पुष्पं न तु 'रत्न'मालिकाया इत्येव उचितम् ।

किञ्च लघु-शब्दरत्नः इति नास्य नाम उचितम्, भिन्नकर्तृत्वेन 'शब्दरत्न-मालिकाया' अभावात् । किञ्च नायं 'शब्दरत्न'-ग्रन्थस्य लघु संस्करणं शब्देन्दु शेखरस्य लघुसंस्करणमिव लघुशब्देन्दुशेखरः, किन्तु व्याख्यानान्तरमेवेदं प्रौढमनोरमायाः । एवं च यथा 'सिद्धान्तकौमुद्याः' 'मनोरमोमार्द्धदेहं' व्याख्यानं 'शब्देन्दु शेखरः' तथैव 'प्रोढमनोरमायाः' 'शब्दरत्नार्द्धदेहं'

---

४. विपयेऽस्मिन् प्रमाणोपलम्भाभावात् ।

५. पूर्वप्रदर्शित-हेतुभिः (३. (१)-(७)) नागेशभट्टस्य अभिमत प्रकाशनात् वस्तुतः तत्कर्तृकत्वेऽपि ।

१. डा. सीताराम शास्त्रिभिः अस्य वृहच्छब्देन्दुशेखर इत्येव नाम समर्थितम् । किन्तु डा. क्षेत्रेशचन्द्र चट्टोपाध्याय महोदयैः 'शब्देन्दुशेखरः' इत्येव अङ्गीकृतम् । द्र.—बृ. श. शे. प्रास्ता पृ. १४ प्रास्ताविकश्लोकाश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याखयानं 'शब्दरत्नेन्दु शेखरः' इति वक्तुमुचितम् । इत्थं च अस्य ग्रन्थस्य नागेशभट्टकर्तृकाभ्यां शेखराभ्यामेव 'सादृश्यं, न हरि दीक्षितकर्तृकेन शब्दरत्नेन इति स्पष्टम् । सूचितश्चायमर्थः ग्रन्थ पक्षे 'दुर्गारमोमाकान्तया युतम्' इति वदता पायगुण्डे वैद्यनाथेन ।

१०. निष्कर्षः

तस्मात् पायगुण्डे-वैद्यनाथस्य प्रामाण्यात् [१]'लघु शब्दरत्नः' इति प्रसिद्धो ग्रन्थः यथा नागेश भट्ट-कर्तृकः तथैव तत्प्रामाण्यात् सः 'शब्दरत्नेन्दु शेखरो' ऽपि, नतु 'लघु-शब्दरत्नः' इति स्पष्टम् । किमधिकेन—

इत्थं नागेशभट्टस्य कृतेर्नाम सुनिश्चितम् ।
प्रमाणं वैद्यनाथोऽत्र स्वीकुर्वन्तु विपश्चितः ॥

इति शम् ।

---

१. अत्र बृ. शे. र. संपादकस्य विवेचनम् अवधेयम्-बृहच्छब्देन्दुशेखरादुद्धृतेभ्य एवं कतिचिद् भागेभ्यो लघुशब्देन्दुशेखरस्य कतिचिद् भागेभ्यश्च लघुशब्दरत्नस्य निर्माणं नागेशभट्टेन सम्पादितमित्यपि केचन तत्त्वविदो वदन्ति ।'-प्रौ. म. बृ. श. प्रास्ता. पृ. ३१

उ.—पाठसाम्यमपि, तदेव पृ. ३१-३३

उ.—निष्कर्षोऽपि—

'एवमन्यत्रापि सर्वत्र एवमेव पूर्णं साम्यं बृहच्छब्देन्दुशेखर-लघु शब्दरत्नयोः पदे पदे दृष्टिपथमुपयाति…। तदेव-पृ ३३

२. एतदर्थं 'लघु-शब्दरत्नः' 'लघुशब्दरत्नम्' इति उभयस्य युक्तत्वं स्वीकृतं 'शब्दरत्न'-संपादकैः । तदनुरोधेनैव अत्र क्वचित् 'लघुनः' 'शब्दरत्नस्य' लघुनि' 'शब्दरत्ने' इति, क्वचिच्च 'लघुः' 'शब्दरत्नः' इति प्रयोग कृतः । तेन न परस्पर विरोधः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहायक ग्रन्थाः

संकेताः	ग्रन्थनामानि	प्रकाशनम्
१. प्रौ० म० श० र०	प्रौढ मनोरमा-शब्दरत्न तत्वादर्श-व्याख्या	कमल पुस्तकमाला प्रथम प्रसूनम् वाराणसी
२. प्रौ० म० श० र० (क)	प्रौढ मनोरमा (लघु) शब्दरत्न-भैरवी भावप्रकाश-सरला युता	काशी संस्कृत सिरीज १२५ वाराणसी
३. प्रौ० म० श. र. (ख)	Praudha Manorama with commentary Shabdaratna	Deccan College Monograph Series-31
४. प्रौ० म० बृ० श० र०	प्रौढ मनोरमा बृहच्छब्द रत्नः लघुशब्दरत्नश्च	हिन्दूविश्व विद्यालयीय नेपालराज्य संस्कृत ग्रंथमालाया अष्टम कुसुमम्
५. बृ० श० शे०	बृहच्छब्देन्दु शेखरः	सरस्वती भवन ग्रंथमाला ८७
६. ल० श० शे०	लघुशब्देन्दु शेखरः (षट्टीकोपेतः)	राजस्थान संस्कृत कालेज ग्रन्थमालाया चतुर्दश कुसुमम्
७. प० शे०	परिभाषेन्दु शेखरः (मराठी भाषांतर)	न्या. भू. वाडेगांवकर द्वारा प्रकाशितं, नागपुर
८. (प० शे०) भूति	परिभाषेन्दु शेखर तत्वप्रकाशिका-भूति भूषितः	वासुदेवशास्त्री पटवर्धन द्वारा प्रकाशितः वाराणसी
९. भा० प्र०	भाव-प्रकाशिका (ल० श० र० व्याख्या)	काशी संस्कृत सिरीज १२५
१०. चि० मा०	चिदस्थिमाला (ल० श० शे० व्याख्या)	राजस्थान संस्कृत कालेज ग्रंथमाला चतुर्दशं कुसुमम्
११. ल० म०	वैयाकरण सिद्धान्त लघु मंजूषा	काशी संस्कृत ग्रंथमाला १६३

लघु संकेताः

१. द्र०	द्रष्टव्यम्
२. प्रस्ता०	प्रस्तावना
३. प्रास्ता०	प्रास्ताविकम्
४. पृ०-	पृष्ठम्
५. मं० श्लो०	मङ्गल श्लोकः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुस्तक-विमर्शनम्

संस्कृतवर्णानां स्वरूपं समुत्पत्तिश्च

● डॉ० लडुकेश्वर शतपथी शर्मा

बहुमार्गप्रसृतानां शास्त्रीयाणां विचाराणां सूक्ष्मतमानां प्रायोगिकानुसन्धानानां चाधारेण निबद्धोऽयं सन्दर्भो नूनमेव स्वकीयेक्षेत्रेऽद्वितीयं स्थानमधिकरोति।

प्रथमपरिच्छेदे वाग्यन्त्रवागिन्द्रिययोर्भेदं विमृशता लिप्यक्षराभ्यां भिन्नस्य वर्णस्य संध्वनि-ध्वनिग्रामाख्यौ विज्ञानसम्मतौ च भेदौ सूक्ष्मं समीक्षमाणेन शतपथिशर्मणा वर्णस्य स्वरूपनिर्धारणे, नित्यत्वानित्यत्वप्रतिपादने, श्रोत्रग्राह्यत्वपरिशीलने च विविधदार्शनिक-विचाराः सयुक्ति समुपस्थापिताः।

द्वितीयपरिच्छेदे परादीनां चतसृणां वाचां वैशद्येन स्वरूप वर्णनम्, मध्यमावैखर्योरु-पांश्वादिक्रमिकाक्रमिक स्तरसप्तकनिरूपणम्, परा वाचोऽप्युत्पत्ति हेतु भूतानां कुण्डलिन्यादि-बिन्द्वन्तानां सप्तानां तत्त्वानां प्रदर्शनम्, परममूलभूतेभ्यः आत्म-प्रकृति-परमशिवादिभ्यः समुत्पन्नानां विविधशास्त्रे विविधं वर्ण्यमानानां वर्णोद्गमेऽन्तर्वर्तिनीनां विविधानां प्रक्रियाणां सृष्टिक्रम-संहार व्युत्क्रमप्रकाशनपूर्वकं सप्रौढि विवेचनं विहितम्, वर्णविषयका यावन्तो विचाराः प्राच्य पाश्चात्त्यध्वनिविज्ञानपरिसरे नैव समापतन्ति, वर्णस्वभाववर्णोद्गमप्रसङ्गे तावन्तो विचारा व्याकरण दर्शनस्य मीमांसा-साँख्य-वेदान्त-न्याय-वैशेषिक जैन बौद्ध दर्शनानां तन्त्र-शास्त्रस्य च मतामतप्रदर्शनपूर्वकमत्र ग्रन्थे समुपन्यस्ताः।

तृतीयचतुर्थपरिच्छेदयोर्वर्णभेदकतत्त्वं विविध व्याकरण-शिक्षा-प्रातिशाख्याधारेण तुलनात्मकरीत्या विमृशन्नयं ग्रन्थकारः पाश्चात्त्यध्वनितत्वसिद्धान्तमपि संयोज्य कमप्यपूर्वं समन्वयं प्रकटितवान्। शास्त्रीयविचाराणां प्रायोगिकानुसन्धानानां च सम्मेलनमत्र मणि-काञ्चनसंवलितशोभामादधाति। वायोर्गुणकर्मभेदाद्वर्णभेदं प्रतिजानानेनानेनाभ्यन्तरबाह्य प्रयत्नेषु वायोर्भेदकत्वं वैशद्येन सप्रौढि च प्रदर्शयता कापिनूतनैव दिक् परिगृहीता। वर्ण वर्णांश-निरूपणकोष्ठकम्, उच्चारणस्थान बाह्याभ्यन्तर प्रयत्नानां विविधमतप्रदर्शकानि च कोष्ठकानि कठोरसाधनामसाधारणप्रतिभां च प्रकाशयन्त्यस्य विद्वत्प्रवरस्य। एतानि तद्विषयकानुसन्धान-शालिनाम् अत्यन्तं साहाय्यकमाचरिष्यन्तीति नास्त्यत्र सन्देहः।

पञ्चमः परिच्छेदः केषांचिदपरिचितानां वर्णानां वर्णाभासानां वैदिकसंस्कृतसम्मतानां विविध वर्णमालानां च परिचायकः। अनुस्वारविसर्गयोर्वैज्ञानिकदार्शनिकतत्त्वप्रकटनवेलायां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तन्त्रशास्त्रीयविचारा अपि क्रोडीकृताः। एते सर्वतोमुखं शास्त्रप्रवेशं प्रथयन्ति विद्वत्प्रवरस्य शतपथिशर्मणः। नासिक्य-यम-स्वरभक्तिरङ्गाणामत्र परिच्छेदे वेदशास्त्रीय विचाराधारेण प्रदर्शितः ऊहापोहः सत्यमेव वैदिकवाङ्मये महान्तमभावं विदूरयतीति महतीयं समाश्वासना।

संस्कृत वाङ्मये पाश्चात्त्यध्वनिविज्ञानविचारोनैव वर्तते। पाश्चात्त्यध्वनिविज्ञाने च फुप्फुसात्पूर्वं वर्ण विषयको दार्शनिकस्तन्त्रशास्त्रविवेचितो विचारश्च नैवोपलभ्यते। एतदुभयं संयोज्य परिशील्य सङ्गमय्य चेदंप्रथमतया समर्पितमपूर्वसौरभाञ्चितमिदं ग्रन्थ पुष्प-मवतंसी कुर्बन्त्याः सुरसरस्वत्याः सुषमा सम्यगेव समेधिष्यते इत्यस्माकं विश्वासः। वेद-व्याकरण-शिक्षा-प्रातिशाख्य-भाषाविज्ञान-विविधदर्शन-तन्त्रशास्त्रेष्वेकैकमपि दुरवगाहम्। प्रेक्षावन्तोऽप्येषु भीतभीता भवन्ति। एतदब्धिसप्तकसलिलं सलीलमवगाहमानेन श्री लडुकेश्वरेण यानि रत्नानि निष्कासितानि, तानि दुर्लभान्येव सर्वेषाम्। को वा तदितर एवं विधं साहसमपि कर्तुं शक्नुयात्?

चित्र-रेखाचित्र-कोष्ठकानां तत्तत्स्थानेषु प्रदानम्, अस्मिन् सन्दर्भे व्यवहृतानां ग्रन्थानां, श्लोक श्लोकांशानां, कठिनपारिभाषिक शब्दानां च तत्तत्पृष्ठ संकेत सहिता सूची नूनमेव पाठकानां ग्रहणसौकर्याय कल्पिष्यते इति सानन्दमुत्पश्यामः।

व्याकरण-वेद-भाषाविज्ञानविषयेषूच्चतम-परीक्षापाठ्यरूपेण गृह्णन्तो विश्वविद्यालया-दयो ग्रन्थरत्नमिदं सम्मान्यावश्यमेवान्तेवासिनां प्रभूतमुपकारं साधयेयुरित्याशास्महे इति।

—डा हरिहर झा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एक दिन श्राद्ध द्वय निषेध निर्वाहः

● संपादकः—ना० पं०श्री देवनाथाचार्यः

हयास्यं दैवतं जीया दणणयार्यश्च देशिकः ।
ययोः प्रसादादभवत् सम्यग्ज्ञान विवेचनम् ॥
एकस्मिन्दिवसे प्राप्त श्राद्धयुग्म निषेधकम् ।
शास्त्रं सम्यङ्नयोपेतं कलयामि यथा मति ॥

अत्रतावदेकस्मिन् दिवसे दार्शिकसंक्रान्ति संमेलने श्राद्धद्वय मनुष्ठेयम् ? उत अन्यतरत् ? इति विप्रतिपत्तिः ।

तदर्थं; उक्तश्राद्धद्वयं—

"नैकश्श्राद्धद्वयं कुर्यात्समानेऽहनिकस्यचित् ।
न यज्ञं न बलिं नैव देवर्षिपितृ तर्पणम् ॥
श्राद्धं कृत्वातु तस्यैव पुन श्श्राद्धं न तद्दिने ।
नैमित्तिकन्तु कर्तव्यं निमित्तानुक्रमोदयम् ॥
श्राद्धं कृत्वा पुन श्श्राद्धं न कुर्यदिक वासरे ।
यदि नैमित्तिकं नस्यादेकोद्देश्यं भवेद्यदि ॥"

इति दक्ष जाबालि ऋतु वचन निषेध्यानु प्रविष्टम् ? उत न ? इति विप्रतिपत्तिः ।

अत्र केचित्—नानुप्रविष्टम् । तथाहि— पितृमेधसारे उक्तनिषेधशास्त्राभिप्रायेण,

"नैकश्श्राद्धद्वयं एकोद्देश्यकं एक वासरे कुर्यात् देवतैक्यात्"

इति सूत्रेण एक दिने श्राद्धद्वयं प्रतिषिध्य अनन्तरं—

"यथा नित्येन दार्शिकस्य, सोदकुंभेन मासिकस्य,
दार्शिकेन मन्वादि युगादि ग्रहण श्राद्धानां संनिपाते,
प्रसङ्गात्पूर्वसिद्धेः उत्तर दार्शिकादिश्राद्धमेवकुर्यात् ।
अनियतस्य बलीयस्त्वात्"

इति द्वितीय सूत्रेण निषेधशास्त्र विषयोपपादनदशायां संक्रान्ति घटित श्राद्धद्वयस्यानु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पात्तत्वेन, "अनियतस्य बलीयस्त्वात्" इत्यनेन नियतत्वानियतत्व रूप वैषम्ययुक्त व्यक्तिद्वय घटित द्वंद्वानामेवोक्त निषेधशास्त्र विषयत्व प्रतीत्या च, मासि मासितुल्यतया संभावित व्यक्ति-द्वयघटितोक्त द्वंद्वस्य पूर्वोक्त वैषम्यासंभवेन च उक्त द्वंद्वस्य निषेध शास्त्राविषयत्वमेव प्रतीयते ।

एतेन क्वचित् संक्रान्ति घटित पाठः द्वितीय सूत्रे दृश्यत इति संक्रान्ति घटितं श्राद्धद्वयं निषिद्धमिति प्रत्युक्तम् । तथा सति, नियतत्वानियतत्वाभ्यामेवान्यतराननुष्ठानानुष्ठानयोरुप-पादनीयतया, तत्र तदसंभवेन "अनियतस्य बलीयस्त्वात् इत्यस्यानन्वयप्रसङ्गेन तत्पाठस्या-शुद्धत्वात् ।

अत एव वैद्यनाथीये संक्रान्त्यघटितामेव पितृमेधसारपङ्क्तिं स्वोक्तार्थ संवादतयानूद्य, अनन्तरं सार्वभौमेन संक्रान्ति घटित द्वंद्वस्यानुपात्तत्वात् उक्तदक्षादि वचननिषिद्धत्वेन श्राद्धद्वया-नुष्ठानासंभवात् अन्यतरविशेषानुष्ठाननियामकतयाभिमत पूर्वोक्त नियतत्वानियतत्वा-संभवाच्च कथ मत्र निर्वाहः ? इत्याशंकांपरिजिहीर्षुणास्वाभिप्रायानुगुणः कश्चन निर्वाहः कृतः ।

तत्पाठस्य साधुत्वे, तत्सूत्रघटक द्वंद्वान्तरवदस्यापि सार्वभौमेन निर्धारितत्वेन एतद् द्वंद्वमात्रस्य स्वतन्त्रनिर्धारणमनावश्यकम् । एतद्द्वंद्वमात्रस्य तदुक्तिः स्वासंमतेति चेत्; तर्हि तत्र दूषणमुद्धाट्य निर्वाहान्तरं वक्तव्यम् । नहि तथा दृश्यते । अतस्तदघटितएव पाठः प्रामाणिक इति प्रतीयते ।

एवं कालादर्शेऽपि स्वीय कारिकया निषेधशास्त्रविषयः अपवाद शास्त्रविषयश्च प्रत्येकं दर्शितः ।

तत्र निषेधशास्त्र विषयाः पितृमेधसारोक्तरीत्या दर्शिताः । संक्रान्ति दार्शिक द्वंद्वमत्र निषेध विषयतया न प्रदर्शितम् । तत्संग्राहकतया आदिपदादिकञ्च न दृश्यते ।

किञ्च सुधीविलोचने, "यथा नित्येन दार्शिकस्य" इत्यादि द्वितीय सूत्रं, "निषेध नियम-माह नित्येने त्यादिना" इत्यवतारितम् । अत्र नियम शब्दस्य इतरव्यवच्छेदार्थकतयानिषेध योग्य श्राद्धद्वयस्यैव व्यवच्छेदनीयत्वेन उक्त संक्रान्ति घटित द्वंद्वस्यैव तादृशत्वेन एतद्व्यावर्तनायैव तथोक्तिरिति प्रतीत्या एतद् द्वंद्वस्य निषेधाविषयत्वंज्ञाप्यते ।

एवञ्च पितृमेधसार कालादर्श निर्णयसिंधुस्मृतिकौमुदीकर्तृभिरुक्तद्वंद्वस्य निषेध्यतया अनुक्तत्वेन निषेध निमित्तभूत नियतत्वानियतत्वासंभवेन च उक्त दक्षादि वचनानिषेध्य-त्व निर्णयापवाद शास्त्र बलात् नैमित्तिक द्वंद्ववत् एक देवतोद्देश्यमपि स्वस्वशास्त्र बलात् संक्रान्ति दार्शिक संनिपाते श्राद्धद्वयमप्यनुष्ठेयमेवेतिवदन्ति ।

अन्येतु, उक्त स्थले अन्यतरदेवानुष्ठेयम्-नद्वयम् । तथाहि—

"नैकश्श्राद्धद्वयं कुर्यात्समानेऽहनि कस्यचित् ।"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादि निषेध वचनानि अत्रापि प्रवर्तन्त एव। शब्दशक्तेरसंकोचनीयत्वात्। ननु तर्हि नैमित्तिक श्राद्धद्वये भिन्नोद्देश्यक श्राद्धद्वये च कुतस्तानि वचनानि न प्रवर्तन्त इति चेत्; न। "यदि नैमित्तिकं न स्यात्" इति पर्युदासेन, "**नैमित्तिकन्तु कर्तव्यम्**" "**द्वे बहूनि**" इत्यादि विधानेन च, "नैकश्श्राद्धद्वयं कुर्यात्" इत्यनेन च तद्विषये पूर्वोक्त दक्षादि वचनानां संकोचनीयत्वेन तत्र निषेध शास्त्राप्रवृत्तेः।

न चात्रापि निषेध शास्त्र विषयोपपादन दशायां ग्रंथकारानुपादानेन तत्रापेक्षित नियतत्वानियतत्वस्यात्रासंभवेन च पूर्वोक्त निषेधवचनानां संकोचः कार्यः इति वाच्यम्; केवल निबंधनवाक्य मात्रस्य-केवल युक्ति मात्रस्य च आर्ष वचनासंकोचकत्वात्। नैमित्तिक-द्वय विषये-निमित्तोद्देश्यक द्वंद्वविषये च,

"**नैमित्तिकन्तु कर्तव्यम्**" "यदि नैमित्तिकं न स्यात्" इति,

"**एकोद्देश्यं भवेद्यदि**" इत्याद्यानाञ्च वचनानां नैमित्तिकादि व्यतिरिक्त विषयत्वं युक्तमेव।

किञ्च, निबंधनकार वाक्यमपि तादृश निषेध वचन संकोचकं न किञ्चिद् दृश्यते। सर्वेषामेव निबंधन वाक्यानां उक्त वचनाविरुद्धार्थकत्वात्।

यद्यपि उक्त वचन निषेध विषयोपपादकेन "दार्शिकेन" इत्यादि पितृमेधसार सूत्रेण दार्शिक संक्रान्ति घटितद्वंद्वं नोपात्तमित्युच्यते, तथापि कण्ठोक्त्यभावेऽपि "एवमन्यत्राप्यूहनीय" मिति वाक्यस्य आदि शब्दपर्यायतया श्रूयमाणत्वेन एतदपि प्रदर्शित प्रायमेवेति वक्तुं युक्तम्

ननु पूर्वोक्त युक्ति परामर्शक "एवं" शब्दघटितस्य "अन्यत्राप्यूहनीय" मिति वाक्यस्य, नियतत्वानियतत्वमादायैव अन्यत्रापि अन्यतरानुष्ठान निर्णयः कार्यः इति प्रतीत्या अत्र तदसंभवेन कथं संक्रान्ति घटित द्वंद्वे निषेध शास्त्र प्रवृत्तिः ग्रंथ कृदभिप्रेता इति वक्तुंशक्यत इति चेत्; न। नियतत्वानियतत्वे नोक्त वचनाभिप्रेते। उदाहृत वचन त्रयेऽपि तद्बोधक पदा-श्रवणात्। किन्तु एक दिन मिलितैकोद्देश्यक श्राद्धद्वित्वमेव निषेधोद्देश्यतावच्छेदकतया-भिप्रेतम्। एवञ्च निषेध शास्त्रस्य सजातीयापवाद प्रमाणाविषयी भूत स्वोद्देश्यतावच्छेद-काश्रय सामान्ये प्रवृत्ति स्वाभाव्यात्, उक्त श्राद्धद्वयस्यापि स्वोद्देश्यतावच्छेदकीभूतैकदिन मिलित श्राद्धद्वित्वाश्रय सामान्यान्तर्गततया तत्र उक्त निषेध वचनप्रवृत्तिर्निराबाधैव।

अत्र यदुक्तं-"निषेध नियम माह" इति, "यथा-दार्शिकेन' इत्यादि पितृमेधसार द्वितीय सूत्रावतरणिकाग्रंथेन नियम शब्दस्य व्यवस्थापरतया द्वितीय सूत्र कण्ठोक्तव्यतिरिक्तानामुक्त निषेध शास्त्र विषयतया प्रसक्तानां व्यावर्तनार्थं द्वितीय सूत्रारंभ इति प्रतीत्या, उक्तसंक्रान्ति-घटित द्वंद्वस्यापि तथात्वेन उक्तवचनानिषेध्यत्वं प्रतीयत इति; तदपि न। यतः बहुषुकोशेषु "निषेध विषय माह" इत्येवावतरणिका दृश्यत इति। नियमघटित पाठ स्वीकारेऽपि अत्रत्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नियमशब्दः नोक्तसंक्रान्ति घटित द्वंद्व व्यवच्छेदाभिप्रायः। एतद् द्वंद्व व्यवच्छेदस्य मूल प्रमाण-मन्तरा ग्रंथ कर्त्रा स्वातन्त्र्येण व्यवस्थापयितुमशकयत्वात्। किन्तु अपवादक शास्त्र विषयीभूत नैमिक्तिक द्वंद्वानेकोद्देश्यक द्वंद्वव्यवच्छेदाभिप्रायः।

एवञ्चोक्त संक्रान्ति घटित द्वंद्वस्यापवादक शास्त्राविषयत्वेन, एवमन्यत्रापीतिवाक्य-घटित-द्वितीय सूत्राभिप्रेतत्वेन च निषेध शास्त्राविषयत्व प्रतीति गंधोऽपि उक्तावतरणिकया न प्रतीयत इति। तर्हि निषेधोपपादन दशायां नियतत्वानियतत्वे आदाय ग्रंथकृतामुपपादनं कथं संगच्छत इतिचेदयमाशयः।

"नैकश्श्राद्धद्वयं कुर्यात्समानेऽहनि कस्यचित्" इति वचनेन एक दिने एकोद्देश्यक श्राद्धद्वय निषेधः कण्ठोक्तः। अन्यतरानुष्ठानाभ्यनुज्ञा अर्थ सिद्धा। एवं,

"श्राद्धं कृत्वातु तस्यैव पुनश्श्राद्धं न तद्दिने।"

इति वचनेन,

"श्राद्धं कृत्वा पुनश्श्राद्धं न कुर्यादेकवासरे।"

इति वचनेन च अनुवादतो विधितश्च उभयमपि कण्ठोक्तम्। तथाच एक दिने नैमित्तिक व्यतिरिक्त एकोद्देश्यक श्राद्धसंमेलने श्राद्धद्वयंनानुष्ठेयम्। अन्यतरदेवानुष्ठेयमिति निर्धारणमात्रमुक्तवचनत्रयेण फलितम्। नत्वनुष्ठेय व्यक्ति विशेषनिर्धारणम्। तन्निर्धारण-ञ्चानुष्ठानार्थ मपेक्षितम्। तच्च प्रामाणिकयुक्त्यैव संगमनीय मिति मत्वा प्रदर्शनार्थं कतिपय-निषेध्य द्वंद्वानि कण्ठत आदाय तत्रोपात्तव्यक्तीनामनुयायितया संभावितानियतत्व नियतत्वे अनुष्ठानाननुष्ठानयो र्नियामक तयोपन्यस्ते। एतदनुक्तानामपि सूचनार्थं मितिद्योतनाय, "एव-मन्यत्राप्यूहनीय" मित्युक्तम्।

अयमत्राभिप्रायः—

पूर्वोक्तगमकतुल्यगमकान्तरेणानुष्ठेय व्यक्ति विशेष निर्धारणं कार्य मिति। ननु उक्त रीत्या नियतत्वानियतत्वाभ्यामेव सर्वत्रोपपादनीयम्। अन्यत्राशक्योपपादनत्वात्। ननु तर्हि एतावता उक्त घटित द्वंद्वं निषिद्धम्। एवं तत्र अन्यतरदेवानुष्ठेय मिति फलितम्। एव-मपि उक्त द्वंद्वघटकस्य कस्याप्यनियतत्वासंभवेन-गमकान्तरस्य दुर्लभत्वेन च कथमत्र निर्धा-रणमितिचेत्; अत्र वहवो बहुधा वदन्ति।

तथाहि—अत्र विनिगमकमेव दुर्लभमित्यभिप्रेत्य उभयानुष्ठानस्य निषिद्धत्वेन अन्य-तरानुष्ठानस्यावश्यकत्वेन च यथा रुचि अन्यतरदनुष्ठेयमिति स्मृति मुक्ता फलग्रंथकृदभिप्रायः।

नित्यनैमित्तिकयोर्नैमित्तिकं बलीय इति सर्वसंप्रतिपन्नतया, संक्रान्ते नैमित्तिक गण-पठितत्वस्य वचनान्तर सिद्धत्वेन च संक्रान्ति श्राद्धमेवानुष्ठेयमिति केषाञ्चिदभिप्रायः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्ये तु, अन्यविधमप्यनियतत्वमिच्छन्ति । कथम् ? दार्शिकस्य कुतपकालमात्र नियतत्वेन तस्य नियतत्वम् । संक्रान्तेस्तु कालानियमेन संभावितत्तया अनियतत्वमेवेति, "अनियतस्य बलीयस्त्वादिति न्यायेन संक्रान्तिश्राद्धमेवानुष्ठेयमिति । अतएव क्वचित् युगपत् श्राद्धद्वयानुष्ठानप्राप्तिस्थले संक्रान्तेर नियतत्वमेव पूर्वानुष्ठाननियामकतया उक्तमिति ।

एवं— ' श्राद्धं कृत्वातु तस्यैव पुनश्श्राद्धंन तद्दिने ।"
"श्राद्धं कृत्वापुनश्श्राद्धं नकुर्यादेकवासरे ।"

इति वचनव्यवत्या, यस्य श्राद्धस्य प्रथमतः स्वनिमित्तकाललाभः तदानीं तदनुष्ठाने बाधकाप्रतीतेः तत्र तदेवानुष्ठेयम् । तदनन्तर प्राप्त श्राद्धानुष्ठानस्य निषेध शास्त्र बद्धत्वेन न प्राप्तिरिति । एवं यस्मिन्दिने दार्शिक संक्रान्तिमेलनं, तद्दिने कुतपात्पूर्वञ्चेत्संक्रमणं तदा संक्रमण-श्राद्धमेवानुष्ठेयम् । कुतपात्परञ्चेत्संक्रमणं, तदा दार्शिकमेव पूर्वोक्त रीत्या अनुष्ठेयम् । न त्वनन्तरप्राप्तसंक्रमण श्राद्धम् । "श्राद्धं कृत्वा पुनश्श्राद्ध" मिति निषेध शास्त्र बद्धत्वात् । यदि च कुतपकाल एव उभयोर्मेलनं क्वचित्संभवति, तदा ऐच्छिकमेवान्यतरानुष्ठानम् । इत्यपि केचित् ।

अन्येतु पितृमेधसारे उक्तस्य "नित्येन दार्शिकस्य" इत्यादि सूत्रघटक द्वंद्वानां यादृश नियतत्वानियतत्वोपपादनेन अनुष्ठान निर्धारणं क्रियते, तादृशमादायैव अन्यत्राप्युपपादनं युक्तम् । "एवमन्यत्रापि" इतिग्रंथ स्वारस्यात् । संभवति च तथा । तथाहि—

तत्र दार्शिकादीनामनियतत्वञ्चाल्प कालानुष्ठेयत्वम् । नित्यादीनां नियतत्वञ्च अधिक कालाद्यनुष्ठेयत्वम् । इदञ्च परस्पर सापेक्षम् । एवञ्च दार्शिकाद्यपेक्षया नित्यस्य नियतत्वञ्च दार्शिकानुष्ठानार्ह दिनत्व व्यापक स्वानुष्ठानार्हं दिनत्वकत्वे सति दार्शिकानुष्ठानानर्हयत्किञ्चिद्दिनानुष्ठेयत्वम् । एवं दार्शिकादीनां नित्याद्यपेक्षया अनियतत्वञ्च,नित्याद्यनुष्ठानार्ह दिनत्व व्याप्य स्वानुष्ठानार्हदिनत्वकत्वे सति नित्यानुष्ठानार्हयत्किञ्चिद्दिनानुष्ठेयत्वमिति पर्यवसितम् ।

अतः परं पञ्चसु पंक्तिषु अक्षराणि न सन्ति मातृकायाम्

तच्च प्रकृत दार्शिक संक्रमणयोरपि तादृशनियतत्वानियतत्वे संभवतः । तथाहि, प्रतिमाससंक्रमण श्राद्धस्य दार्शिकवत् संभवेऽपि मेष संक्रान्ति श्राद्धापेक्षया वृषभसंक्रान्ति श्राद्धं विजातीयम् । एवं वृषभ संक्रमण श्राद्धापेक्षया मिथुन संक्रमण श्राद्धं विजातीयमेव । एवमुत्तरत्राप्यङ्गीकार्यम् । मेष संक्रान्ति श्राद्धत्व वृषभसंक्रान्ति श्राद्धत्वरूप संकल्पोद्देश्यतावच्छेदक भेदस्य प्रमाणप्राप्तत्वात् । तत्तदनुष्ठानकाले शिष्टैस्सर्वैरपि संकल्पे तथैवानुसंधयीमानत्वाच्च । न चैवं दार्शिकस्यापि मेषमासदार्शिकत्व वृषभमास दार्शिकत्वादि भेदक धर्मसंभवेन परस्परविजातीयत्वस्य संभावितत्तया तुल्यत्वमेवेति तदपेक्षया नानियतत्वं संक्रान्ति श्राद्धस्येतिवाच्यम् ; यथा संक्रान्ति श्राद्धानुष्ठाने प्रतिमाससंकल्प विषयतावच्छेदक भेदः, तद्वत् दार्शिके प्रतिमास संकल्प विषयतावच्छेदक भेदक प्रमाणाभावात् । सर्वैरपि शिष्टैः प्रतिमासं "दर्शश्राद्धं करिष्ये" इत्येकरूपेणैव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संकल्पस्यानुसंधीयमानत्वाच्च। अतस्संक्रान्तेर्दार्शिकापेक्षया अनियतत्वं संभवत्येवेति एक दिने मेलने संक्रान्ति श्राद्धमेवानुष्ठेय मित्यपिवदन्ति।

एतेषु पक्षेषु यथारुचि कञ्चित्पक्षमवलंब्य उक्तस्थले अन्यतरदेवानुष्ठेयमिति सिद्धम्।

यदप्यत्र कैश्चिदाचारनवनीतग्रंथानुसारिभिरुक्तं उक्तश्राद्धद्वयनिषेध वचनानि एक कालावच्छेदेन श्राद्धद्वयानुष्ठान प्रसक्ति विषयाणि। नत्वेकदिने कालभेदेनानुष्ठान विषयाणि। अन्यथा तन्त्रवत् अन्यतरानुष्ठानेन तदन्यान्यतरानुष्ठान चारितार्थ्योपपादनासंभवात्। एवञ्चोक्तस्थले यदा कुतप काले संक्रान्ति दार्शिकमेलनं तदैव निषेध शास्त्र प्रवृत्तिः। नत्वेकदिने कालभेदेन प्रसक्तावपीति। इदञ्चापाततः।

अत्र पंक्तिद्वयं अक्षरहीनम् मातृकायाम्

इति दार्शिक संक्रान्ति मेलने निर्णयः कृतः।
बुभुत्सुभिः परिग्राह्यः स्वस्वानुष्ठान सिद्धये॥

श्रीमदण्णयार्य महादेशिकाय नमः

अवधेयम् :-"इदञ्चापाततः" इति प्रतिज्ञामात्रं मातृकायामुपलभ्यते। नतु हेतूपन्यासः। किमत्र कारणमिति न ज्ञायते। पूर्वमेवोदाहृतानि "नैकश्श्राद्धद्वयं कुर्यात्" इत्यादीनि प्रमाणवचनान्येवात्र पर्याप्तानीति ग्रंथकर्तुः तात्पर्यंस्यादित्यभ्यूह्यते। तन्त्र न्यायोपन्यासश्च विपरीत फलप्रदस्स्यादिति च।

(संपादकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जप्य गायत्री स्वरवर्णोच्चारण नियमः

संपादकः—**ना० श्री देवनाथाचार्यः**

हय ग्रीव महं वन्दे मदाचार्याधिदैवतम् ।
यत्प्रसादान्ममा ज्ञानं सुदूरम भवत्स्वयम् ॥

इह खलु जप काल गायत्री स्वर वर्णोच्चारणविषये किञ्चिन्निरूप्यते ।

मन्त्र घटकीभूत वरेण्य पदं जपकाले विरलमेवोच्चारणीयमिति स्मर्यते । तत्र निबंधकारोदाहृत स्मृति वचनानि—

विश्वामित्रः

"वरेण्यं विरलं जप्यं जप काले विशेषतः ।
पारायणेतु युक्तं स्या दन्यथा निष्फलं भवेत् ॥
वरेणियं जपे प्रोक्तं वरेण्यं वेद पाठके ।
सयाति नरकं घोरं वरेण्य मिति यो जपेत् ॥"

एवम्;

जपे पारायणे चैव विरलं युक्तमेव च ।
क्रमेण प्रजपेन्मन्त्र मन्यथा निष्फलं भवेत् ॥"

इति । अतः जपकाले विरलोच्चारणमेव प्राप्तमित्यत्र न विवादः ।

अनुष्ठानमपि सर्वत्र विरलोच्चारणपूर्वकं दृश्यते । परभूत प्रमाणानुरोधेन जपे विरलस्य प्राप्तत्वेऽपि संयुक्त "णकार" "यकार" योः विरलोच्चारणे, "ण्य" मित्येवोच्चार्यतया, "णिय" मिति इकारान्त णकारोच्चारणं सर्वानुष्ठान सिद्धं कथं संगच्छते ? इति केचिदाक्षिपन्ति ।

तत्रेदं समाधानम्—

"त्रिपदा गायत्री" "चतुर्विंशत्यक्षरा गायत्री"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति पदाक्षर व्यवस्था श्रूयते। तत्र एकैकपदस्याक्षराणि अष्टावष्टाविति व्यवस्थया पदत्रयमिलित समुदायघटकाक्षरसंख्या "चतुर्विंशतिः" इति वक्तव्यम्। चतुर्विंशत्यक्षरत्वं एकैकाजन्तैकैक हलां गणनयैव भविष्यतीति तदनुरोधेन तद्घटकी भूत णकारस्य इकारान्ताजन्तत्वोपपत्तिः। अन्यथा णकारस्या जन्त त्वाभावेन गणनानर्हत्वात् गायत्र्याः चतुर्विंशत्यक्षरत्वानुपपत्तिः।

ननु इतराक्षराणां अजन्तानां ग्रहणेऽपि चतुर्विंशति संख्या न्यथानुपपत्त्या हल्मात्रस्य णकारस्य ग्रहणमिति चेन्न—उत्तरपदयोरजन्तानामेव ग्रहणम्, प्रथम पदेऽपि इतराक्षराणां तथैव, तत्र णकारमात्रस्य केवल हल्मात्रस्य ग्रहणमित्यत्र नियामकाभावात्। वैरूप्यापत्तेश्च।

किञ्च केवल हलोऽपि संख्या घटने गायत्र्यन्ततः श्रूयमाण तकारस्यापि गणना वश्यकत्वेन पञ्चविंशत्यक्षरत्वापत्तिः।

एवं गायत्रीघटकाज्झलां सर्वेषामेवोक्तरीत्या संख्याघटनापत्त्या अधिकसंख्यापत्तिः।

किञ्च, केवल हलामपि अक्षरसंख्या घटने अन्यत्र श्रूयमाण छान्दस प्रक्रियाया विरोधः। तथाहि—

"आश्रावयेति चतुरक्षर मस्तु श्रौ षडिति चतुरक्षरं यजेतिद्वयक्षरं येयजामह इति पञ्चाक्षरं द्वयक्षरो वषट्कारः" इति श्रूयते। तत्र "अस्तु श्रौ षडिति चतु रक्षरं" "द्वयक्षरो वषट्कारः", इति चोपपादनासंगतिः। तथा सति, "अस्तु श्रौ षडिति पञ्चाक्षरं" "त्र्यक्षरो वषट् कारः" इत्येव श्रूयेत। अतः श्रौत प्रक्रियायाः सर्वत्राजन्तानामेवाक्षराणां संख्यागणना घटकत्वमावश्यकम्।

अतएव प्रातिशाख्ये वाक्योत्पत्ति हेतुभूत सप्तस्थानोपपादनाय प्रवृत्तोपांशुध्वानननिनदोपब्दिमन्मन्द्र मध्यमताराणि" इति सूत्रप्रतिपाद्य सप्तवाक्प्रयोगस्थानेषु द्वितीयस्थानभूत ध्वान लक्षणोपपादनदशायां, "अक्षरव्यञ्जनानामनुपलब्धि र्ध्वान" इति सूत्रे "अक्षरव्यञ्जनाना" मितिपृथक् निर्देशः कृतः। तत्रहि त्वदुक्तरीत्या अक्षरशब्देनैव केवलव्यञ्जनानामपि ग्रहणसंभवे, पृथङ्निर्देशवैयर्थ्यापत्तिः। एतदभिप्रेत्यैव स्वरसिद्धान्तचन्द्रिकायां "**अजन्तानामेवाक्षरत्वम्। न तु केवलहलाम्।**" इति निर्णीतम्। तस्मात् अजन्तानामेवहलामक्षरसंख्या परिगणनमिति, तदनुरोधेन प्रकृते णकारस्य इकारान्ततयैव जपकाले उच्चारणं युक्तमेवेति।

ननु तथाप्युक्तणकारस्याजन्तत्वावश्यकत्वेऽपि विनिगमनाविरहात् प्रथमोपस्थितत्वाच्च अकारान्तोच्चारणमेव स्यात् इति चेत्; उच्यते। श्रुतौतावत् यत्र संयुक्तस्थले यकारवकारयोः अजव्यवहितपूर्वावयवत्वं श्रूयते, तस्यैव विरलोच्चारणे प्राप्ते, संयुक्तपूर्वावयवहलः इकारान्ततया उकारान्ततया च उच्चारणनियमः अनुभवसिद्धः। यथा—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"भूर्भुवस्स्वः" "भूर्भुवस्सुवः"
"वयन्नोदास्यथेति" कियद्वोदास्यामः" इति च ।

अतः प्रकृते णकारयकारघटित संयुक्तपूर्वावयवत्वाण्णकारस्य इकारान्ततयैवोच्चारणं जपकाले प्राप्तमिति न कश्चिद्दोष इति ।

अयञ्च नियमः श्रुत्यैव ज्ञापितः । छान्दोग्ये दहरविद्यायां सत्यशब्दनिर्वचनप्रकरणे, चिदचिन्नियमनरूपार्थत्रयपरत्वोपपादनाय, "स" "ति" "य" इति तकारस्य इकारान्तत्वेनैव निर्देशात् ।

किञ्च "वरेणियं जपेप्रोक्तम्" इत्यादिपूर्वोपात्तवचनेनापि णकारस्य इकारान्तत्वं सिद्धमिति मन्तव्यम् ।

ननु जपकालेरेफस्य उदात्तत्वं, इकारान्तणकारस्य स्वरितत्वमङ्गीकृत्य केचित् जपं कुर्वन्ति । अन्ये च, रेफस्य स्वरितत्वं-इकारान्तणकारस्य प्रचयत्वं, यकारस्यानुदात्तत्वमङ्गीकृत्यानुतिष्ठन्ति । किं-तत्र प्रामाणिकम् ? इति चेत्;

अत्र ब्रूमः । द्वितीयकल्प एव प्रामाणिक इति । तथा श्रौतमन्त्राणामनूचानपाठानुरोधेनैव तत्तत्कर्मकाले स्वरवर्णोच्चारणमङ्गीकृत्य करणमन्त्रतया विनियोगः कार्य इति सर्वसंप्रतिपन्नम् । परन्तु यत्रच स्वर वर्णावसानविषये अन्यथाभावः प्रमाणतः प्राप्तः, तत्र तावन्मन्त्र एवान्यथा भवितुमर्हति । नत्वतिरिक्तं किञ्चिदपि । एवञ्च प्रकृते गायत्रीविषयेपूर्वोक्त बहुप्रमाणबलेन विरलोच्चारणस्य प्राप्तत्वेऽपि, स्वरविषये अपवादक प्रमाणाभावेन स्वाध्यायपठनानुरोधेनैव जपकालेऽपि स्वरोऽनुसर्तव्यः । तथा च वरेण्यपदविषये, उदात्तवकार स्वरितरेफानुदात्तणकारद्वित्वयकारानुस्वाराः क्रमेणश्रूयन्ते । तदनुरोधेन जपकालेऽपि रेफस्य स्वरितत्वं णकारयकारयोश्च प्रचयादि स्वरत्वमेवाङ्गीकर्तव्यम् । नतुरेफस्य उदात्तत्वं इकारान्तणकारस्य स्वरितत्वं यकारस्यानुदात्तत्वम् । अप्रामाणिकत्वात् । अतोद्वितीय कल्प एव प्रामाणिक इति सिद्धम् ।

नन्वेवं णकारयकारयोरपवादकप्रमाणाभावेन अनुदात्तस्वरस्यैवावश्यकतया, कथं णकारमात्रस्यान्यथाभावः ? इति चेन्न; "स्वरितात्संहितायामनुदात्तानां प्रचय उदात्तश्रुतिः" इति सूत्रबलेन प्रचयप्राप्तेः प्रामाणिकत्वात् ।

ननु तर्हि यकारस्यापि स्वरितात्परानुदात्तत्वेन प्रचयत्वं स्यात् इतिचेन्न; "नोदात्तस्वरितपर" इति निषेध सूत्ररूपापवादस्य विद्यमानत्वात् ।

तस्मात् गायत्रीघटक वरेण्यशब्दः विरलमेवोच्चार्यः । तद्घटकीभूतणकारस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इकारान्तत्वमावश्यकम्। रेफणकारयकाराणां, स्वरित एकार-प्रचयइकार-अनुदात्त अकारान्तत्वमावश्यकमिति च सिद्धम्।

वेदान्तलक्ष्मणमुनिः प्रणिनाय सतां मुदे।
गायत्रीगतवर्णाना मुच्चारस्वरनिर्णयम्॥

श्रीमदण्णयार्यमहादेशिकाय नमः

❋

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मशब्दार्थ विचारः

—संपादकः—ना० श्री देवनाथाचार्यः

गदितं गङ्गाधरपुरवास्तव्यैर्वात्स्यराधवाचार्यैः ।
भावप्रकाशिकायां दोषं दुर्बलमपिव्युदस्यामः ॥

"बृहत्त्वञ्च स्वरूपेणगुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः" इति ब्रह्मशब्दार्थ-निरुक्ति भाष्यम् ।

अत्र श्रुतप्रकाशिका—

"बृहत्वगुणमात्रयोगिषु सर्वेषु ब्रह्मशब्दप्रयोगाभावात्, स्वरूपतो गुणतश्चानवधि-कातिशयबृहत्वं प्रवृत्तिनिमित्तमित्यर्थः" इति ।

अग्रेच, "ननुस्वरूपतोबृहत्वमेवनिमित्तमस्तु । किं गौरवेण ? इति चेन्न; ब्रह्मगुणादेरपि स्वरूपतोबृहत्त्वात् ब्रह्मशब्दवाच्यत्वप्रसङ्गात् ।" तर्हि गुणतोबृहत्त्वमेवास्तु निमित्तम् इति चेन्न । शब्दशक्तेरसङ्कोचस्य स्वतः प्राप्तत्वात्" इति ।

अत्र भावप्रकाशिका—

ननु "बृहत्त्वात् बृंहणत्वाच्च" इति प्रमाणानुसारेण द्वयमपि प्रवृत्तिनिमित्त मित्यभ्युप-गमेन ब्रह्मगुणादौ नातिप्रसङ्गः । अवश्यञ्च तथाभ्युपगन्तव्यम् । इतरथा ब्रह्मगुणादावति-प्रसङ्गतादवस्थ्यात् । प्रवृत्तिनिमित्तस्यसत्त्वात् । नहिलाक्षादि रञ्जकद्रव्येणरक्तस्य स्वतश्च-रक्तत्वाश्रयस्य जपाकुसुमादे रसङ्कोचाद्रक्तपदवाच्यत्वम्, नतुकेवल जपाकुसुमादेरित्यस्ति । नवा "पर्वताश्रयस्यैव पर्वतस्य पर्वतशब्दवाच्यत्वम् । नतुपर्वतानाधारपर्वतस्य । तस्य स्वरूपतः पर्वतत्वाश्रयत्वेऽपि धर्मतः पर्वतत्वानाश्रयत्वात् इत्यस्ति इति चेन्न; "कस्मादुच्यतेब्रह्मेति ? बृहन्तोह्यस्मिन्गुणाः" इति प्रमाणानुसारात्, बृहद्गुणकत्वमेव प्रवृत्तिनिमित्तम् । स्वरूप बृहत्व बृंहणत्वे अपि तत्रैवान्तर्गते इति तात्पर्यात् । यद्वा "गुणतो बृहत्त्व" मित्यस्य न "गुणगतं बृहत्त्व" मित्यर्थः । किन्तु, बृहद्गुणकत्वकृत स्वरूपनिष्ठएवमाहात्म्यविशेषः ज्यायस्त्वरूपः । अतः सर्वतो ज्यायस्त्वं बृहत्त्वम् । तदेवच ब्रह्मशब्दप्रवृत्ति निमित्तमिति भावः" इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१) अत्र केचिदाचिक्षिपुः—

प्रथमकल्पे बृहत्त्वस्य शक्यतावच्छेदकतां परित्यज्य तद्विशिष्टगुणस्य शक्यतावच्छेदकत्वाङ्गीकारेण बृहत्त्वमात्रस्य शक्यतावच्छेदकतापर श्रीमद्भाष्यश्रुतप्रकाशिकातत्त्वटीकासूक्तीनां, स्वीय मूलभावप्रकाशिकोक्तेश्च व्याकोपस्समुपजायते। तथाहि—बृहत्त्वञ्च स्वरूपेणगुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः" इति भाष्येण स्वरूपतो बृहत्त्वस्य ब्रह्मशब्दार्थतारूप शक्यतावच्छेदकत्वमवगम्यते। न तु बृहत्त्वविशिष्टगुणस्य। तथासति बृहत्त्वविशिष्टगुणोयत्रेत्यादिरीत्या अभिधानप्रसङ्गात्। एवं स्वरूपतो गुणतश्चानवधिकातिशयबृहत्त्वं प्रवृत्तिनिमित्तमित्यर्थ इति श्रुतप्रकाशिकयाबृहत्त्वशक्यतावच्छेदकतापर्याप्तिः प्रत्याय्यते। बृहत्त्वविशिष्टगुणे तत्सत्वे बृहत्त्वविशिष्टगुणः प्रवृत्तिनिमित्तमित्येवोपपादनीयत्वात्। एवं निरतिशयबृहत्वं हि ब्रह्मशब्दार्थः इत्यारभ्यते। नानवधिकातिशय-वृहत्त्वमेवब्रह्मशब्दार्थ-इत्यन्त तत्त्वटीकयापि बृहत्त्वमात्रे तत्त्वं बोध्यते। एवं 'ब्रह्मशब्दगतबृहत्त्वशक्तेरसङ्कोचात् पुरुषोत्तमएव ब्रह्मशब्दार्थः। कस्यापि बृहत्त्वस्यात्यागेन प्रवृत्ति निमित्त पौष्कल्यात्" इति मूलभावप्रकाशिकयापि बृहत्त्वमात्रस्य तथात्वं भाष्याद्यनुमतमेवोपपाद्यत इति मूलमूलिभावापन्न चतुर्ग्रंथी विरोधो दुर्निरोधः।

एवं द्वितीयकल्पे; ज्यायस्त्वस्य बृहत्त्वरूपस्य शक्यतावच्छेदकताङ्गीकारेण उक्तविरोधाप्रसरेऽपि, "गुणतो बृहत्वं नाम सद्वारकबृहत्त्वम्। गुणद्वारा हि तत्" इति श्रुतप्रकाशिका विरोधः। गुणगतबृहत्त्वस्यैव गुणद्वारा गुणि वृत्तित्वसंभवेन गुणप्रयोज्यस्वरूपगतबृहत्त्वस्य गुणद्वारकत्वानुपपतेः। अतो"गुणतोबृहत्व"मिति, स्वपूर्ववाक्यस्य, "गुणतोब्रह्मत्वं नाम" इत्यादिना स्वयमेवश्रुतप्रकाशिकायां व्याख्यानेविद्यमानेऽपि तदभिभूय, "नगुणगतं बृहत्वमर्थः। किन्तुबृहद्गुणकत्वकृतँ" इत्यादिना स्वयमन्यथोत्प्रेक्षणं कथङ्कारं श्रुतप्रकाशिकाव्याख्यातुणामुचितम्? इति विपश्चितो विदाङ्कुर्वन्तु।

न च श्रुतप्रकाशिकोक्तरीतौ ब्रह्मगुणातिप्रसङ्गवारणस्यासंभवात् तदन्यथानुपपत्यैव उक्तरीतिराश्रयणीयेति वाच्यम्; तदन्यथानुपपत्तंरेवाभावात्। न हि "एकयोक्त्या पुष्पवन्तौ दिवाकर निशाकरौ" इति कोशेन एकयोक्त्या चन्द्रसूर्यौ पुष्पवन्तपदप्रतिपाद्या वित्यङ्गीकारे, घटशब्देनाप्येकयोक्त्या घटपटौ प्रतिपाद्येयाताम् इत्यापादयितुं शक्यते। प्रमाणवलेन तथा स्वीकारात्। न हि "बृहत्वाद्बृंहणत्वाच्च" इत्यादि ब्रह्मशब्दार्थ निरुक्तिवत् पर्वतशब्दादिपु काचन निरुक्तिर्दृश्यते। अतः स्वरूपतो बृहत्वं अन्तर्भावित बृंहणत्वम्। गुणतो बृहत्वञ्च यत्र, तदेव ब्रह्मशब्दप्रतिपाद्यमित्यर्थकेन "बृहत्वाद्बृंहणत्वाच्च" इति प्रमाणेनैव स्वरूपबृहत्वमात्राश्रयस्यब्रह्मगुणादेः ब्रह्मशब्दवाच्यताप्रसङ्गोनिरस्त इति नास्माकमभिधेयमवशिष्यते। ब्रह्मपरिबृढं सर्वतः" इति यास्कोक्त्यापि स्वरूपतो गुणतश्चबृहत्वाश्रय एव ब्रह्मशब्दवाच्य इत्यर्थिकया दर्शितातिप्रसङ्गो निरस्तः। सर्वतः सर्वप्रकारेण स्वरूपतो गुणतोविभूतितश्चेत्यर्थ इति चण्डमारुते व्याख्यातत्वादिति।

२. अत्र समाधिष्महि—

प्रथमकल्पे बृहत्वविशिष्टगुणस्य शक्यतावच्छेदकतोक्तावपि न भाष्यादिविरोधप्रसक्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्य बृहत्वात्मकत्वेन बृहत्वादिशक्यतावच्छेदकतायाः भाष्याद्यभिमतायाः परिपालनात्। न हि बृहत्वं महत्परिमाणवत्वम्, सर्वमूर्तद्रव्यसंयोगित्वात्मकं विभुत्वं वा। किन्तु उत्कर्षरूपम्। तच्चब्रह्मणि कल्याणगुणरूपमेव। तथाहिः श्रुतप्रकाशिकायां "ननु बृहति बृंहयति तस्मादुच्यते-परं ब्रह्म-बृहत्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते-इति श्रुति स्मृतिभ्यां बृहत्वबृंहणत्वेच प्रवृत्तिनिमित्ततया अवगते। कथं बृहत्वमात्रं निमित्तमुच्यते? गुणतो बृहत्वे बृंहणत्वस्यान्तर्गत-त्वादिति ब्रूमः। "सचानन्त्यायकल्पते" इति श्रुति प्रसिद्ध सकलसङ्कोच निवृत्तिपूर्वक निरवधिक-ज्ञानविकास रूपानन्त्यावहत्वं हि बृंहणत्वम्। तद्धि सकलहेयप्रत्यनीकत्वक्षान्ति कारुण्यादि मोक्षप्रदत्वौपयिकगुणगणवत्वमिति बृहत्वस्य गुणरूपत्वं स्पष्टमनुगृहीतम्। "स्वरूपं निमित्तो-पादानताक्षिप्त सर्वज्ञत्वसत्यसङ्कल्पत्व विचित्र शक्तित्वाद्याकार बृहत्वेन" इति जन्माद्यधि करण भाष्येऽपि गुणानां बृहत्वरूपत्वं स्फुटम्। सर्व कारणताक्षिप्तं "सर्वज्ञ सर्वविदादिशब्द-कण्ठोक्तञ्च सर्वज्ञत्वादिकं बृहत्वादिकमेवनिरधार्यत" इति शतदूषण्यामप्ययमंशोव्यक्तः। गुणविशेषणञ्च बृहत्वं "परास्य शक्तिः" इत्यादि प्रमाणसिद्धं उत्कर्षविशेषरूपम्। तच्च "बृहन्तोह्यस्मिन् गुणाः" इत्यादि प्रमाण प्रतिपन्नत्वेन सर्वैर्निर्वाह्यमेव।

एवं तत्व टीकायामपि मोक्षप्रदत्वौपयिक गुणरूपतया निरुक्तस्य बृंहणत्वस्य बृहत्वे-ऽन्तर्भावेन बृंहणत्वस्य पृथक्कीर्तनानर्थक्यमाशङ्क्य गोबलीवर्दन्यायोऽवतारितः।

अधिकरणसारावल्यामपि; "जन्माद्यैश्चेद्विशेष्यं विहृति बहुलता" इत्यादिना, "गुणनिधिरघजिद्ब्रह्म शब्दार्थउक्तः" इत्यन्तेन गुणानामेव ब्रह्मशब्दार्थतावच्छेदकता श्लोकिता।

अधिकरण चिन्तामणीच, बृहत्वस्यगुणरूपस्य तथात्वं प्रकाशितम्। एवं—

"वेदे भूरिप्रयोगाच्च गुणयोगाच्चशार्ङ्गिणि।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने॥"

इत्यारभ्य;

"यस्मिन् प्रयुज्यमाने तु गुणयोगस्सुपुष्कलः।
तत्रैव मुख्यवृत्तोऽय मन्यत्र ह्युप चारतः॥"

इत्यन्त गरुडपुराणेनापि प्रवृत्तिनिमित्तभूतगुणपौष्कल्येन शार्ङ्गिणः मुख्यार्थत्वोपपाद-नेन गुणरूपत्वं प्रवृत्तिनिमित्तस्य बृहत्वस्य व्यज्यते। अतः सर्व ग्रंथ संवादितया आदिमकल्पे-नाल्पोऽपि दोषः।

एवमुत्तरोऽपि बलवत्तरएव। सर्वावधिकोत्कर्षवत्वरूपस्य सर्वतोज्यायस्त्वस्य प्रवृत्ति-निमित्तत्वे ब्रह्मपरग्रंथाविरोधस्य भवद्भिरेवाभ्युपगमात्। न च "गुणतो बृहत्वं नाम" इति श्रुतप्रकाशिकाविरोधः। "गुणनिष्ठबृहत्वं तत् न स्वरूपनिष्ठम्" इति तत्रानभिधानात्। "गुणद्वारा हितत्" इत्युक्तिस्तु गुणप्रयोज्यत्वपरा न गुणनिष्ठतां साधयितुमीष्टे। सर्वतोज्या-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्त्वञ्च न सर्वविधोत्कर्षवत्वम्; चतुर्मुखादिनिष्ठस्य इन्द्राद्यवधिकोत्कर्षस्य ब्रह्मण्यवर्तमानत्वात्। इन्द्रोत्कर्षस्य ब्रह्मणि सत्वेऽपितस्य भिन्नत्वात्। सर्वावधिकोत्कर्षवत्वन्तु ब्रह्मण्यव्याहतम्। "ज्यायान् पृथिव्याः" इत्यारभ्य "ज्यायानेभ्यो लोकेभ्यः" इति श्रुत्या तत्प्रतिपादनादिति।

३. पुनरत्र पूर्वपक्षयाञ्चक्रिरे—

प्रथम कल्पीय बृहत्वविशिष्टगुणस्य कतिपयवचनशकलबलेन बृहत्वरूपतोन्नयनेऽपि पूर्वोक्तचतुर्ग्रंथी विरोधोदुरुद्धर-एव। तथाहि—शक्तिग्राहक प्रमाणानां यद्रूपोपरक्ते शक्यत्वं बोध्यते तद्रूपे शक्यतावच्छेदकताबोधकतानियमः। एवं शक्यविशेषणं यद्रूपविशेषितंप्रतीयते, तद्रूपे शक्यतावच्छेदकताबोधकतावच्छेदकतानियमोऽपि। "घटोघटपदवाच्यः" "उत्पत्तिमान् कार्यपदवाच्यः" इत्यादौ दर्शनात्। अतएवहि बृहत्वञ्चेत्यादि भाष्यस्य बृहत्व शक्यतावच्छेदकतापरत्वं सर्वैरङ्गीकृतम्। अन्यथा वस्तुतो बृहत्वाश्रयस्य वस्तुतशशक्यत्वेऽपि शक्यतावच्छेदकस्यान्यस्याप्युत्प्रेक्षितुं शक्यत्वात्। एवञ्च बृहत्वमित्यादिभाष्ये बृहत्वत्वेनैवोपस्थित्या तस्यैव शक्यतावच्छेदकतावच्छेदकत्वं भाष्यानुमतमिति अवश्यं वक्तव्यम्।

एतेन तच्छायानुकारि तद्व्याख्यात्रयं व्याख्यातम्। बृहत्वविशिष्टगुणस्य शक्यतावच्छेदकत्वेच बृहत्वं गुणत्वञ्च शक्यतावच्छेदकतावच्छेदकमापतितम्। नतु बृहत्वत्वम्। इति पूर्वोक्त चतुर्ग्रंथीविरोधोवज्रलेपायते। एवमुत्तरकल्पे गुणतो बृहत्वनिरुक्तिग्रंथविरोधोऽपि दुश्शमः। तत्र गुणनिष्ठबृहत्वस्याविवक्षितत्वे परंपरा-घटकत्व रूपद्वारत्वस्य गुणे अभावेन तदुक्तिविरोधात्। गुणनिष्ठबृहत्वस्य स्वाश्रयाश्रयत्वरूपपरंपरासंबंधेन गुणिवृत्तित्वोपपादने सत्येव-स्वाश्रयनिरूपित स्वगतधर्मनिष्ठाधेयतावच्छेदकसंसर्गतापन्नाश्रयतानिरूपकतावच्छेदकीभूत स्वगत तद्धर्माश्रयताकत्वरूपद्वारत्वोक्तिनिर्वाहात्। अन्यथा द्वारतायाः पारिभाषिकतापत्या स्वरूपतोबृहत्वेऽपि सद्वारकता प्रसङ्गात्। अतोगुणनिष्ठबृहत्वस्य तद्ग्रंथविवक्षिततयाद्वितीयकल्पोक्तरीतौ तस्यबहिष्कारेण तद्विरोध स्तदवस्थएवेति।

४. अत्रैवं सिद्धान्तयाञ्चक्रमहे—

यद्यपि शक्यादिविशेषणतापन्नधर्माणां शक्यतावच्छेदकतादिग्राहकत्वं शक्तिग्राहक प्रमाणानां प्रायशोगृह्यते; तथापि तदौत्सर्गिकमेव। "लंबोष्ठो विकटपृष्ठो दीर्घग्रीवः पशुरुष्ट्रपदवाच्यः" "गंधजनकतावच्छेदकजातिमान् पृथिवीपदवाच्यः" इत्यादौ तदभावात्। अतो बृहत्वांशे शक्यतावच्छेदकतामात्रं भाष्यादिवाक्यैरवगम्यताम्। मैववृहत्वत्वस्य तत्वावच्छेदकत्वम्। तत्तु गुणनिष्ठबृहत्वान्तरस्यैव। "बृहन्तोह्यस्मिन्गुणाः" इति प्रमाणानुसारात्। अन्यथा, "कस्मादुच्यतेब्रह्म ?" इति प्रश्नपूर्वक मैदंपर्येण "बृहन्तोह्यस्मिन् गुणाः" इति ब्रह्मशब्दार्थमुद्गिरतस्तद्वाक्यस्यापार्थकतापत्तेः। अतो न चतुर्ग्रंथीविरोधः।

एवमुत्तरकल्पे गुणतोबृहत्वनिरुक्तिग्रंथविरोधोऽपि न लगत्येव। द्वारद्वारिशब्दयोः प्रयोजकपर्यायत्वात्। अतएव हि, "अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र" इति कालिदासः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रयुङ्क्ते। न चात्र द्वारपदस्य प्रयोजकार्थपरतां विना अर्थान्तरपरत्वं युक्तम्। "स्फुरति च बाहुः कुतः फलमिहास्य?" इति स्वीयबाहुस्फुरणव्यञ्जितस्य स्वसंबंधिनः फलस्य परंपराघटकपदार्थान्तरनिष्ठतायाः संदर्भविरुद्धत्वात्। परन्तु "शान्तमिदमाश्रमपदम्" इत्याश्रमपदे स्वीयफलप्रयोजकादर्शनात्, "कुतः फलम्? इति पञ्चम्या "शुभ रूपफलप्रयोजकं किम्? इति वितर्क्य, "अथवा" इत्यादिना प्रयोजकमेव वक्तव्यमिति द्वारपदं प्रयोजकार्थकमेव। लोके च धनदृप्ते पुंसि "धनद्वारकोदर्पः" इति व्यवह्रियते। न च तत्र दर्पस्य धनसंबंध संभावनापि। अवश्यञ्च गुणतो बृहत्वं गुणप्रयुक्तबृहत्वरूपमिति वक्तव्यम्। अन्यथा "स्वरूपेण गुणैश्च" इति भाष्यविरोधात्। तत्र तृतीयायाः प्रयोज्यत्वार्थकत्वात्। नित्यानामपि क्षेमसाधारण प्रयोज्यत्वस्य, "इच्छात एव तव विश्वपदार्थसत्ता" इत्यादि श्रीवत्साङ्कमिश्रसूक्त्यादिभिः, तदुपजीव्यैः सर्वस्य भगवदायत्तता ग्राहकप्रमाणैश्च बृहत्वे स्वरूप प्रयुक्ततायाअवसीयमानत्वात्। एवञ्च "गुणतोबृहत्व" मितिश्रुतप्रकाशिकायाः तसिलः प्रयोगेण तस्य सार्वविभक्तिकतया गुणनिष्ठबृहत्वमित्यर्थे भाष्यविरोधस्स्यादित्यभिप्रेत्य व्यासार्यैः "गुणतो बृहत्वं नाम" इत्यादिना निरुक्तम्। न तसिः सार्वविभक्तिकः। किन्तु पञ्चम्यास्तसिरेव। तथा च गुणप्रयोज्य बृहत्वस्यैवास्माभिरुच्यमानत्वात् न भाष्यादिविरोधः इत्याशयः। न च गुणप्रयोज्यबृहत्वस्य गुणद्वारकत्ववत् स्वरूपप्रयोज्यबृहत्वस्य स्वरूप द्वारकत्वस्यावर्जनीयतया, "गुणतो बृहत्वन्नाम सद्वारकबृहत्वम्" इति तन्मात्रे सद्वारकतोक्तिविरोधइति वाच्यम्; स्वभिन्नप्रयोजकाधीनस्यैव सद्वारकत्वव्यपदेशात्। यथा जलद्रवत्वस्य स्वरूपनिमित्तकत्वेऽपि न नैमित्तिकत्वव्यवहारः तद्वदित्यवधेयम्।

५. अत्राप्येवमाशशङ्किरे—

बृहत्वविशिष्टगुणस्य शक्यतावच्छेदकत्वेऽपि ब्रह्मगुणादावतिप्रसङ्गस्य नासंभवः। ब्रह्मसमवेतज्ञानस्य सर्वद्रव्यसंयोगरूपत्वात् उत्कृष्टगुणवत्वात्। तद्गतस्य तादृशसंयोगस्य निरतिशयत्वेन निरतिशयोत्कर्षविशिष्ट गुणस्य प्रवृत्तिनिमित्तत्वेऽपि तद्वारणासंभवात्। निरतियोत्कर्षमात्रस्य भाष्यादिस्वरसारूढस्य प्रवृत्तिनिमित्ततामुपेक्ष्य गुणांशनिवेशेबीजाभावश्च। "भक्षितेऽपिलशुने नशान्तो व्याधिः" इति न्यायेन वृथागौरवमात्रसंपादनात्। न च "बृहन्तोह्यस्मिन् गुणाः" इति बहुवचनबलेन निरतिशयोत्कर्षविशिष्टबहुगुणवत्वस्य प्रवृत्तिनिमित्तत्वान्नदोषइति वाच्यम्; तथापि सर्वद्रव्यसंयोग सर्वसर्गस्थितिसंहाराद्यनुगुण नानापरिणाम तत्तद्वस्तुनियमनानुगुण तत्तदाकारादि बहुगुणसंभवेन गुणातिप्रसङ्गस्यदुर्वारत्वात्।

एवं गुणनिष्ठबृहत्वस्य सर्वथैवाविक्षितत्वे "बृहन्तोह्यस्मिन् गुणाः" इति प्रमाणविरोधः। गुणगतबृहत्वस्य ब्रह्मशब्दार्थानुप्रवेशं विना तद्वाक्यस्य सङ्गमयितुमशक्यत्वात्। अतएवहिपूर्वकल्पे तत्प्रमाणानुगुण्याभिमानः। अतो गुणतो बृहत्वमित्यादिग्रंथोगुणनिष्ठबृहत्वपरएव। भाष्ये तृतीयायाः प्रयोज्यार्थ-कत्वेऽपि न गुणनिष्ठबृहत्वोपादानविरोधः। स्वरूपनिष्ठबृहत्वस्य स्वरूपप्रयुक्तत्ववत् गुणनिष्ठबृहत्वस्य गुणप्रयुक्तत्वस्य सुवचत्वात्। वस्तुतो "गुणैश्च" इति न हेतौ तृतीया। किन्तु "प्रकृत्यादिभ्यः" इत्यौपसंख्यानिकी। तथा च, "प्रकृत्या चारुः"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"यशसा विशालः" इत्यादाविव तृतीयायावृत्तित्वमेवार्थः इति भाष्ये गुणनिष्ठबृहत्वं व्यक्तमेवोक्तम्। श्रुतप्रकाशिकायाञ्च "द्वार" शब्दः परंपराघटकात्मकएवेति गुणनिष्ठबृहत्वस्य प्रवृत्तिनिमित्ततायाः तद्ग्रंथाभिमतायाः परित्यागेन द्वितीयकल्पोऽप्यनुपपन्नइति।

६. अत्रैवं पर्यहार्ष्म —

निरतिशयोत्कर्ष विशिष्टासंख्येयगुणवत्वं बृहद्गुणकत्वम्। "असंख्येय कल्याणगुणगण" इतिभाष्यात्। तच्च ब्रह्मणोऽन्यत्र न वर्तते। तादृश ज्ञानशक्त्यादेरन्यत्राभावेन कतिपय गुणानां सतामपि निपुणं स्संख्यातुं शक्यत्वात्। ब्रह्मगुणमात्रस्यासंख्येयत्वं,

"इषुक्षयान्नि वर्तन्ते नान्तरिक्ष क्षिति क्षयात्।
मतिक्षयान्निवर्तन्ते न गोविन्दगुण क्षयात् ॥"

इत्यादि प्रमाणशत सिद्धम्। न चैवमसंख्येयोत्कर्षवत्वमेव शक्यतावच्छेदकमास्ताम्, अनतिप्रसङ्गाल्लघुत्वाच्चेति वाच्यम्; यतो न वयं तार्किक प्रक्रियया लाघव गौरव विचारेण ब्रह्म शब्दार्थं परिच्छेद्यामहे, किन्तु यथा प्रमाणम्। अतएव बृहत्वान्तर्भाविण तदनन्तर्भाविण च बृंहणत्वस्य प्रवृत्ति निमित्तत्वं "बृहत्वाद् बृंहणत्वाच्चे" ति प्रमाणबलादङ्गीक्रियतइति। वयन्तु, उभयथापि दोषाभावादुभयथाप्याचक्ष्महे इति स्वमत मनुगृहीतं तत्त्वटीकायाम्। यथा तद् ग्रंथे नैतदर्थ लाभः तथा व्याख्यातं चण्डमारुते। ततश्च भाष्योक्त भगवच्छब्दन्यायेन निरतिशय ज्ञानादि गुणषट्कस्य तच्छक्यतावच्छेदकत्ववत् "बृहन्तो ह्यस्मिन् गुणाः" इति प्रमाणानुरोधेन निरतिशयोत्कर्ष विशिष्टासंख्येय गुणवत्वं ब्रह्मशब्द शक्यतावच्छेदकमित्यत्र न किञ्चिद्बाधकम्।

एवं "बृहन्तोह्यस्मिन् गुणाः" इति वाक्यस्य सर्वतो ज्यायस्त्व परिचायकाकार प्रतिपादकस्य तत्परिचेय सर्वतो ज्यायस्त्वएव प्रवृत्ति निमितत्व तात्पर्यम्। यथा "अखण्डमण्डलाकृतिः पुण्डरीकपाण्डरः चन्द्रपदवाच्य" इति वाक्यस्य चन्द्रनिष्ठवैजात्य परिचायकस्य तत्परिचेय धर्म एव प्रवृत्ति निमित्तत्व तात्पर्यं तद्वदिति न सर्वतो ज्यायस्त्वस्य प्रवृत्ति निमित्तत्वेन तद्वाक्य विरोध इति।

७. एतदुपर्यपि पर्यन्वयुञ्जत —

निरतिशयोत्कर्ष विशिष्टासंख्येय गुणवत्त्व रूपस्यापि बृहद्गुणकत्वस्य ब्रह्मशब्दशक्यतावच्छेदकत्वं न योयुज्यते, व्यासार्यैरेव निरस्तत्वात्। तथाहि, "ब्रह्मशब्देन च स्वभावतो निरस्तनिखिल दोषोऽनवधिकातिशयासंख्येय कल्याण गुणगणः पुरुषोत्तमोऽभिधीयते" इति भाष्यम्। तेन स्वरसतः पुरुषोत्तमान्वितस्य "स्वभावत" इत्यादि विशेषणद्वयस्य शक्यतावच्छेदकत्वं प्रतीयते। तच्च "बृहति बृंहयतितस्मादुच्यते परं ब्रह्म" इत्यादि बृहत्त्व शक्यतावच्छेदकतापर प्रमाण विरोधादनुपपन्नमिति भाष्यासङ्गतिमाशङ्क्य व्यासार्याः पर्यहार्षुः। इदञ्च विशेषणद्वयं शब्द शक्तेरर्थसामर्थ्याच्च ब्रह्मशब्दस्य पुरुषोत्तम परत्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिपादनौपयिकतयोक्तम् । न तु प्रवृत्तिनिमित्ततया । तथा च भाष्यस्य प्रवृत्तिनिमित्तपरता विस्रंभेण असंख्येयत्व विशेषणस्य भाष्यानुगुण्योत्साहोऽपि अश्मप्लवावलंवेनार्णव मज्जनायते । भाष्यस्यातत्परत्वात् । अतएव वृहत्त्वस्य गुणरूपत्वं नाचार्याणामनुमतम् । अन्यथा प्रवृत्तिनिमित्त भूत वृहत्त्वाभिन्नगुणस्य प्रवृत्ति निमित्तत्वनिषेधासाङ्गत्येन प्रवृत्ति निमित्ततया नोक्तमिति वाक्यविरोधात् । एवञ्चवृहत्त्व प्रवृत्तिनिमित्तता पर पूर्वोक्त चतुर्ग्रंथी विरोधोऽपि अवकाशं लभते । यद्यपि "गुणनिधिरघजिद्ब्रह्मशब्दार्थ···" इति अधिकरण सारावल्यां, तत्रत्याधिकरण चिन्तामणौ च गुणानां प्रवृत्ति निमित्तत्वं प्रतीयते-तथापि अन्यैव सा रीतिश्श्रुत प्रकाशिकानुसारिणी । व्यासार्योक्तरीति मपहाय रीत्यन्तरस्य तत्रतत्र देशिक चरणै राश्रीयमाणत्वात् । यथा—"अखिलभुवन···" इति श्लोकस्थ भुवन-शब्द व्याख्याने, श्रुतप्रकाशिकायां भुवन शब्दस्य रूढिरभिप्रेयते । तत्त्वटीकायाञ्च योग एव इत्यादिकं बहुतरमूहनीयम् । भावप्रकाशिकायाञ्च स्वमूल रीति मपहाय ग्रंथान्तररीत्यनुवर्तनं, भर्तारमुपेक्ष्य भागवतान्तर शुश्रूषणवदनुचितम् ।

एव मुत्तरकल्पे "वृहन्तो ह्यस्मिन् गुणाः" इति वाक्यस्य शक्यतावच्छेदक परिचायकत्व कल्पनेनाविरोधमात्र निर्वहणेऽपि स्वारस्य भङ्गात् तत्सहने बीजाभावेन तद्वाक्यात् शक्यता-वच्छेदकतया स्वरसतः प्रतीयमानस्य गुणनिष्ठस्य वृहत्त्वस्य त्यागो निर्निबंधन इति ।

८. अत्रेत्थमौत्तरयामः :—

न तावदिदं विशेषणद्वयमित्यादि श्रुतप्रकाशिका ग्रंथविरोधः । तद्ग्रंथस्य एतद्वाक्यं न प्रवृत्ति निमित्त प्रदर्शन परम् । उत्तरत्र प्रवृत्ति निमित्त प्रदर्शकस्य "वृहत्त्वञ्च स्वरूपेण गुणैश्च···" इत्यादि वाक्यस्य सद्भावादित्यत्र द्वयोर्विशेषणयोः प्रातिस्विक रूपेण न प्रवृत्ति निमित्तत्वम्, "वृहत्त्वञ्चस्वरूपेण···" इत्यादि वाक्यविरोधात् इत्यत्र वा तात्पर्यमिति रीत्या तूलिकायां व्याख्यातत्वात् । एतेन चतुर्ग्रंथीविरोधइति भिक्षुपाद प्रसारण मपि सुदूरनिर्धूतम् । अतएवाधिकरण सारावल्यां, "गुणनिधिरघजिद् ब्रह्मशब्दार्थ···" इति गुणानां ब्रह्मशब्द-शक्यतावच्छेदकत्वोत्कीर्तनं न श्रुतप्रकाशिकारीत्यनुवर्तीत्यपि न युक्तम् । गुणानां वृहत्त्व रूपत्वे वाधकाभावस्यावेदितत्वात् । मोक्षप्रदत्वौपयिक गुणगण रूपवृंहणत्वस्य वृहत्त्वान्त-र्भावप्रतिपादक प्रकृत श्रुतप्रकाशिका ग्रंथस्याविस्मर्तव्यत्वाच्च । एवं गुणनिष्ठ वृहत्त्वस्य शक्यतावच्छेदकतायाः, "वृहन्तोह्यस्मिन् गुणाः" इति वचन स्वरससिद्धायाः परित्यागो नोचित इति शिक्षणमपि न विचक्षणा वहुमन्वते । तथा हि; स्वरूपनिष्ठ वृहत्त्वगुणनिष्ठ वृहत्त्वयोः वृहत्त्वत्वेन शक्यतावच्छेदकता शक्तिग्राहकप्रमाण स्वरससिद्धेति तावत्पूर्वमेवोपन्यस्तम् । तत्र वृहत्त्वत्वावच्छिन्नस्य किं स्वरूप संवंधेन शक्यतावच्छेदकत्वम् ? उत परंपरा संवंधेन ? उत अन्यतर संवंधेन ? उतउभय संवंधेन ? नाद्यः । गुणनिष्ठ वृहत्त्वस्य स्वरूप संवंधेन ब्रह्मा-संवंधितया तत्परित्याग प्रसङ्गात् । ब्रह्म-गुणेऽपिस्वीय वृहत्त्वस्य स्वरूप संवंधेन सत्त्वेन तदति-प्रसङ्गावारणाच्च । न द्वितीयः । स्वरूपतो वृहत्त्वस्य परंपरा संवंधेन असंवंधितया तत्परित्याग प्रसङ्गात् । "शब्दशक्तयसंकोचस्य···" इत्यादि श्रुतप्रकाशिका विरोधात् । न तृतीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्यतरत्वेन संसर्गतायाः तार्किकैरेव निरस्तत्वात् । ब्रह्मगुणे साक्षात्संबंधेन बृहत्त्व सत्त्वेन तदतिप्रसङ्गतादवस्थ्याच्च । चतुर्थे, किमुभयोस्संबंधयोः प्रातिस्विकरूपेण साक्षात्त्वेन परंपरात्त्वेन च संसर्गत्वमभिमतम् ? उत उभयत्वेन ? तत्राद्ये, शक्यतावच्छेदकतावच्छेदक संसर्गतावच्छेदक भेदेन प्रणाड्या शक्तिभेद पर्यवसानेन ब्रह्मशब्दस्य नानार्थतापत्तिः । अन्त्ये, प्रत्येकं तत्तत्संबंधेन संबंधिनोरप्युभयो रुभयत्वविशिष्ट संबंधेनासत्त्वात् । शक्यतावच्छेदकतावच्छेदक संबंधावच्छिन्न शक्यतावच्छेदकनिष्ठा धेयतानिरूपकत्वाभावेन ब्रह्मणः शक्यत्वाभावप्रसङ्गः । घटत्वेन पटत्वेन च घटपटवति भूतले घटत्व पटत्वोभयरूपेण कस्याप्यवृत्या उभयरूपावच्छिन्नाधेयतानिरूपकत्वस्येव ब्रह्मण्यपि उभयसंबंधावच्छिन्नाधेयता निरूपकत्वासंभवात् ।

एवमुभयत्वेन संसर्गताया अप्रामाणिक्याः परिकल्पनापत्तिश्च । अतो "बृहन्तो ह्यस्मिन्" वचन स्वरसेन गुणनिष्ठ बृहत्त्वस्य ब्रह्मशब्दार्थानुप्रवेशाभिलापः बृहद्गुणकत्वस्य प्रवृत्तिनिमित्तत्वावलंबेनैव पूरणीयः । स च भावप्रकाशिकोक्तप्रथमकल्पएवेति नान्यथा तदभिलाषपूरणसिद्धिरिति ।

९. अत्रेदमचोदयन् :—

कल्पद्वयस्योत्थान संभवेहि तत्रगुणागुणविचारण प्रयोजन साफल्यम् । तदेवतुनेति मूलेकुठारः । तथाहिः—श्रुतप्रकाशिकोक्तरीतौ ब्रह्मगुणातिप्रसंङ्गस्य दुर्वारत्वाभिमानेनहि कल्पद्वयमवतारितम् । तच्च न घटते । प्रमाणसत्त्वेन बृहत्त्वद्वयाश्रयस्यैव ब्रह्म शब्दार्थताङ्गीकारः श्रुतप्रकाशिकाभिप्रेत इति पूर्वमेवोक्तत्वात् । न च गुणनिष्ठबृहत्त्वानुप्रवेशस्य शक्यतावच्छेदकतावच्छेदक संबंधविकल्पेन खण्डितत्वात् कथमेतदितिवाच्यम्, स्वरूपसंबंधेनस्वरूप बृहत्त्वमात्रस्य बृहत्त्वत्वेन शकयतावच्छेदकत्वेऽपि गुणबृहत्त्वाश्रयस्यैव ब्रह्मशब्दार्थत्वमित्युपगमे बाधकाभावात् । तथा च स्वरूप बृहत्त्वं विशेषणतया शकयतावच्छेदकम् । गुणबृहत्त्वन्तु उपलक्षणतया शकयतावच्छेदकम् । सर्वनामस्थले बुद्धिविषयतावच्छेदकत्ववत् तदेव शक्त्युपाधिरिति गीयते । परन्तु बुद्धिविषयतावच्छेदकत्वं स्वरूपसंबंधेन शक्यतावच्छेदकसंबद्धंसदवच्छेदकम् । गुण निष्ठबृहत्त्वन्तु स्वाश्रय गुणाश्रयत्व स्वरूप उभयघटित सामानाधिकरण्यसंबंधेन बृहत्त्वरूप शकयतावच्छेदकसंबद्धंसदवच्छेदक मिति विवेकः । अन्तर्भावित बृंहणत्वकमित्यस्य उपलक्षणीकृतबृंणत्वकमित्यर्थः । विशेषणत्व एव शाब्दबोधेऽभानरूप वहिर्भावासंभवात् अप्रकाशमानस्यान्तर्लीनस्य बृंहणत्वस्यान्तर्भावित बृंहणत्वकमित्यत्र उपलक्षणत्वेन विवक्षितत्व संभवात् । एवं च न बृहत्त्वत्वमात्र शकयतावच्छेदकतावच्छेदकतापर भाष्यादिविरोधः । तेषां विशेषणतारूप शकयतावच्छेदकतावच्छेदकता परत्वात् । न वा परंपरासंबंधस्य शाब्दबोधविषयता कल्पन प्रयुक्तगौरवम् । उपलक्षणकोटिनिविष्टत्वेन शाब्दबुद्ध्यविषयत्वात् । एतेन गुणबृहत्त्वस्य शकयतावच्छेदकतामङ्गीकृत्य तदाश्रयस्यैव ब्रह्मशब्दार्थत्वमिति निबंधाङ्गीकारे बृहत्त्वे निरतिशयत्व विशेषणं प्रक्षिप्य अनवधिकातिशय बृहत्त्वं ब्रह्मशब्दार्थइति भाष्यश्रुतप्रकाशिका तत्त्वटीकाद्युपपादनविरोधः । वस्तुतोऽनवधिकातिशय बृहत्त्वशालिन एव ब्रह्मशब्दार्थत्वमिति नियमन संभवात् बृहत्त्वमात्रस्यार्थत्वेऽपि पिपीलिकादिसाधारण्येन तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मशब्दप्रयोगप्रसञ्जनपर श्रुतप्रकाशिकादिविरोधश्च अनवधिकातिशय बृहत्त्वाभावेन न तत्र प्रसङ्ग इत्युक्तेर्दुर्भिक्षाभावादिति प्रत्युक्तम् ।

१०. अत्रैवं समार्तिथामहि—

एकस्य उपलक्षणत्वमन्यस्य विशेषणत्वमित्येतदाकारानभिमतमेव । ''बृहत्त्वञ्च स्वरूपेण'' इति भाष्ये उभयोरपितौल्यप्रतीतेः । बृहत्त्वबृंहणत्वयोरुभयोः प्रमाणसिद्धत्वाविशेषेण बृहत्त्वमात्रस्य शक्यतावच्छेदकत्वोक्त्यसङ्गतिमाशङ्क्य, गुणतोबृहत्त्वरूपबृंहणत्वस्य बृहत्त्वेऽन्तर्भाविण तत्परिहाररूप महासंरंभेण उभयोर्विशेषणतयावच्छेदकत्वस्यैव सुस्पष्टमवगम्यमानत्वात् । गुणबृहत्त्वविशिष्ट स्वरूपबृहत्त्वंशक्यतावच्छेदकम् ? स्वरूपबृहत्त्वविशिष्ट गुणबृहत्वं वाशक्यतावच्छेदकम् ? इत्यत्रविनिगमनाविरहाच्च ।

न च कल्पद्वयेऽपि परंपराघटितसामानाधिकरण्यसंबंधः उपलक्षणतावच्छेदकः । प्रथमकल्पे साक्षात्संबंधो विशेषणतावच्छेदकः । द्वितीयकल्पेतु परंपरासंबंधः इति विशेषणतावच्छेदकसंबंधलाघवमेव विनिगमकमितिवाच्यम्; ''बृहति बृंहयति'' ''बृहत्त्वाद्बृंहणत्वाच्च'' इत्यादेस्तुल्यत्वेऽपि, ''बृहन्तोह्यस्मिन् गुणाः'' इति प्रमाणस्य गुणबृहत्त्वपक्षपातिनोऽधिकस्य सत्त्वेन संबंधगौरवस्याकिञ्चित्करत्वात् । प्रमाणबलेन शक्तिनिर्धारणोद्युक्तैः गौरवपरीक्षणमनुचितमिति असकृदावेदितत्वात् । बृहत्त्वमात्रस्य शक्यतावच्छेदकतास्वरसस्य इदानीमपिव्याहन्यमानत्वेन एकमुपलक्षण मन्यद्विशेषण मित्यर्धजरतीयानुपयोगात् । बृहत्त्वमात्रस्य शक्यतावच्छेदकत्वेऽपि निरतिशयत्वस्योपलक्षणत्वेन पिपीलिकादिवारण संभवे तस्याप्यर्थं शरीरप्रवेशनस्याचार्याणा मनौचित्यात् । बृहत्त्वद्वयस्यापि तुल्यवत् शक्यतावच्छेदकताया अनुपदमेवोपपादितत्वेन ईदृशकल्पनायाः ''सिद्धमन्नं परित्यज्यभिक्षामटतिदुर्मतिः'' इति न्यायकवलितत्वाच्चेति ।

११. पुनरत्र प्रत्यवतिष्ठन्ते—

गुणनिष्ठबृहत्वस्य शक्यतावच्छेदकताप्रकारः ? अपरथैवोपपाद्यते । तथाहि—सत्यज्ञानादि वाक्यार्थोपदेशावसरे, "ज्ञानपदं नित्यासङ्कुचित ज्ञानैकाकारतामाह" इति भाष्यम् । तत्र नित्यासङ्कुचितज्ञानत्वमाकारोयस्य, तत् नित्यासङ्कुचितज्ञानैकाकारं इति प्रक्रम्य, नित्यासङ्कुचितज्ञानत्वमद्वारकं सद्वारकञ्च परमात्मन आकारोभवति साक्षात्परंपरयावेति विशेषमनपेक्ष्य ज्ञानत्वमात्रस्य प्रवृत्ति निमित्तत्वे सतिशब्दशक्त्यसङ्कोचात् । साक्षात् प्रणाड्या च ज्ञानत्वविशिष्टत्वावगमेन ज्ञानधर्मकत्व ज्ञानस्वरूपत्वसिद्धेरिति व्यासार्यैरन्वग्राहि । अत्र ह्यद्वारकं धर्मद्वारकञ्चेत्यादेः स्वरूपप्रयुक्तत्वं धर्मप्रयुक्तत्वञ्चेत्यर्थौ दुर्वचः । ज्ञान धर्मकत्व ज्ञानस्वरूपत्वसिद्धेः निगमितत्वात् । अत्र ययारीत्या ज्ञानत्वमात्रस्य प्रवृत्तिनिमित्तत्वेन साक्षात् परंपरया च स्वरूपधर्मगतयोः ज्ञानत्वयोर्भानमाचार्यानुगृहीतं निरुह्यते, तयैवरीत्या बृहत्वमात्रस्य प्रवृत्तिनिमित्तत्वेऽपि साक्षात्परंपरयाच स्वरूपधर्मगतबृहत्वयोः भाननिर्वाहेण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आचार्यसूक्त्यैवाचार्यसूक्ते व्याख्यायमानतया नास्माभिः किमपि कल्पनीयमिति भावप्रकाशिकायां स्वतन्त्र कल्पद्वयोत्प्रेक्षणं श्रुतप्रकाशिकाविरुद्धमिति ।

१२. इदमित्थमखण्डयाम—

ज्ञानपदेन यद्यपि स्वरूप धर्मगतयोः ज्ञानत्वयोः प्रतीतिराचार्यैरभिप्रेयते; तथापि ज्ञानत्वद्वयान्यतरवतोऽज्ञानपदवाच्यत्वं न निषिध्यते। यावत्प्रवृत्तिनिमित्तवतएव पदवाच्यत्वमिति अनिर्बंधात्। एकैकरूपवति रूपवदादिपदप्रयोगात्। नत्रा स्वरूपतो धर्मतश्च प्रवृत्तिनिमित्तवतएव पदवाच्यत्वमिति निर्बंधः। पर्वतानाधारपर्वतादेः पर्वतपदावाच्यत्वप्रसङ्गात्। अतो ब्रह्मपदमपि ज्ञानपदवत् साधारणमेव स्यादिति ब्रह्मगुणातिप्रसङ्गस्य दुर्वारताशङ्कनं भावप्रकाशिकायां सम्यगेव। ततश्च तदुक्त परिहारकल्पद्वयमपि आवश्यकमेवेति किमनुपपन्नम्? ज्ञानत्वद्वयस्य बोधक्रमः कथमुपपादयितुं शक्यते? इति चेत्; श्रूयताम्। संबंधसामान्येन ज्ञानत्वं शक्यतावच्छेदकम्। स्वरूपसंबंध स्वाश्रयगुणाश्रय-त्वाभ्यामन्यतरसंबंधस्य तदीयवृत्यनियामकतया तदधिकरण एव तद्धर्मस्य प्रकारतया भानाङ्गीकारेण वातिप्रसङ्गाभावेन संबंधत्वावच्छिन्नेन साक्षात्संबंधेन परंपरासंबंधेन च ज्ञानत्वं बोध्यतइत्येकः क्रमः।

अधिकरणता संबंधेनज्ञानत्वं प्रवृत्तिनिमित्तम्। अधिकरणता च साक्षात्संबंधावच्छिन्नाधेयतानिरूपिता परंपरासंबंधावच्छिन्नाधेयतानिरूपिता च। तेनसंबंधेन स्वरूपज्ञानत्वस्य धर्मज्ञानत्वस्य च बोधः। न चोक्तकल्पद्वयेऽपि ज्ञानपदस्य लक्षणाप्रसङ्गः। तस्य स्वरूपसंबंधेन ज्ञानत्वविशिष्ट वाचकत्वादिति वाच्यम्; विनिगमकाभावेन संबंधत्वावच्छिन्नेन अधिकरणतासंबंधेन वा ज्ञानत्व विशिष्टशक्तेर्दुवारत्वात्। एतेन अन्यतरसंबंधे ज्ञानत्व विशिष्टार्थतापरत्वमस्य ग्रंथस्य न संभवतीति व्याख्यातम्। लक्षणाप्रसङ्गात्। जातिशक्तिन्यायेन ज्ञानत्वमात्रे ज्ञानपदस्य शक्ततया संबंधविशेषानानुप्रवेशात्। साक्षाद्वा परंपरयावा भानमित्युक्तमिति केचिन्मन्यन्ते। तच्चिन्त्यम्। विशिष्टशक्तेरेवास्मत्सिद्धान्त सिद्धत्वेन मतान्तरावलंबनेन श्रुत्यर्थ वर्णनस्यानुचितत्वात्।

इत्थञ्च यथा कथञ्चित् गुणनिष्ठबृहत्वस्य भान संभवेऽपि गुणातिप्रसङ्गस्य दुरुद्धरतया भावप्रकाशिकोक्त कल्पद्वयमावश्यकमेवेति तदुपरि दोषोद्घोषशेमुषीदोष एवेति प्रतिभाति।

अवद्यं राघवार्योक्तमधिभाव प्रकाशिकम् ।
अगास्त्य-दर्शित सद्भि रणयार्य स्सुधी मणिः ॥
सयूथ्य जन सल्लापे को जयः? कः पराजयः?।
किन्तु चिन्तितमाचार्य वर्य श्री सूक्तिवैभवम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राघवाचार्य श्लोकाः

श्रीमद्भाष्य प्रकोपान्नयगति विहतेः तत्त्वटीकाविरोधात्
व्यासार्योक्ते विरोधात् स्ववचन विहते र्दुनिवारत्व तश्च ।
भाष्याद्युक्तानुसारे क्षतिलव विहरात् क्लिष्टक्लृप्ते रयोगात्
नोयुक्तंस्या न्निमित्तत्व कथन मिहहि ब्रह्मशब्दे गुणानाम् ॥ १ ॥

अन्यत्रार्यानुमत्या तदुचित मितिचेत्, किन्ततः प्रस्तुतार्थ-
त्यागे हेतोरभावात् प्रथममधिकृतैर्ब्रह्मशब्दार्थक्लृप्त्यै ।
पूर्वाचार्यैः प्रपञ्चीकृत विषय इह व्याहृति र्नैवशक्या
कर्तुं तस्यैव दार्ढ्यं कलयितु मुचितं नान्यया नेतुमर्हम् ॥२॥

भाष्य स्वारस्यभङ्गं कथमिव सहते भाष्यसिद्धान्तवेत्ता
भाष्यं नो भाष्यमेव प्रभवतिहि तदादूष्यतां बुद्धि योगात् ।
अस्मत्प्रोक्तप्रणाड्या स्वरसतरगते स्सर्व संवादतश्चा-
क्लेशा दाशं सनीयं पटुतरमतिभिस्तद्बृहत्वं निमित्तम् ॥३॥

अत्र सिद्धान्त श्लोकः

व्यासार्याणां बृहत्वं गुण इति फणितेः वेदचूडागुरूणां
सारावल्यां स्फुटोक्ते र्बृहदमितगुणं गाहते ब्रह्मशब्दः ।
ज्यायस्त्वं सर्वतो वा गुणजमितरथा दोषएषां बृहत्त्वात्
इत्येवं रङ्ग रामानुज गुरु करुणा सङ्गिनस्सङ्गिरन्ते ॥१॥

इत्यण्णयार्य महादेशिकैरनुगृहीतः
ब्रह्मशब्दार्थविचारः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जयन्ती विशेषानुष्ठाननिर्णयः

—संपादकः—ना० श्री देवनाथाचार्यः

अत्र तावत् अद्य संवत्सरे श्रीगोपाल देशिकसंप्रदायानुरोधेन जयन्त्यनुष्ठान विषये कश्चन संशयः। "सर्व प्रकारेण अष्टमी रोहिणी संयोगाभावे वियुक्तशुद्धरोहिण्यामेव जयन्त्यनुष्ठानं कार्यमिति स्वामिनां निर्णयरीत्या अद्य संयोगस्यैवाभावेन शुद्धरोहिण्यामेवानुष्ठानं प्राप्तम्। अत्र च सिंह श्रावणे नवम्यां शुद्ध रोहिण्याः विद्यमानत्वात्, उत्तरत्र सिंह भाद्रपदे सप्तम्यां बुधवार युक्तायाः रोहिण्या स्सत्त्वाच्च कुत्र जयन्त्यनुष्ठानं कार्यम्? इति।

अत्र केचित्, उत्तरत्र सप्तम्यामेव जयन्त्यनुष्ठानं कार्यम्। संयुक्त मुख्य जयन्त्यभावे शुद्धरोहिण्यामेवानुष्ठानं कार्यमिति वचनोपन्यास पुरस्सरं स्वामिभिरेव निर्णीतत्वात्। अत्रापि शुद्ध रोहिणी सत्त्वात्। न च विनिगमनाविरहश्शङ्कनीयः। सर्वत्र तिथिविषयेवा नक्षत्र विषयेवा अन्यत्रवा "तुल्य बलतया उभय प्राप्तौ उत्तरमेव बलीयः" इति सर्व संप्रतिपन्नत्वात्। अत्रापि जयन्ती द्वयप्राप्तौ उत्तरत्रैव व्रतानुष्ठानमिति विशेषतो व्यवस्थापितत्वाच्च। बुधवार युक्तत्वाच्च विनिगमकस्य सुलभत्वात्।

नच शुद्ध रोहिणी विषये, "अष्टम्यां वा नवम्यां वा" इतिवत् नवम्यादि युत रोहिण्या इव सप्तमीयुतायास्तस्याः ग्राहकप्रमाणाभावान्नैवमिति वाच्यम्; संयुक्तविषयाभावे सामान्यतः शुद्धरोहिणी ग्राहक प्रमाणस्यैवात्रापि ग्राह्यत्वात्। अत्र निषेधक प्रमाणाभावाच्च। न च "अष्टम्यां वा" इति वचनेन नवमी दशम्योरेव कण्ठत उपादानेन सप्तमीनिषेधः फलित इति वाच्यम्; तस्य वचनस्य संभावित स्थल प्रदर्शन परतया निषेधगर्भत्वानावश्यकत्वात्। अन्यथा यत्र संवत्सरे सप्तम्यामेव शुद्ध रोहिणी, अन्यत्र क्वचिदपि शुद्धा नास्ति, तत्र जयन्त्यनुष्ठानविलोप प्रसंग इति।

किञ्च, जन्माष्टमी व्रत जयन्ती व्रतयोः सर्वदा तन्त्रेणानुष्ठानं वदद्भिः सार्वभौमैः, कदाचित् शुद्ध संपूर्णसप्तम्यां शुद्ध संपूर्ण रोहिणी सद्भावे उत्तरदिने संपूर्ण शुद्धाष्टमी सद्भावे, पूर्वदिने जयन्त्यनुष्ठानस्य-उत्तरदिने जन्माष्टम्यनुष्ठानस्य च पृथगेव प्राप्तत्वेन "कथं सर्वत्र तन्त्रेणानुष्ठानम्? इत्याशङ्कां परिजिहीर्षुभिरेवमुपपादितम्—"षष्ठयामस्मिन्मासि रोहिण्या असंभवात्-सप्तम्यां रोहिण्याः विद्धत्वात् उत्तरत्रैव जयन्त्यनुष्ठानमिति न पृथगनुष्ठानम्" इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्नारुस्वामिभिरेतद्दूषणावसरे च, "विजातीय वेधस्या प्रामाणिकत्वात् न तत्र तन्त्रेणानुष्ठान सिद्धिरित्यभिप्रेत्य दूषणमुक्तम् ।

तदुभयमपि पूर्वोक्तस्य "अष्टम्यांवा···" इति वचनस्य सप्तमीनिषेधगर्भत्वे न संगच्छते। तथा सति "सप्तम्यां केवल रोहिण्यनुष्ठानस्य निषिद्धत्वात्" इति, "निषिद्धत्वाच्च" इति वा वक्तुंयुक्तत्वात् ।

एवं स्वरसतया तद्दूषणमपि पृथगनुष्ठानपर्यवसान प्रयोजकं न भवति ; विजातीयवेधस्याप्रामाणिकत्वेऽपि उक्तरीत्या सप्तमी रोहिण्याः स्वातन्त्र्येण निषिद्धत्वात्, तदुक्तरीत्या तन्त्रेणानुष्ठानमेव पर्यवसितमिति ।

अतः उभयोरपि निरुक्त वचनं सप्तमी निषेधगर्भमिति नाभिप्रेतम् । तस्मादुत्तरत्र सप्तमी रोहिण्यामेव जयन्त्यनुष्ठानमावश्यकम्, इति वदन्ति ।

अत्र अहं एवमभिप्रैमि—

नवमीयुक्तरोहिण्या मिदानीं पूर्वप्रसक्तायामेव स्वामिसंप्रदायनिष्ठैरपि जयन्त्यनुष्ठानं कार्यम् । नत्विदानीं सप्तमीयुक्त रोहिण्यामुत्तर प्रसक्तायाम् । "अष्टम्यां वा नवम्यां वा···" इति अन्यत्र निषेधगर्भेण वचनेन तस्याः प्रतिषिद्धत्वात् ।

नचैवंसति क्वचित्संयुक्त जयन्त्यभावे सप्तम्यामेव शुद्ध रोहिण्याः प्रसक्तौ अन्यत्र कुत्रापि शुद्धा विद्धावा यत्र नास्ति, तत्रानुष्ठानविलोपप्रसङ्गइत्युक्तम् इति वाच्यम् ; तत्र सर्वासंभवे "शेषिलोपस्यान्याय्यत्वात्" इति न्यायेन अगतया तत्रानुष्ठानस्य युक्तत्वात् । न चोक्तरीत्या निरुक्त वचनस्य श्रुति रूपतया-उक्तशेषिलोप न्यायस्य लिङ्गतया दुर्बलत्वेन कथमत्र न्यायेन श्रुति बाध उच्यते ? उच्यते हि "न हि श्रुति विरोधे न्यायः प्रभवतीति" इति वाच्यम् ; तथा सति स्वामिनां निर्गलितार्थोपपादनावसरे, संयुक्ताभावे वियुक्तविषये सूर्योदयमारभ्य कलामात्र विद्धत्वेऽपि निषेध वचन बलात् संयुक्त विषयवत् विद्धायाः क्वचिदपि ग्राहक प्रमाणाभावाच्च सर्वथा नियत सजातीय विद्धायाः रोहिण्या वा अष्टम्या वा त्याज्यत्वमभिधाय, संयुक्तविषयाभावे अविद्धरोहिण्यावा अविद्धाष्टम्यावा अभावे कुत्र जयन्त्याद्यनुष्ठानम् इत्याशङ्क्य, शेषिलोप न्यायावलंबनेन "विद्धायामेव रोहिण्यां जयन्त्यनुष्ठानम् । विद्धायामेवाष्टम्यां जन्माष्टमीव्रतानुष्ठानम् ।" इति निषेध वचन विषयी भूतविद्ध विषय एव शेषिन्यायेन क्वचिद् ग्राह्यत्व समर्थनासङ्गत्यापत्त्या तत्र वक्तव्यसमाधानस्यैवात्राप्यनुसंधेयत्वात् ।

ननु तथापि तत्रवा कथं समाधानम् ? यदनुरोधेन अत्रापीदमुच्यते इति चेत्; एव मत्र समाधिः । "नहि वचनविरोधे---" इत्यस्यायमाशयः—"वचनतात्पर्य विषयी भूतार्थ विरुद्धार्थ कल्पकत्वं न्यायस्य न संभवति" इति । एवञ्च विद्ध केवलरोण्यिष्टमी निषेधवचनानामेकस्मिन्मासि विद्धाविद्धसमुच्चये, विद्धायां नैव जयन्त्यादिव्रतानुष्ठानं इत्यत्र तात्पर्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्तात्पर्याविषयीभूत शुद्धासमवहित विद्धामात्रसंभव दशायां, उक्ताङ्गिलोपन्यायानुरोधेन विद्ध रोहिणीविद्धाष्टम्योः जयन्ती जन्माष्टमीव्रतानुष्ठान समर्थनं नविरुद्धमिति उदाहृतस्थले स्वामिना माशयः इति वक्तव्यम्। तद्वदत्रापि "अष्टम्यां वा···" इति निषेधगर्भ वचनस्य नवम्यादि युक्त केवल शुद्ध रोहिण्याः सप्तम्यां शुद्धरोहिण्याश्च एकस्मिन् भागभेदेन संभवे, सप्तमी रोहिणी निषेध एव तात्पर्यात्, तत्तात्पर्याविषयीभूतायां नवम्यादियुक्त शुद्ध रोहिणी शून्यमासि सप्तमीयुक्त शुद्धरोहिण्यां अगत्या, "अङ्गिलोपस्य···" इति न्यायानुरोधेन जयन्त्याद्यनुष्ठान कल्पनायां न विरोधगंधः।

नन्वेवमपि, किमर्थोऽय मायासः ? उदाहृतस्य, "अष्टम्या···" मिति वचनस्य नियम परत्वमङ्गीकृत्य, संभावित स्थल प्रदर्शनमुखेन रोहिणी मुख्यत्वोपपादन परत्वाङ्गीकारेण उक्तागतिक सप्तमीयुक्त शुद्धरोहिणी स्थले सुलभोपपादन संभवात् इति चेत्; सत्यम्। तथापि नयुक्तम्। वियुक्त रोहिणी विषये शुद्धत्वमात्रस्यैवापेक्षितत्वेन भवत्पक्षे तिथिविशेष संयोगस्यानपेक्षितत्वेन तत्प्रर्शनस्यानावश्यकत्वेन मन्दप्रयोजनत्वात्। मुख्ये संभवति अमुख्य प्रयोजनकल्पनस्यान्याय्यत्वाच्च।

किञ्च, संभावित स्थल प्रदर्शन परत्वे सप्तम्याअपि त्वदुक्तरीत्या संभावित स्थलत्वेन तदप्रदर्शनेन न्यूनता स्यात्। नच तस्या अप्युपलक्षणमेतद्ववचनमिति वाच्यम्; उपलक्षक वचनानां स्वविधेयान्वययोग्यत्वेन संप्रतिपन्न प्रमाणान्तर प्रक्लृप्तानामेवोपलक्षकत्व नियमेन, अत्र च तादृश प्रमाणान्तराभावात् तदुपलक्षकत्वासंभवात्। अन्यथा एकत्र कण्ठोक्तिमतः असङ्कोचादकण्ठोक्तानां सर्वेषामपि उपलक्षकत्वापत्त्या सर्वत्राव्यवस्थैव स्यादिति।

नन्वस्ति हि संप्रतिपन्न प्रमाणं संयुक्तरोहिण्यभावे वियुक्तरोहिणी सामान्य ग्राहकम् :—

"रोहिण्यामेव कुर्वीत कृष्ण जन्मार्चनादिकम्" इति वचनम् इति चेत्; न। त्वदुक्तरीत्या सप्तमीरोहिण्यां जयन्त्यनुष्ठान प्रापकत्वेऽपि तद्वचनस्य, मदुक्तरीत्या अप्रापकत्वेन उक्तप्रमाणस्य विप्रतिपन्नत्वात्।

त्वदुक्तरीत्यावा कथमप्रापकत्व मितिचेत्; उच्यते। सामान्यतः प्राप्तवचनानां शब्दतो वा अर्थतो वा विशेष वचनान्तर निषिद्धविषये स्वविधेयान्वयबोधना सामर्थ्य;

"ब्राह्मणेभ्यो दक्षिणा देया-न देवदत्ताय"
"ब्राह्मणेभ्यो दधिदीयतां-तक्रं कौण्डिन्याय"

इत्यत्रानुभवसिद्धं, परीक्षक संमतञ्च। अतोऽत्राप्यष्टमी वचनस्य सावधारणन्यायेन शब्दतोवा अर्थतोवा निषेधस्य मदिष्टत्वेन एतद्वचन निषिद्ध सप्तमी रोहिणीविषये, "रोहिण्यामेव कुर्वीत" इत्यादि सामान्य वचनानां जयन्त्यनुष्ठान प्रापकत्वं न संभवतीति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्चास्य वचनस्य उपलक्षणपरत्वे नवमीग्रहणेनैवालम्। तेनैव संभावित रोहिण्योः दशमी सप्तम्योः उपलक्षकत्व संभवात्। कार्त्स्न्येन ग्रहणस्याभिप्रेतत्वे सप्तम्या अपि ग्रहणमावश्यकम्। तदुभयविधं परित्यज्य सप्तमीं विहाय तदन्योभयग्रहण मेतद्वचनस्य व्यवस्था परत्वमेव ज्ञापयति।

अपिच, अस्य वचनस्य उपलक्षण परत्वाङ्गीकारे "रोहिण्यामेव " इति वचनस्य सप्तमी रोहिणी प्रापकत्वसिद्धिः। एतद्वचनस्य प्रापकत्व सिद्धावेव पूर्वोक्त वचनस्य उपलक्षण परत्व सिद्धिरिति अन्योन्याश्रय इति, उक्त सामान्य वचनस्य प्रापकत्वमसंप्रतिपन्नमेवेति व्यवस्थापरत्वमेवेति युक्तम्।

यद्वा "रोहिण्यामेवकुर्वीत" इति सामान्यवचनस्य छागपशुन्यायेन "षष्ठ्यांवा" इति वचन प्राप्त नवमी दशमीयुक्त रोहिण्यात्मक विशेषएव जयन्त्यनुष्ठानप्रापकत्वपर्यवसानेन सप्तमी रोहिणी प्रापकत्व शङ्काप्यस्य वचनस्य न संभवति। यथा, "तमेवं विद्वानमृतइह भवति" "विज्ञाय प्रज्ञांकुर्वीत" "अनुविद्य विजानाति" इत्यादि सामान्यवचनानि, ज्ञान सामान्य वोधन शक्तियुक्तान्यपि उक्तछाग न्यायेन "ध्यायीत" "उपासीत" इत्यादिना श्रुतविशेषपर्यवसितानि सन्ति। केवल वाक्यार्थ ज्ञानादीनां मोक्षोपायत्व प्रापकाणि न भवन्ति, तद्वत्।

एवञ्च नवम्यादियुक्त रोहिणी सहितमासि सप्तमीरोहिण्यां जयन्त्यनुष्ठानं ग्राहक प्रमाणाभावान्न संभवतीति सिद्धम्।

एवञ्च अगतिक सप्तमी रोहिणी विषये, अङ्गिलोप न्यायेन जयन्त्यनुष्ठान समर्थने "नहि वचनविरोधे न्यायः प्रभवति" इति न्याय विरोधः इत्युक्ति रपि दूरोत्सारिता।

एतत्कल्पे पूर्वोक्तस्य, "रोहिण्यामेवकुर्वीत" "अष्टम्यां वा नवम्यांवा" इति वचन द्वयस्थापिवियुक्तविषये नवम्यादि युक्तशुद्ध रोहिणी जयन्त्यनुष्ठान विधि परत्व मात्र पर्यवसानात्, उक्तागतिक सप्तमी रोहिण्योः अनिषिद्धत्वेन उक्तस्य "वचनविरोधे…" इति न्यायस्यानवतारात्।

एवं उक्तस्य "अष्टम्यां वा…" इति वचनस्य सप्तमी निषेध गर्भत्वं वा? छागपशुन्यायेन विशेषपर्यवसानं वा ? स्वामिनामभिप्रेतमिति स्वामिनां ग्रंथेनैव ज्ञायते। तथाहि :— अष्टमी रोहिणी योगाभावे ;

अष्टम्यां वा नवम्यां वा दशम्यां यदि रोहिणी।
सा जयन्तीति विख्याता प्रशस्ता भक्ति मुक्तिदा॥"

इति नारदीय वचनात्,

"रोहिण्यामेव कुर्वीत कृष्ण जन्मार्चनादिकम्" इति श्रवणाच्च, "नवमीयुत रोहिण्यां दशमीयुत रोहिण्यां वा व्रतं कार्यम्" इति ग्रंथपंक्तिः। अत्र उपात्त वचनयोः शुद्ध रोहिणी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सामान्यस्य जयन्तीत्व विधान एव तात्पर्यञ्चेत्-एकस्य वचनस्य ग्रहणेनैव विवक्षितार्थलाभेन वचनद्वयप्रदर्शन मनावश्यकम्। तद्वचनाभिप्रेतार्थ कथनदशायां, "शुद्ध रोहिण्यामेवव्रतं कार्यम्" इति वक्तव्यम्। तदपहाय अनुपयुक्त नवम्यादि युक्तत्वोपपादन पूर्वकं, "नवमी युक्त रोहिण्यां" इत्याद्युक्तिः असंगतास्यात्।

किञ्च, सप्तमीरोहिण्या अपि वचनाभिप्रेतत्वे, कण्ठोक्तार्थवत् अभिप्रेतार्थस्यावश्यमुपपादनीयतया, नवमी दशमी सप्तमीयुक्त रोहिण्या मित्येव वचनव्यक्ति स्स्यात्। नहि तथा श्रूयते। अतो मदुक्तरीत्या व्यवस्था परत्वेन निषेधगर्भत्वं वा-विशेष पर्यवसायित्वं वा-"अष्टम्यां वा···" इति वचनस्याभिप्रेतमिति तदग्रंथाभिप्रायः इत्येव वक्तव्यम् तथासति तु व्यवस्थापकत्व पक्षे निषेधस्य गर्भिततया अप्रसक्त प्रतिषेधायोगात्, प्रसञ्जक सामान्य वचनोपादानं, तन्मात्रोपादाने निषेध्यतयाभिमतसप्तमीरोहिण्या मनुष्ठान प्रसक्तिशङ्का स्यादिति तत्परिहाराय निषेधगर्भस्य "अष्टम्यां वा···" इति वचनस्यो पादान मिति। तथा च वचनद्वय निष्कृष्टार्थपर्यालोचनायां, वियुक्त विषये नवमी दशम्यन्यतरयुक्त रोहिणी सद्भावे-अन्यत्र सप्तमी रोहिण्याः सद्भावे असद्भावेवा नवमी दशम्यन्यन्तरयुक्त रोहिण्यामेव जयन्त्यनुष्ठानं पर्यवस्यतीति अभिप्रेत्यैव "नवमीयुक्त रोहिण्यां दशमी युक्तरोहिण्यां वा व्रतं कार्यम्" इत्युक्तमिति मन्तव्यम्।

इदमप्यत्रावधेयम् :—

"रोहिणीण्यामेव कुर्वीत" इत्यादि वचनं सप्तमी रोहिण्या अपि जयन्ती त्व प्रापकमेव। सङ्कोचक प्रमाणाभावे शब्दशक्तेरसङ्कोचनीयत्वात्।

नन्वस्ति सङ्कोचकं "अष्टम्यां वा नवम्यां वा···" इति वचनं इति चेत्; नात्र वचने अन्यत्र निषेधगर्भत्व मङ्गीक्रियते, येनोक्त वचनं सङ्कोचकं स्यात्। परन्तु, "रोहिण्या मेव कुर्वीत" इत्यादि वचनस्य, सिंहमासि सप्तमी प्रभृति दशमी पर्यन्त रोहिण्यास्संभाविततया, वियुक्तविषये पूर्वत्र नवम्यां वा दशम्यां वा यदा रोहिणी शुद्धा संभवति, उत्तरत्र सप्तम्याञ्च शुद्ध रोहिणी, तस्मिन् संवत्सरे कदा जयन्त्यनुष्ठानम्? इति विशये, पूर्वत्र नवमी दशमीयुक्तरोहिण्यामेव व्रतानुष्ठानं कार्यम्। न तूत्तरत्र। यदा च नवमी दशमी युक्त रोहिणी नास्तिसप्तमी युत शुद्ध रोहिणीमात्रं वर्तते, तदा सप्तमी रोहिण्यामेव व्रतं कार्यमिति आशयः इति मन्तव्यम्।

इति श्रीमद्वेदान्त रामानुजमहादेशिक कृतिषु
जयन्ती विशेषानुष्ठान निर्णयः

□□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋग्वेदे वर्णितम् वस्त्रनिर्माणम्

—डॉ० कैलाशनाथ द्विवेदी

ऋग्वेदोऽस्माकं भारतीय संस्कृतेः सभ्यतायाश्च पुरातनस्मारकोऽस्ति, यस्मिन् प्राचीन भारतीयज्ञान-विज्ञान कला धर्मदर्शनादितत्त्वानां समावेशः प्राप्यते। ऋग्वेदे वर्णितं वस्त्रनिर्माणमेव विवेचनीयमस्मिन् शोधपत्रे। जलवायोः प्रभावैः शरीरसंत्राणार्थं वस्त्राणि मानवस्य द्वितीयावश्यकावश्यकतायामागच्छन्ति। अतएव भौगोलिकानां[1] मतानुसारं विभिन्नस्थानानां प्राकृतिक वातावरणे समुपलभ्यान्यसामग्रीभिः (कार्पास तन्तुभिः) वस्त्राणां स्वरूपो निर्धार्यते।

विदुषां विचारोऽयं सर्वथा समीचीनः प्रतीयते यत् भारतीय वस्त्रनिर्माणोद्योगः विश्वस्मिन् प्राचीनतमोऽस्ति। कार्पासस्य मूलोद्गमक्षेत्रं भारतमेवासीत्, अतएव अत्र पंचसहस्रवर्षपूर्वं कार्पासिकानि वस्त्राणि[2] निर्मीयन्ते स्म। अस्मिन्नाधारे ऋग्वेदे वस्त्रनिर्माणसम्बन्धिसन्दर्भाः शोधात्मक दृष्ट्या विवेच्यन्तेऽस्मिन् शोधपत्रे।

सामान्यतः ऋग्वैदिके सप्तसिन्धुप्रदेशे द्विक्षेत्रयोः निम्नप्रकाराणि वस्त्राणि मानवीयावश्यकतायै आजीविकायै (अर्थोपार्जनाय) च अनुकूल भौगोलिकदशाधारे निर्मितानि आसन्।

(१) **ऊर्णि वस्त्र निर्माणम्**—ऋग्वैदिक सप्तसैन्धवप्रदेशस्य पश्चिमोत्तरीयपर्वतीयभागे सिन्धुनद्या अध्ववर्तिन्यामुपत्यकायां (गान्धार क्षेत्रे) शीताधिक्येन उत्तमोर्णवत्यः [3]गान्धार्यविका बहुसंख्याका आसन्, अतएव सुलभ्योर्णराशिना ऊर्णिवस्त्राण्यधिकं निर्मीयन्तेस्म। अपरञ्च [4]परुष्णीक्षेत्रमपि अविकानामूर्णोत्पत्तये प्रसिद्धमासीत्। अतः कम्बलादि ऊर्णिप्रावारकानां

---

१. Human Geography, John Brunshis, १९५७. p. ३२, मानव भूगोल, डा० एस० डी० कौशिक, मेरठ पृ० ४५९

२. Population & World Production, W. S. & E. S. Woytinskys, १९५३, P. ५९७.

३. ऋग्वेदे-१।१२६।७······रोमशा गान्धारीणामिवाविका।

४. ऋक्० ४।२२।२, ५।५२।९, १०।२६।६ वासो···वायोऽवीनां मा वासांसि मर्मृजत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निर्मितयेऽपीदं विश्रुतमासीत् । एषामूर्णिवस्त्राणामुपयोगः शीततौ क्रियते स्म ।[१]

(२) सूत्रि (तूल)-वस्त्रनिर्माणम्—प्रतीयते यत्पादपानां त्वक्तन्तुभिः कार्पासाद्यन्यतन्तुभिश्च सूत्रिवस्त्राण्यपि सप्तसिन्धुप्रदेशस्य जलोढ मध्यवर्तिसमतलीय भू-भागे हस्तवेमैस्तंत्रवापैर्वापदण्डैर्वा निर्मीयन्ते स्म यानि सामान्यतः 'वस्त्राणि'[२] 'वासांसि'[३] वा रूपे व्यवहृतानि । वस्त्राणीमानि स्त्रीपुरुषतन्तुवायाः वयन्तिस्म । इमानीदृशानि उत्कृष्टान्यधिकानि च निर्मितान्यासन् यत् [४]रेगोजिनमतानुसारमेषां वस्त्राणां बेबिलोनियासीरियादेशयोर्निर्यातः भवति स्मः, यत्र (बेबिलोनिया देशे) सिन्धुप्रदेशस्य मलमल्लकं (सूक्ष्मं तूल वस्त्रं) सिन्धुरिति नाम्नाति प्रसिद्धमासीत् ।

वस्त्रनिर्माणस्यविकासः सप्तसिन्धुप्रदेशे विविधाभिरनुकूलपरिस्थितिभिः (ऊर्णसूत्रयोः प्रचुरमात्रायामुपलब्ध्या, कुशल तन्तुवायानामुपभोक्तृणाञ्च सुलाभेन च दृष्टिगोचरो भवति । पुरुषतन्तुवायेभ्यः सामान्यतः स्त्रियो वस्त्रवयनस्य कार्यमधिककुशलतापूर्वकमकुर्वन्, यस्योल्लेखः[५] प्रत्यक्षाप्रत्यक्षरूपाभ्यामनेकस्थलेषु प्राप्यते । वस्त्राणां वयनकार्ये तन्तुवाया ईदृशा सिद्धहस्ता आसन् यद्वयनतन्तुः कदापि छिन्नं[६] न भवति स्म वयनितवस्त्रं च वारम्बारं वर्द्धमानं लम्बमानञ्च भवति स्म ।[७]

वस्त्रनिर्माणस्योपकरणानि प्रक्रियाश्च—ऋग्वेदे वस्त्रवयनस्य प्रक्रियाभिः सार्धं विविधान्युपकरणानि उल्लिखितानि सन्तियेषु तन्तुवायस्य वस्त्रवेमः[८] (हस्तवेमः, तंत्रवापः, वापदण्डं वा), तसरः[९] (त्रसरः, मल्लकी ढरकीतिलोकभाषायां वा), तान्त्वम् (ओतुः तानेति वा लोकभाषायां), तिर्यक् तन्तवः (वयनं वानेति वा लोकभाषायां) इत्यादीनि महत्त्वपूर्णानि सन्ति । एषामुपकरणानां साहाय्येन वस्त्राणि[१०] निर्मीयन्ते स्म ।

---

१. ऋक्०-१।३४।१, १।१३५।६ रोमाण्यव्यया (अर्णितन्तवः) ।
२. ऋक्० २।१४।३······सीमैरोर्णुत जूर्न वस्त्रैः ।
३. ऋक्० १०।२६।६······वासो वायोऽवीनां मा वासांसि ।
४. वैदिकइण्डिया, रैगोजिन प्र० सं, पृ० ३०६.
५. ऋक्०-२।३।६, ३८।४, ५।४७।६, ।
६. ऋग्वेदे २।८५।५ मा तन्तुश्छेदि वयतो······ ।
७. ऋक्० १०।१०६।१ वि तन्वायेधियो वस्त्राण्यसैव ।
८. ऋग्वेदे-९।७।१।९
९. ऋग्वेदे-१०।१३०।२ इमे······सामानिचक्रस्तसराणि ओतवे ।
१०. ऋक्० १०।१३०।३···इमे मयूचा उपसेदरू सदः सामानि चक्रुस्तसराण्योतवे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तान्तवोत्वोः सम्यक् ज्ञानं विना वस्त्रवयनमत्यन्तं कठिनमासीत्, यतोऽस्य दुरूहताया एकस्मिन् स्थले उल्लेखो[1] विद्यते। अयमुद्योग ईदृश उत्कर्षपूर्ण आसीत्, यत् प्रतीयते स्त्रीभिर्वयनीकृते वस्त्रेऽपि पश्चात् [2]सूचिकया कलात्मकमलंकरणमपि क्रियते स्म। कतिपयैः ऋग्वैदिक[3] सन्दर्भैरिमं तथ्यं [4]विश्वेश्वरनाथरे उ० पी० एल० भार्गवप्रभृतयो[5] विद्वांसोऽपि प्रतिपादितवन्तः।

समीक्षा—ऋग्वेदस्य अनेकसन्दर्भान् दृष्ट्वा विचारोपरान्ते निश्चिरूपेण कथयितुं शक्यते, यत् ऋग्वैदिक काले [6]सप्तसैन्धव प्रदेशे वस्त्रनिर्मितिरर्थकारिण्या आजीविकायाः रूपेऽत्यधिकलोकप्रियाऽऽसीत्, यतः यज्ञादिक्रियास्वपि[7] वयनस्य प्रतीकात्मकरूपे क्रियामारोप्य अस्याः समृद्धिपूर्णलोकप्रियतायाः प्रकारान्तरेण ऋषयः संकेतमकुर्वन्। रेगोजिनमहोदया-नामियमत्रधारणाऽपि तथ्यपूर्णा प्रतिभाति, यत् इतः (सप्तसिन्धु प्रदेशतः) वस्त्राणि प्रचुराणि निर्मितानि भूत्वा बेबिलोनियासीरियाप्रभृतिसमीपस्थ देशान् प्रति प्रेपितान्यासन्।

———

१. ऋक्० ६।९।२ नाहं तन्तुं न विजानाम्योतुं न यं वयन्ति समरेऽतमाना।
६।९।३ स इत्तन्तुं स विजानात्योतुं……।
२. ऋक्० २।३२।४, ५।५६।६, ७।३४।११, ८।३१।८, १०।१।४, १०।९२।४.
३. ऋक्० २।३२।४ सीव्यत्वपः सूच्याच्छिद्यमानया।
४. ऋग्वेद पर एक ऐतिहासिक दृष्टि, वि० ना० रे०, दिल्ली, १९६७, पृ० १९६।
५. India in the Vedic Age, Bhargava, Lucknow, १९७१, P. २६३.
६. द्रष्टव्यम् लेखकस्य डी० लिट्० शोधग्रन्थः "सप्तसैन्धवप्रदेश-ऋग्वेद के आधार पर भौगोलिक अध्ययन" पृ० ३१९ (कर्णपुर विश्वविद्यालयीय डी० लिट्० (साहित्य-वारिध) उपाधये १९७६ ई० वर्षे स्वीकृतोऽयं शोध प्रबन्धोऽनेक प्राच्यविद्याविद्भिः प्रशंसितः।
७. ऋक्० १०।१३०।१, ७।३३।९, १२।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अखण्ड देशात्मबोधः

(भारतीय संस्कृत-साहित्ये संस्कृतौ च)

—कु० केतकीनायक

अस्माकं मातृभूमिरियं नाम्ना भारतवर्षं सर्वजनहर्षप्रकर्षकारकं हिमवतो नगाधिराजात् कुमारिकान्तरीपं यावद् ब्रह्मपुत्रनदात् सिन्धुनदं यावत् सुविस्तृता सुविशाला कल्याणी स्वकीयमहामहिम्ना महसा च विराजतेतराम्। बहुभाषाभाषिणां भिन्नरुचीनां मानवानामियं मातृभूमिः वासस्थली। आर्य्याणामनार्य्याणाम्, द्रविडान्ध्रकिरातहूणपारसिकमहम्मदीय-ख्रीष्टीय-शिखधर्मिणा च वासस्थानमिदं भारतवर्षं विविध प्राकृतिकविभवैरादृतम्-नद-नदी-पर्वतारण्य-नगर-जनपदादिभिः समृद्धम्। प्रागैतिहासिककालादारभ्य अद्यावधि प्रोन्नतादर्शैः, ऐतिहासिककीर्त्ति-यशोराशिभिः अलंकृता या जन्मभूमिरस्माकं विराजतेतरां तस्यैं भूयो भूयो नमोवाकं निवेद्य सम्मिलितकरणैरस्माभिः "बन्दे मातरम्।" इति स्तूयते।

संस्कृतसाहित्ये प्रतिश्लोकं प्रतिवाक्यं भारतीयसंस्कृतिप्रवाहे च जन्मभूमिं प्रति निविडा प्रीतिः भक्तिः आत्मसमर्पण भावश्च प्रस्फुटितो भवति। अध्यात्मभावनायां भौतिकतायां चेयं जननीकल्पा मातृभूमिः भारतीयानां निभृतहृदिकन्दरे नित्यमाराध्यमाना विराजतेतराम्। अधुनातन जगति जीवने च वैशिष्ट्यमिदम् द्वयम्—

(क) जातीयतायाः उत्पत्तिः विकासश्च।

(ख) देशात्मबोधश्च (स्वदेशं प्रति भक्तिरसाधारणा।)

अयं जातीयतावोधोऽथवा देशात्मबोधो विश्वजनीनबोधस्य (Sense of universality) विश्वभ्रातृत्वबोधस्य च (Universal brotherhood) प्राथमिकसोपान इति यथार्थतो वक्तुं शक्यते। विश्वभ्रातृत्ववोधोऽयं नूनं मानवसमाजं प्रेरयति विश्वराज्यसमष्टिबोधे (Sense of World Federation) विश्वमानवतायाम् अचलास्थां श्रद्धां प्रति। आन्तर्जातिकताभावोऽपि जातीयतावादमपेक्षते। ऐकान्तिकदेशात्मवोधोऽयं प्रेरयति मानवान् आत्मस्वार्थादीनां विस्मृतिपूर्वकं बहुजनसमष्टिपु ऐक्यप्रतीतौ, वृहत्तरमानवसमाजकल्याण-सम्पादनप्रवृत्तौ च। अनेन एकत्ववोधेन मानवः सहान्यैः स्वमातृभूमिं प्रति भक्तिसेवार्घ्यं विनिवेदयति यथा-सर्वे देशवासिन एकस्या देशजनन्याः सन्तानाः।

आध्यात्मिक-नैतिक-धार्मिकचिन्ताप्रवाहाप्लावितमिदं सुविशालं संस्कृतसाहित्यं शाश्वतगभीरजातीयतावोधेन सुसमृद्धम्। अस्मिन् साहित्ये अथर्ववेदीयं पृथ्वीसूक्तं देशमातुः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभिवन्दनस्य समुज्वलोदाहरणम् यत्र परिस्फुरति स्वदेशं प्रति अनुरागस्य दाढर्चम्। येयं भारतजननी समुद्रं धारयति मेखलारूपेण सरिद्वरैः सुजला सुफला शस्यश्यामला ऋद्धिमती निर्झरशीकरैरविरल परिपूरिता सा सुविस्तृताभिः हिमवदादिपर्वतमालाभिः सततं स्वसन्तानवर्गं बाह्य शत्रुभ्यः परिरक्षति। जन्मभूमेरस्याः प्रसादात् देशवासिनः सर्वे रिपुभिरनुत्पीडिता अपराजेयाः सुखंनिराविलं भुञ्जाना निवसन्ति। सर्वविधमहौषधीनां जननी पूर्वं पुरुषाणां महतां लीलाक्षेत्रमियं जन्मभूमिः यत्र पूर्वजनाः संजाताः स्वपुराणकर्मभिः आदर्शपदवीम् अधिरूढा आसन्। विविधपशुपक्षिणां निवासस्थानं बहुभाषावादिनां भिन्नमतावलम्बिनामाश्रयस्थली इयं देशजननी कामधेनुरिव क्षीरधारारूपिणं वाञ्छितविभवं स्वसन्तानेभ्यः नित्यं प्रयच्छतितराम्। सूक्तस्यास्य पूतस्याध्ययनेन श्रवणेन मननेन निदिध्यासनेन च देशवासिनां चेतसि परिस्फुरति पुराणमय जातीयतावोधः, सर्वविधाः विद्वेषाः, भेदभावाश्च चेत.प्रदेशात् तिरोधानं भजन्ते। सुधियां पाठकमहोदयानामवगत्यर्थं कतिपयमन्त्रा अधस्तादुध्रियन्ते यैः भारतवासिनां पक्षे दैनन्दिनाराध्यपाठचरूपेण भवितव्यम्। अमीषां शाश्वतपंक्तिसमूहानां जातीयताबोधे दीप्रप्रेरणामूलकत्वात्।

(क) असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समः बहु।
नानावीर्या ओषधयो या विभर्त्ति पृथिवी नः प्रथतां राध्यतां नः ॥[1]

अस्माकं मातृभूमौ सत्यामपि मानवानां मध्ये निम्नोन्नतावस्थायाम् पारस्परिकं प्रभूतं साम्यं निविडञ्चैक्यं तथा अच्छेद्यो मैत्रीभावस्तेपु समुल्लसतिराम्। या देशमाता शक्तिमतीभिः विविधवनौपधिभिश्चकास्ति सा अस्माकं यशसः कीर्त्तेश्च वृद्धये हेतुर्भवतु। सा च सुविस्तृता भूमिः कृषिप्रभृतिभिरस्माकं मनस्कामनां परिपूरयतु॥

(ख) यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्त्तयन्।
गवामश्वानो वयसश्च विष्ठा भगं वर्च्चः पृथिवी नो दधातु॥[2]

अस्यां जन्मभूमौ प्राचीनकाले पूर्वपुरुषाः (ब्राह्मणाः स्वकीयैर्ज्ञानस्तोमैः, क्षत्रियाः स्वक्षात्रचर्य्यैः, वैश्याः वाणिज्यकौशलेन, शूद्राश्च कर्म्मकाराः शिल्पकौशलैः कारुभिः विविधसेवाव्रतैः) बहुविधमहनीय कार्म्माणि सम्पादितवन्तः। अस्यांमातृभूमौ देवाः (देवगुण संपन्ना वीराश्च) असुरान् (असुरस्वभावसंपन्नान् हिंस्रकांश्च दुर्जनान्) विनाशितवन्तः। सेयं देशमाता अस्मभ्यं ज्ञानं, विज्ञानमैश्वर्य्यं ददातु, तानिच वर्द्धयतु।

(ग) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।
यस्यामिदं जिन्वति प्राणदेजत् सानो भूमिः पूर्वतोये दधातु॥

---

१. पृथ्वी सूक्तम्-अथर्ववेदे-१२।१।२
२. तत्रैव अ. वे. १२।१।५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्माकं मातृभूमौ समुद्राः, नदनद्यः, निर्झराः, कूपतडागादयो जलाशयाः शोभन्ते, सर्वविधानि शस्यानि च प्रजायन्ते। यत्र सर्वविधाः प्राणिनः सुखेन सन्तिष्ठन्ते। कृषिकाश्च प्रवीणाः कृषिकर्मणि सन्ति तथा अपरे जना अपि उद्योगिनः भवन्ति, सा जननी भूमिरस्मभ्यं नित्यं उत्तमभोग्यपदार्थं ऐश्वर्य्यञ्च प्रयच्छतु।'

(घ) गिरयस्ते पर्वता हिमवन्तोऽरण्ये ते पृथिवि स्योनमस्तु।
वभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।
अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ॥११॥ (तत्रैव)

अस्यमन्त्रस्य तात्पर्य्यमिदम्-कविः पृथिवीं जननीभूतां प्रार्थयते हे पृथिवि ! तव पृष्ठे गिरयः हिमवत् पर्वतमाला अरण्यानी च सुविस्तृतास्तिष्ठन्ति। तत्र न कदापि तव शत्रवः सन्तु। (तानि तानि स्थलानि शत्रुरहितानि भूत्वा सर्वान् पालयन्तु पोषयन्तु च। या पृथिवी वभ्रु=सर्वेषां भरण पोषणकर्त्री, कृष्णां=कृषिकर्मसु उपयुक्तां रोहिणीम्=वृक्षादीनाम् उन्मादयित्री विश्वरूपां=बहुरूप धारिणीम्, ध्रुवां=स्थिराम् इन्द्रगुप्ताम्=इन्द्रेण देवराजेन सुरक्षिताम् मातृभूमिमध्युष्य वयं सुखिनो भवाम। न कदापि शत्रुभिः अभिभूयमानाः भवाम। एवञ्च अपराजिताः, अनाहताः, अनुत्पीडिताश्च भूत्वा वयं राष्ट्रमिदं स्वाधिकारे-रक्षामः जीवने सुप्रतिष्ठिता भूत्वा।

(ङ) जनं विभ्रतो वहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्।
सहस्रधारा द्रविणस्य मेदुहां ध्रुवेव धेनुरनपस्फुरन्ती ॥४५॥

आत्मोन्नतये विविधधर्मानाचरतो वहुभाषाभाषिण जनान् धारयन्ती इयमविनश्वरा पृथ्वी ध्रुवा विराजते यथा एकं गृहमनेकान् मानवान् विभ्रत् शोभते। (एकस्मिन् गृहे परिवार-भूता आश्रिता जना इव अस्यां मातृभूतौ वहुभाषावादिनो वहुधर्मावलम्बिनो लोका कुटुम्बिन इव तिष्ठन्तीत्यर्थः।) यथा प्रसन्ना कामधेनुः क्षीरधारां वितरति तथा विनाशरहिता अचलेयं भूमिरस्मभ्यं सहस्रधा विभवधारां प्रयच्छतु इति ऋषेः प्रार्थनम्।

(च) ये ग्रामा यदरण्यं याः सभा अधि भूम्याम्।
ये संग्रामाः समितयस्तेषु चारु वदेम ते ॥५६॥

हे मातृभूमे—त्वयि ये ये ग्रामा यानि अरण्यानि सन्ति, यत्र वा युद्धं संघटते, न्याय सभा वा विधीयते यत्र समितयः सन्ति तत्र तत्र वयं तवविषये चारुतया वदेम त्वां शोभनया गिरा स्तुमः।

(छ) सूक्तस्यास्यान्तिमभागे ऋषिरोराग्यलाभार्थं शक्तिप्राप्तये दीर्घायुर्लाभार्थं

१. तत्रैव अ. वे. १२।३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रार्थयते—

उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः।
दीर्घं न आयुः प्रतिवुध्यमानाः वयं तुभ्यं वलिहुतः स्याम ॥६२॥

हे पृथिवि ! त्वत्तो जाताः सर्वे प्राणिनः-नीरोगास्तथा क्षयरोगरहिता भूत्वा अस्माकं समीपे सन्तु। दीर्घमायुः अस्माकं भवतु। वयं ज्ञानविज्ञानयुक्ता भवेम। तुभ्यं वलि पूजोपकरणम् उपहरामः, त्वाञ्च पूजयामः।

(ज) भूमे मातः निधेहि मा भद्रया सुप्रतिष्ठितम्।
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् ॥६३॥

हे मातर्भूमे ! भद्रया कल्याणमयीवुद्धया मां सुप्रतिष्ठितं (तत्वेन) सुस्थिरं निधेहि रक्ष इत्यर्थः। दिवा (=प्रतिदिनं) मां संविदानां समस्तविषये ज्ञातारं कुरु। हे क्रान्तदर्शिनि मां पृथिव्यां श्रियं धेहि ॥

× × ×

ऋग्वेदीय नदीसूक्ते (१० मण्डलस्य ७५ तम सूक्ते) सप्तनदीनां वर्णनेन आर्ये भारतस्य जातीयतावोधः सर्वप्रथमतः उन्मेषितः॥ वैदिकसाहित्ये भारतवर्षमिदं आर्य्यावर्त्त इति संज्ञितम्, (साम्प्रतिकमुत्तरभारतं) यत्र प्रथमतो वसतिः स्थापिता आर्य्यैः। आर्य्यावर्त्त-देशोऽयं विन्ध्यहिमवतो मध्यभागे विद्यते यत्र ऋग्वेदवर्णिताः सप्तनद्यः प्रवहन्ति। नामोल्लेख-पूर्वकं तासां नदीनां वन्दनं कृतमृषिणा—

इमं मे गंगे यमुने सरस्वति
शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयाजीकीये श्रृणुह्यासुषोमया॥

अर्थात् हे गङ्गे हे यमुने हे सरस्वति ! हे शुतुद्रिनदि ! परुष्णिनदि युष्माभिः सर्वाभिः ममेदं प्रार्थनं गृह्यताम्। हे मरुद्वृधे ! असिक्नीवितस्ता-आजीक्या-सुषोमाभिर्युक्ता मम प्रार्थनं श्रृणु[1]।

कालक्रमेण यदा आर्य्याः समग्रेऽस्मिन् भारतवर्षे अधिष्ठिता वभूवुः, तदा पुराणेषु

१. अत्र शुतुद्रि=सट्लेज् नदी; परुष्णी=रावी नदी; असिक्नी=चेनाव नदी; मरुद्वृधा =असिक्नीवितस्तयोर्मिलितप्रवाहः; वितस्ता=झेलम् नदी अथवा ग्रीक्देशीयैरियं Hydaspes इति उक्ता आसीत्; आर्जीक्या=विपाशा नदी। सुषोमा=सिन्धुनदः (Indus) इति अवगन्तव्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अविभक्तस्य भारतवर्षस्य सर्वेषां नदीपर्वत जनपदादीनां वर्णनं कृतम् । अस्माकं नित्यनैमित्तिक-कर्मस्वपि अस्माभिरेकस्मिन् श्लोके भारतवर्षस्य उत्तरदक्षिण भागयोर्नदीनां नामोच्चारण-पूर्वकं अस्मद्देशस्याखण्डत्वं समुपलभ्यते । यथा—

गंगे च यमुने चैव गोदावरि सरस्वति !
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

गंगा यमुना सरस्वतिगोदावरीकावेरीसिन्ध्वादीनां नदीनाम् एकत्र समावेश एकस्मिन्कलशे प्रार्थ्यते उपासकेन ।

प्रातः स्मरण स्तोत्रेष्वपि भारतवर्षस्य सप्तनगर्य्यः नामभिरुच्चार्य्यन्ते । इमा नगर्य्यः कालमतिक्रम्य इतिहासेषु पुराणेषु च स्वकीयं गौरवमावहन्ति ।
यथा—

"अयोध्या मथुरा माया काशीकाञ्चीह्यवन्तिकाः,
पुरी द्वारवती चैव सप्तैतामोक्षदायिकाः[१] ।" इति ।

एकस्मिन्नपि श्लोके प्रातः स्मरणीये भारतवर्षस्य सप्तकुलाचलाः पुराणेषु पठचन्ते-येन देशस्यैक्यं सुस्पष्टं प्रस्फुटितं भवति यथा

महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः,
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।

महेन्द्र=पूर्वघाटे गन्जामप्रान्तस्थितः पर्वतः । मलयः=पश्चिमघाटस्य दक्षिणांशे ऽवस्थितः । सह्यः=पश्चिमघाटस्योत्तरांशे विद्यते । ऋक्षः=विन्ध्यपर्वतस्य पूर्वांशे वर्तमाना पर्वतमाला, पारियात्रः=विन्ध्यस्य पश्चिमांश इत्यवधेयः ।

भारतवर्षस्य चत्वारि सुप्रसिद्धानि तीर्थानि वदरिका, उत्तरस्यां दिशि, रामेश्वरम् दक्षिणस्यां, द्वारका पश्चिमायां तथा पूर्वस्यां दिशि जगन्नाथतीर्थं अस्य देशस्या-खण्डत्वं प्रतिपादयन्ति । चत्वारि तानि प्रख्यातसरांसि पम्पा, विन्दु, नारायण, मानसञ्चेति यथाक्रम मस्मद्देशस्य दक्षिणपूर्वपश्चिमोत्तर भागेषु विद्यन्ते । श्री शंकराचार्य्य प्रतिष्ठा-पिताश्चत्वारः मठा अपि समग्रं भारतवर्षमैक्यसूत्रेणावध्नन्ति । ज्योतिर्मठश्चोत्तरभागे,

---

१. अयोध्या=सांप्रतिकायोध्यानगरी, मथुरा, माया=हरिद्वार, काशी=वाराणसी, काञ्ची=Conjeevaram, अवन्ती=उज्जैन; द्वारवती=द्वारका—इमा नगर्य्यः भारतस्यास्य विविधप्रान्तेषु देदीप्यन्ते । अनेन श्लोकेन भारतवर्षस्याखण्डत्वं प्रकाश्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शारदामठस्तु पश्चिमभागे, शृङ्गेरीमठः दक्षिणस्यांदिशि तथा गोवर्द्धनमठः पूर्वभागेऽवस्थिता जीवशिवयोरभेदात्मकम् अद्वैतवेदान्ततत्वं प्रतिपादयन्ति ।

भारतवर्षे सर्वत्र समाजे वर्णाश्रमधर्माः पाल्यन्ते । जन्मतः मरणं यावत् भारतवासिनो धर्मशास्त्रोपदिष्टसंस्कारैः संस्क्रियन्ते । शिवचतुर्दशी, जन्माष्टमी (श्रीकृष्णजन्मोत्सवः), दुर्गापूजनसमारोहः, रामनवमी, गुरुपूर्णिमादीपावली प्रभृतय उत्सवा अस्मिन्देशे सर्वत्र अनुष्ठीयन्ते । महम्मदीयानां इद्व्रतम्, ख्रीष्टधर्मावलम्बिनां ख्रीष्टजन्मदिवसस्तत्तत्संप्रदायिभिः सर्वत्र परिपाल्यते । विविधधर्माबलम्बिनां महोत्सवेषु हिन्दवो हार्द्दिकीं श्रद्धामपि ज्ञापयन्ति ।

"अतिथिस्तु नारायणः स्वयं", "पिता धर्मः पितास्वर्गः पिता हि परमंतपः, पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः", "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" "पतिरेव गुरुः स्त्रीणा" मित्यादिसुपरिचित वाक्येषु भारतवासिनाम् अतिथेयता पितृमातृभक्तिः पातिव्रत्यानामविच्छेदधर्मत्वं संसूच्यते । भारतमिति पदस्य व्युत्पत्तिगतोऽयमर्थः-भायां= ज्योतिषु रतम् — ज्ञानालोकपरायणा इमे भारतवासिन आत्मतृप्त्यै जगदधिनायकनारायणस्य च परितुष्टिहेतुतया कर्त्तव्यानि आचरन्ति यानि सर्वजनसुखाय सर्वजनहिताय सम्पद्यन्ते । भक्तिरसात्मकं श्रीमद्भागवतम्, महाभारतं, रामायणञ्च अस्माकं जातीयग्रन्थाः सर्वासु प्रादेशिक भाषासु अनूदिताः गृहे गृहे पठ्यन्ते श्रूयन्ते, तत्तद्ग्रन्थोपदेशाश्च परमनिष्ठया परिपाल्यन्ते । रामायणवर्णिताः पारिवारिकादर्शाः, समग्रभारतीयजातिं स्वजीवनम् उन्नतमार्गे परिचालयितुं प्रेरयन्ति । वस्तुतः रामायणीयादर्शमार्गेण अस्माकं जातीय जीवनं सामाजिक-स्थितिश्च विनिर्मिता । भारतीया महनीया महिलाः काङ्क्षन्ति सीतेव सतीत्वं पातिव्रत्यञ्च स्वकीयजीवने प्रकटयितुं, तदर्थं आप्राण चेष्टया ता यतन्ते । भारतीयाः पुरुषा रामचन्द्र इव पुण्यमाचरितुं सततम् उद्यमशीला भवन्ति ।

अनवद्या संस्कृतभाषा एवास्माकं जातीयभाषा या सर्वासां वंगोत्कलासमीया हिन्दीतेलुगुतामिलादिभाषाणाम् उत्पत्तिस्थलम् । संस्कृतभाषाया सर्वा इमा आधुनिक-भारतीयभाषाः सुसमृद्धाश्च । यद्यपि १९५५ क्रीस्ताब्धे भाषाभित्तिकप्रदेश संगठनं भारत-सर्वकारेण सम्पादितं तथापि आञ्चलिकभाषासु सूत्ररूपेण इयं संस्कृतभाषा विराजतेतराम् । तथाहि संस्कृतभाषिजनानां कृते इमाः आधुनिकभारतीयभाषा बोधगम्या भवन्ति सहजतया । विदेशीयांग्लभाषापेक्षया संस्कृतभाषा एव भारतीयानां पक्षे अधिकतरसरला बोधगम्या शिक्षणीया च भवति इति वचनं अधिकोक्तिरेव ।

शिवविष्णु दुर्गागणेशसूर्या इति पञ्चदेवोपासनं भारतवर्षे परब्रह्मज्ञानेनानुष्ठीयते । अस्मिन् देशे तीर्थानि देशवासिनां ऐक्यबोधे प्रेरयन्ति । काश्मीरवासिनोऽपि जना आत्म-कल्याणार्थं जगन्नाथक्षेत्रंरामेश्वरतीर्थमथवा वाराणसीं द्वारकां वा परिभ्रमन्ति । दाक्षिणात्य-वासिनोऽपि उत्तरभारते तीर्थपर्य्यटनं कुर्वन्ति । भारवर्षीयाः सर्वे विविधानि तीर्थानि सेवमानाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वात्मानं पवित्रयन्ति। शिवस्याधिष्ठानभूमयः समग्रभारतवर्षे व्याप्ताः। विशेषतो द्वादश-ज्योतिर्लिङ्गानि तेषामधिष्ठानभूमयश्च सर्वेषां भारतीयानां चिरोपास्याः। शक्तेः एक-पञ्चाशत्पीठानि ज्वालामुखीकामाख्यादिस्थानेषु परिव्याप्तानि भारतवर्षस्य एकत्वं सूचयन्ति।

भक्तिरेव भारतीयजातीयजीवनस्य मूलभित्तिः। व्यावहारिकाध्यात्मिकजीवनयोः सर्वविधकार्य्याणि भक्तिमूलकानि। अत्रत्यनराः भगवत्प्रीतये सर्वाणि कर्माणि सम्पादयन्ति।

प्रातः प्रभृति सायाह्णं। सायाह्णात् प्रातरन्ततः।
यत् करोमि जगन्मातस्तदेव तवपूजनम्॥ इति

मन्त्रोऽयमुत्सारितः भक्तिपूतहृदयेभ्यो भारतवासिनाम्। अपि च जनैः प्रार्थ्यते परमेश्वरः संसारयात्रारम्भः भगवत्प्रीतये क्रियते[1] इति।

भारतीयाः ख्रीष्टीया महम्मदीयाश्च अपरदेशसंप्रदायिभ्य अधिकतरा, धर्मप्राणास्तप-पूतजीवना भक्तिपरायणाश्चेति परिलक्ष्यन्ते। यत्र पूतभागीरथीधारा प्रवहति, यत्र हिमवद्-विन्ध्याद्रयो विस्तृतास्तस्य साधनापीठस्य तपः स्थानस्य भारतवर्षस्यालौकिकीयं महिमा यदेतद् देशप्रसूताः सर्व एव मानवा भक्त्यनुप्राणिता भवन्तीति वक्तुं युज्यते। सुष्ठूक्तं श्रीमद्विष्णुभागवतग्रन्थे—

"किरात-हूणान्ध्र-पुलिन्द-पुल्कसा
आभीर-कङ्का यवनाः खसादयः।
येऽन्ये च पापा यदुपाश्रयाश्रयाः
शुध्यन्ति तस्मै प्रभविष्णवे नमः॥

(श्रीमद्भागवते २।४।१८।)

किराता हूणाआन्ध्रदेशीया पुलिन्दाः पुल्कसा (चण्डाला अपि) आभीराः कंकदेशीया यवना खसजातीया सर्वे जना विश्वेश्वरं भगवन्तमाश्रित्य तमेवाराध्यात्मशुद्धिं सम्पादयन्ति। प्रभावशालिने तस्मै भगवतेनमः। अत्र खस=खासिआपर्वतवासिनः (आसामप्रान्ते), आन्ध्राः= द्रविडाः तैलंगवासिनः, यवनाः=ग्रीक् पारसीकारवीय प्रभृतयः, ये भारतवर्षमागताः, हूणाः=कनिष्कराजसमये एतद्देशमागताः। भारतवर्षमागत्य एते सर्वे भारतीयसंस्कृतिपरिसरे वर्द्धिता भारतीयभक्तिपूर्ण-वातावरणे संस्कृता भक्तिमया भगवत्परायणा भवन्ति, पूत

१. लोकेश चैतन्यमयाधिदेव
श्रीकान्त विष्णो भवदाज्ञयैव
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये।"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चरित्राश्च भवन्ति इति सुनिश्चितं ब्रूमः । श्रीमता कविवरेण वेङ्कटाध्वरिणा ख्रीष्टीयषोडश-शताब्द्यां प्रणीता विश्वगुणादर्शचम्पूः अस्य देशस्य विविधतीर्थ-सरित्-प्रदेशादिवर्णनपुरःसरमखण्डदेशात्मबोधभावनां परिस्फुटयति । बदरिकायोध्यागंगानद-काशी-गुर्जर-महाराष्ट्र-कर्णाटकान्ध्र-श्रीरंगपत्तन-काञ्ची नगर्यादिवर्णनेनास्य देशस्य माहात्म्यं महत्त्वञ्च प्रकटीकृतम् । विशेषतस्तस्मिन्नेव ग्रन्थे वर्णितमस्ति यत् स्वर्गादिलोकप्राप्तये आत्मशुद्धये च विविध-देशस्थितानि तीर्थानि पर्य्यटन्ति, विविधप्रदेशान्परिभ्रमन्ति च सज्जनाः अध्यात्मभावनाप्रेरिताः सन्तः । अंगान्वंगान्, कलिङ्गान्, मगधकुरुन्, कर्णाटान् केरलान् इति विविधदेशान् परिभ्रम्य ते मुक्तिकामिनः पुण्यमर्जयन्ति । [1]अस्मिन् श्लोके भारतवर्षस्य सर्वे प्रदेशा उल्लिखिताः सन्ति येषां माहात्म्यं गौरवञ्च अस्य देशस्यैक्यज्ञापकम् । तीर्थसेवनेन जनाः भारतैक्यमनुभवन्ति च ।

भारतवर्षस्य महिम्नोगानम् —

विविधपुराणेषु भारतवर्षस्य महिमा प्रतीयते । स्वर्गभूमेरपि भारतभूमिश्चेयं गरीयसीति तत्र तत्र प्रतिपादितम् । ईश्वराराधनार्थं स्वर्गौकसो देवा अपि पूण्यभूमौ कर्म्मभूमौ भारतवर्षे जन्म लब्धुं वाञ्छन्ति इति विष्णुपुराणे (२.३.२४) तमश्लोके ख्याप्यते । यथा

"गायन्ति देवा किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पद-मार्ग भूते
भवन्ति भूयः पुरुषाः समन्तात् ।।२४।।

कर्माण्यसंकल्पित-तत् फलानि
संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्ममहीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति ।।२५।।

स्वर्गवासिनो देवा निरन्तरम् गानमिदं कुर्वन्ति—ते खलु पुण्यवन्तो जनाः स्वर्गमोक्षयोः साधिकायां भारतभूमौ संजाताः, ये कर्मभूमावस्यां जन्मलब्ध्वा स्वोपार्जित कर्मफलाकांक्षारहिताः सर्वेकर्म्माणि परमेश्वराय समर्प्य निर्मलान्तःकरणा भवन्ति—ततः अनन्तपुरुषे परब्रह्मणिलीना भवन्ति । देवेभ्योऽपि ते महनीया मानवा धन्यतराः ।

---

१. अङ्गान् वङ्गान् कलिङ्गानथमगध-कुरुन् कोसलान् केकयान् वा
काशमीरान् कुन्तलान् वा यवनजनपदान् किं च पाञ्चालदेशान् ।
नेपालान् केरलान् वा कतिचन कृतिनः पाण्ड्य—तुण्डीर-चोलान्
कर्णाटान् गौड-लाटान् परगतिघटना-लम्पटाः पर्यटन्ति ।।१४६।।
(विश्वगुणादर्श चम्पूकाव्ये ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि च—

जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्याः
ये भारते नेन्द्रिय विप्रहीनाः ॥२६॥ तत्रैव।

देवा वदन्ति—"वयं न जानीमहे यद्यस्माकं स्वर्गप्रदं कर्म यास्यति क्षयं तदा वयं क्व संजनिष्यामः। स एव पुरुषो धन्यो यो भारतभूमावुत्पन्नो, न इन्द्रियशक्तिहीनः परन्तु इन्द्रियशक्त्या संदीपीतो भूत्वा धर्मकार्याणि आचरन् भगवदुपासनं करोति।

श्रीमद्विष्णुभागवतपुराणेऽपि (५।१६।२०) तमश्लोके उक्तमस्ति—देवा भारतवर्ष-समुत्पन्नं मानवं भूयो भूयः प्रशंसन्ति।

अहो बतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्द सेवौपयिकं स्पृहा हिनः ॥२०॥ तत्रैव

एतदेव भारतभूखण्डजातानां कृतार्थत्वम् यद्देवैः कीर्त्यते—यदर्थं मनुष्यजन्मलाभेऽपि देवाः स्पृहां चेतसि पोषयन्ति। भारतीयानां सा एव कृतकार्य्यता—तेषां तत्र जन्म लाभ इति-यतः तैर्मोक्षदविष्णुसेवोपयोगि मनुष्यजन्म लब्धम्—तैः किं पुण्यकर्म संपादितम् आहोस्वित् स्वयं नारायणः स्वतः प्रसन्नो भवति। महता पुण्यफलेनाथवा भगवत् प्रसादेन भारतीया भारतवर्षे संजाता श्रीहरिसेवामाचरन्ति।

अपि च

"किं दुष्करैर्नः क्रतुभिस्तपोव्रतैः
दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायण पाद-पङ्कज-
स्मृतिः प्रमुक्तातिशयेन्द्रियोत्सवात् ॥"

(तत्रैव)।

देवा वदन्ति—"दुष्करैर्यज्ञैः तपोव्रतदानादिभिर्लब्धेन तुच्छ स्वर्गवासेन अस्माभिः किं वा फलं सम्पादितमस्ति? यतः अस्मिन् स्वर्गलोके अस्माकं नारायणपादपद्मस्मरणं न भवति, प्रत्युत अत्यधिकेन्द्रियोत्सवात् भगवत् पदारविन्दस्मृतिरस्माकं मनसो विलुप्यते।

"कल्पायुषां स्थानजयात् पुनर्भवात्
क्षणायुषां भारतभूजयो वरः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षणेन मर्त्येन कृतं मनस्विनः
सन्न्यस्य संयान्त्यभयं पदं हरेः ॥

(तत्रैव)।

देवानां परमायुः कल्पान्तव्यापि। यत् स्वर्गस्थानं विविध पुण्यैस्तैर्लब्धं तस्मादपि भ्रष्टा भूत्वा ते पुनर्जन्म प्राप्स्यन्ति। अतएव स्वर्गस्थानस्यास्य जयादल्पायुषां मानवानां भारतभूमिलाभः श्रेयस्करः। यतः भगवद्भक्ता भारतवासिनः अल्पायुषा मरणशील देहमाध्यमेनापि स्वनुष्ठितं कर्म्म सन्न्यस्य भगवदपदपंकजे, विष्णोस्तत् अभयं परमं पदं प्राप्नुवन्ति। (द्रष्टव्यं-गीतायां-यद्गत्वा न निवर्तन्ते तद्धाम परमं मतम्)।

देवा वदन्ति—

"यद्यत्र नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद्
वर्षे हरिर्यद् भजतां शंतनोति॥"

(तत्रैव ५।१६।२७)।

देवैः प्रार्थ्यते—'वयं यज्ञानुष्ठान--मन्त्रोच्चारण--तपोव्रतादि--पुण्यकर्म्म फलेन स्वर्गसुखमिदमनुभवामः। सम्प्रति यदि तस्यैव पुण्यस्य यत्किंचिद् यद्यवशिष्यते तेनैव पुण्यफलेन यथा अस्माकं जन्म अजनाभे वर्षे (भारतवर्षे) भवेत्। अस्मिन् भारतवर्षे परमेश्वरो नारायणः स्वयं स्वभक्तजनानां कृते शं (कल्याणं) तनोतीति इयं स्मृतिर्यथास्माकम् इह जन्मनि वर्तताम्। भगवन्तं श्रीहरिम् अविच्छिन्नतया स्मरन्तो वयं दिवसान् यापयामो भारतवर्षे यतो भगवान् स्वभक्तानां कल्याणं संपादयति।"

तदेव देववन्द्यं भारतवर्षं वयं भूयोभूयः, प्रणमामः।

॥ वन्दे भारतमातरम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

•समाधिः

—श्रीरामनारायण त्रिपाठी

समाधानम् समाधीयतेऽस्मिन् मनो जनैः समाधीयते अनेन वेत्यादि निरुक्त्या सम्+आङ पूर्वकाद् डुधाञ् धारण पोषणयो[1]रित्यस्माद् धातोः उपसर्गे घोः किः[2] सूत्रेण भावे अधिकरणे करणे[3] वा किप्रत्यये कृते सति निष्पन्नः समाधिशब्दः समाधानावधानप्रणिधानचित्तैकाग्र्य मनः स्थिरीकरणादिपर्यायो लोकशास्त्रकोशैर्विभिन्नार्थेषु[4] प्रयुक्तोपि योगशास्त्रपरिभाषानुसारं योगमेवाङ्गिनमर्थमभिव्यनक्ति । उक्तञ्च भाष्यकृता-योगः समाधिः सच सार्वभौमश्चित्तस्य धर्मः[5], । समाध्यर्थकाद् 'युज समाधौ[6]' इत्यस्माद् सिद्धो योगशब्दोपि अन्वर्थतया समाधिरूपमर्थं भासयते । एवं समाधिर्योगारपर्यायः सिध्यति । उभयोः समानार्थकत्वाद् यथा योगश्चित्तवृत्ति निरोधः[7] समाधिश्चित्तवृत्तिनिरोध[8] इति । उक्तञ्च —

परं साख्यं परं ज्ञानं परं कर्मविरागता ।
परा भक्तिः समाधिश्च योगपर्यायवाचकाः[9] ॥

एवं तस्य प्रधानत्वेऽङ्गित्वे सिद्धेपि करणव्युत्पत्या समाधिः स्वात्मनः साधनत्वमङ्गत्वञ्च व्यनक्ति । अपि च योगसमाध्योरभेदो अङ्गाङ्गिनोरभेदविवक्षया व्युत्पत्ति निमित्तमात्राभिधानेन वा भवति किन्तु प्रवृत्तिनिमित्ततया भेदस्त्वस्त्येव यतो हि योगे भवति सर्वासु चित्तभूमिषु

---

१. जुहो० १०९२ उ० अ०
२. पा० सू० ३।३।९२
३. वाहुलकात् ।
४. समाधिरेकोगुणः, समर्थनम्, नीवाकः, नियमः ।
५. यो० सू० १।१
६. दिवादि० ११७७ आ० अ०
७. यो० सू० १।२
८. सि० कौ० दि० पृ० १९१
९. योगदर्शनाङ्के ७४ पृ० समुद्धृतम् ।

•. अस्मिन् विषये श्रीरणवीरकेन्द्रीय संस्कृत विद्यापीठ १९८०-८१ वर्षीये सारस्वत ज्ञान-महोत्सवे सम्पन्नमिदं व्याख्यानम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्वृत्तिनिरोधः ? समाधौ तु नैषा गतिः ? यद्यस्ति तर्हि असम्प्रज्ञाते एव । अतो भेदोऽङ्गीकार्य एव ।

यथा भक्तिः साध्यसाधनरूपा तथैव समाधिरपि उभयरूपेण वर्तते साध्यरूपः साधनरूपश्च । अङ्गरूपेणैव (साधनरूपेण) बहुशो वर्णितत्वात् प्रायशः तेन रूपेण सम्मानितत्वाच्च । साधनत्वेपि समाधिः सर्वसाधनान्यतमोऽन्त्यः सर्वेश्वर साक्षात्कारकरणचरमोपायः सर्वश्रेष्ठः सर्वमान्यः सर्वसिद्धान्त सम्प्रदायाभ्यर्हितः योगस्य चरमपरिणितिः । जाते च तस्मिन् योगिनां सर्वाणि साधनानि समाप्तिं यान्ति । अतएव समाधिः सर्वत्रादृतः ।

प्राधान्येन योगश्चतुर्धा-मन्त्रयोगो, लययोगो, हठयोगो, राजयोगश्च । उक्तञ्च योगतत्त्वोपनिषदि-मन्त्रयोगो लयश्चैव हठोऽसौ राजयोगकः । इति । तत्र मन्त्रयोगस्य अङ्गानिषोडश-भक्तिः, शुद्धिः, आसनम्, पञ्चाङ्गसेवनम्, आचारः, धारणा, दिव्यदेशसेवनम्, प्राणक्रिया, मुद्रा, तर्पणम्, हवनम्, बलिः । यागः, जपः, ध्यानम्, समाधिः इति । अत्र चरमरूपेण साक्षात्यकारोपायः समाधिरिति निरूपितम् ।

लययोगस्य नव अङ्गानि—यमः, नियमः, स्थूलक्रिया, सूक्ष्मक्रिया, प्रत्याहारः, धारणा, ध्यानम्, लयक्रिया, समाधिश्च, अत्रापि समाधिश्चरमत्वेनोपन्यस्तः ।

हठयोगस्य क्वचन सप्त अङ्गानि वर्णितानि । यथा हठयोगप्रदीपिकायाम्

षट्कर्मासनमुद्रा प्रत्याहारश्च प्राणसंयमः
ध्यानसमाधी सप्तैवाङ्गानि स्यु र्हठस्य योगस्य

योगचूडामणि-अमृतनाद-क्षुरिकोपनिषत्सु षडङ्गयोगो यथा

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समधिश्च षडङ्गो योग उच्यते ॥

उभयोः हठयोगयोः चरमोपायत्वेन प्रतिष्ठापितः । यद्यपि हठयोगस्य परिणतिः राजयोगे एव द्वौ मिथः पूरकावेव यथा गोरक्षपद्धतौ—

हठं विनाराजयोगो राजयोगं विना हठः ।
न सिध्यति ततो युग्ममानिष्पत्तेः समभ्यसेत् ॥ २।७६

हठयोग प्रदीपिकायान्तु उभयोः पर्यायत्वेन वर्णनं वर्तते

राजयोगः समाधिश्च उन्मनीच च मनोन्मनी ।
अमरत्वं लयस्तत्त्वं शून्याशून्यं परं पदम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमनस्कं तथा द्वैतं निरालम्बं निरञ्जनम् ।
जीवन्मुक्तिश्च सहजा तुर्या चेत्येकवाचकाः ।।[१]

यदि भावना वशात् भेदोऽङ्गीक्रियेत तर्हि राज योगस्य षोडशाङ्गेषु अपि समाधिश्चरमाङ्गत्वेनैवोपन्यस्तः ।

एतदतिरिक्तविविधसाम्प्रदायिकयौगिकक्रियासु भक्तिसाधनासु ज्ञानमार्गेषु क्रियायोगेषु विविधोपासनासु च मुमुक्षोः परमसाधनभूतस्य समाधेः समादरो ग्राह्यता च वरीयस्त्वेन वर्तेते। ऋते समाधेः अन्तःकरणनिरोधो न स्यात् निरोधाभावे मुक्तिर्दुर्लभा—मन एव मनुष्याणां कारणं बन्धमोक्षयोः । इति । एवं सर्वत्र समादृतेपि समाधौ यदि भेदोऽस्ति तर्हि तत्प्रक्रियायां तत्साधनसोपानेषु चैव न तु ग्राह्यताया आवश्यकत्वे ।

नाथसम्प्रदायानुयायिभिः षट्कर्मभिः शरीरमलं विशोध्य आसनाभ्यासेन रजोगुणजनितं देहस्य चाञ्चल्यं तमोगुणजनितं गुरुत्वं विक्षेपकारणीभूतं रोगं मनसश्च अस्थैर्यं अपनीय क्रमशः स्थैर्यं नैरुज्यं लघुतां च देहे सम्पाद्य प्राणायामेन नाडीचक्रं विशोध्य प्रत्याहारेण इन्द्रियाणि-वशीकृत्य मुद्राभिः कुण्डलिन्याः जागरणं विधाय प्राणवायोः सुषुम्णामार्गे प्रवेश्य षट्चक्रं विभिद्य धारणाध्यानसमाधिभिः शिवत्वमाप्यते । अस्मिन् सम्प्रदाये यमनियमौ योगाय नापेक्ष्येते । अतएव तैः अन एतौ द्वौ न गृह्येते ।

एतानि च षडङ्गानि क्रमशः स्वस्वोत्त राङ्गानां कारणानि सोपानभूमयश्च । विशेषश्चात्र हठयोगप्रदीपिकया विज्ञेयः ।

अष्टाङ्गयोगानुयायिभिः यमनियमासनप्राणायामप्रत्याहारधारणा ध्यानसमाधीन् क्रमशः अनुसेव्य परमात्मत्वमीयते । अत्र पञ्च आद्याः बहिरङ्गसाधनत्वेन अन्त्याश्च त्रयः अन्तरङ्ग-साधनत्वेन अपेक्षिताः वर्तन्ते । योगसूत्रं प्रतिपादयति विस्तरेण अस्यैव प्रकारस्य विधिम् ।

लययोगे सूक्ष्मक्रियया स्वरोदयं प्रसाध्य प्रत्याहारेण नादानुसन्धानं विधाय धारणया सह षट्चक्रभेदनं कृत्वा समाधिना सिद्धिमेति ।

केचनध्यानानुयायि नः शाण्डिल्यविद्यानुसेविनः ध्यानधारणासमाधीन् त्रीन् एव स्वीकुर्वन्ति । ते ध्यानधारणाभ्यां समाधिं उपलभ्य समाधिना मोक्षपथं प्रयान्ति ।

एतदतिरिक्तत्वेन समाधये अनेके अन्येपि ईश्वरप्रणिधानादयः पन्थानः उपदर्शिताः शास्त्रेषु तेऽत्र विस्तारभयान्नोपन्यस्यन्ते तत एव ते ग्राह्याः ।

——

इदानीं प्रथमतो विभिन्न शास्त्रानुसारं समाधेः स्वरूपमुपन्यस्यते पूर्वोक्तस्वरूपनिरूपणं

१. ह० यो० प्र० ४।३-४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्रकारै र्यत् कृतं तत् क्वचन साधनत्वमङ्गीकृत्य क्वचन साध्यत्वं तत्सर्वमनुपदमेव स्फुटी भविष्यति ।

ध्यानं यदा ध्येयावेशवशाद् ध्यानध्यातृदृष्टिशून्यं ध्येयमात्राकारं भवति, अर्थाद् ध्येयमात्रं गृह्णाति न तु ध्यातृध्यानध्येयादिविभागं तदा समाधिः । तद्ग्रहकाले तु ध्यानमिति ध्यान-समाध्योर्भेदः । अत एवात्यन्ताभ्यर्हितादिविषयेन्द्रियसन्निकर्षे ध्यानभङ्गो भवति न तु समाधिभङ्गः । अयं समाधि र्वृत्यन्तरनिरोधद्वारैव साक्षात्कारहेतुः । उक्तञ्च सूत्रकृता॰ तदेवार्थमात्रनिर्भासनं स्वरूपशून्यमिव समाधिः ३।३ सम्यग् आधीयते एकाग्री क्रियते विक्षेपान् परिहृत्य मनो यत्र स समाधिः, इति भोजानन्तदेवौ[1] । निगृहीतस्य मनसः श्रवणादौ तदनुगुण-विषये च समाधिः समाधानम्, वेदान्तसारः[2] ।

गौडपादः—

सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः ।
सुशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः[3] ॥

त्रिशिखिब्राह्मणोपनिषदि—

निर्विकारतया वृत्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिरभिधीयते ॥

योगशिखोपनिषदि—

अहमेव परं ब्रह्म ब्रह्माहमिति संस्थितिः ।
समाधिःसतु विज्ञेयः सर्ववृत्तिविवर्जितः ॥

गारुडे—

नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम् ॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते ॥[4]

पुनश्च गारुडे—

द्वादशध्यानपर्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु संयतो मुक्तः समाधिः सोऽभिधीयते ।
ध्येयमेव हि सर्वत्र ध्याता तल्लयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते । २४० अ०

---

१. यो० सू० ३।३
२.
३. प्र० ३।३७
४. ४४ अध्याये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्णुपुराणे—

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ ६।७।९०

योगवासिष्ठे—

इयं गुणसमाहारमनात्मत्वेन पश्यतः ।
अन्तः शीतलता यस्य समाधिरिति कथ्यते ॥ उपशमप्रकरणे

समाधिदशायां साधकः प्राणादिवायुं तदाश्रितमन्तःकरणं अभ्यास दाढर्येन वैराग्यतैक्ष्येण समाकृष्य आज्ञाचक्रे अर्थात् त्रिकुट्यां ज्योतिषि प्रवेशयति तदा निर्मुक्ताहङ्कारभावः विसृज्य सर्वग्रन्थि निर्वासनः, परमानन्दं अनुभवति। अस्या एव समाधिदशाया जीवात्मपरमात्मनोः संयोगः सूर्याचन्द्रमसोः सम्मेलनम्, शिवशक्त्योः सामरस्यम्, चित्तवृत्तिनिरोधो बा इति अन्यद् वा किमपि लक्षणं क्रियतां मूलतो विशेष भेदो न स्यात् ।

तदानीं स साधकः न किञ्चित् शृणोति न च किञ्चित् रूपं पश्यति न चापि किञ्चित् जिघ्रति नापि स्पृशति न किञ्चित् समीक्षते । केवलं ईशोऽहम् इति विचिन्त्यमानः परमानन्दस्वरूपः जरामरणरहितः शिव एव भवेत् ।

तदुक्तं सौरपुराणे द्वादशेऽध्याये—

ततोन्मनस्त्वं भवति न शृणोति न पश्यति ।
न जिघ्रति न स्पृशति न किञ्चिद् वा समीक्षते ॥
गुह्योदरादिस्थानेषु वायुं नासां विचिन्तयेत् ।
ईशोऽहमिति योगीन्द्रः परानन्दैकविग्रहः ।
जरामरण निर्मुक्तः शिव एव भवेन् मुनिः ।
गमनागमनाभ्यां यो हीनो वै विषयोज्झितः ।
एकान्तरोन्मनीभावः समाधिरभिधीयते ॥

सम्प्रज्ञातसमाधिः

स च समाधिर्द्विविधः सम्प्रज्ञातोऽसम्प्रज्ञातश्च तत्र सम्प्रज्ञाते समाधौ यद्यप्यन्तःकरण-वृत्तयो निरुध्यन्ते तथापि तदन्तःकरणं वृत्तिनिर्बीजत्वं नाधिगच्छति अपि तु सूक्ष्मरूपेण तिष्ठति अत एव ज्ञातृज्ञान ज्ञेय त्रिपुटी तत्र भासते । उक्तञ्च योगसुधाकरे—

ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृति विना ।
सम्प्रज्ञातसमाधिःस्याद् ध्यानाभ्यासप्रकर्षतः ॥ पृ० ११८

तत्रैप क्रमः-यदा साधकः प्राणायामप्रत्याहारधारणाध्यानैश्चित्तं सप्राणं त्रिकुट्याः विज्ञान-मयकोशापरनामधेयाया अधोभागे निवेश्य तेन सूक्ष्मात्सूक्ष्मतराणां सर्वेषां तन्मात्राणां गुणा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुणज्ञानमुपपद्यते। यद्यप्यत्र बाह्यज्ञानं स्वशरीरज्ञानञ्च न जायेते तथापि तदानीमेवं प्रतिभाति यदहं ससंज्ञः उद्बुद्धः सन् याथार्थ्येन सर्वं पश्यामि जानामि चेति। एतादृशी चित्तस्य बाह्यविषय-निवृत्ता सालम्बना एकाग्रावस्था एव सम्प्रज्ञातसमाधिरभिधीयते। सम्प्रज्ञाते सद्भूतोऽर्थः सात्त्विकी चित्तवृत्तिर्वा यत्र स सम्प्रज्ञातः। अथवा सम्यक् संशयविपर्ययराहित्येन प्रज्ञायते प्रकर्षेण ज्ञायते भाव्यस्वरूपं येन स सम्प्रज्ञातसमाधिः भावनाविशेषः। उक्तञ्च भाष्यकृता— यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबन्धनानिश्लथयति निरोध-मभिमुखं करोति स सम्प्रज्ञातो योग इत्याख्यायते। ६।६ एष च सालम्बनः समाधिः। यं कमप्यव-लम्बनमवलम्ब्यैव भवति। अयमेव सबीज-सविकल्प-सवितर्क-समापत्तिशब्दैरप्युच्यते। स च चतु-र्विधः सवितर्क-समाधिः सविचारसमाधिः सानन्दसमाधिः सास्मितासमाधिश्च। आद्यः विशेषेण तर्कणं शब्दार्थ ज्ञानविकल्परूपं यत्र सः। भेदं विनैव यत्र शब्दार्थज्ञानानामनुभूतिः (साक्षात्कारः) भवति यत्र स सवितर्कः। अर्थात् पृथिवीजलतेजो वाय्वाकाशस्थूलपञ्चमहाभूतानां भावना (साक्षात्कारः) शब्दार्थोल्लेखपूर्विका बाह्यविषयान् विनैव यस्याम् अवस्थायां जायते। समाधिस्थितौ सत्यां सर्गस्य उत्पत्तिस्थित्योः बुद्धिं गमयित्वा तद्भिन्नपरमात्मविचारप्रवृत्तिरेव वितर्कानुगतावस्था अथवा कारणान्वेषणपुरः सरं स्थूलात् सूक्ष्मे प्रवेश एव वितर्कः। अत्र वितर्कादयश्चतस्रो दशाः तिष्ठन्ति।

द्वितीयः—विशेषेण चारः (सूक्ष्म वस्तुपर्यन्तसञ्चारः) यत्र सः। अर्थात् यस्यामवस्थायां चित्तं सूक्ष्म वस्तुपर्यन्तं सञ्चरति स सविचारः। अत्र तन्मात्राणां साक्षात्कारो भवति। अत्र बहिर्विषयस्य स्थूलविषयस्य वा धारणा न तिष्ठति सूक्ष्मरूपेण केवलं ज्ञातुर्जीवस्य ज्ञानशक्तेः ज्ञेयस्य परमात्मन इति त्रयाणां विचार एव तिष्ठति। अस्यां दशायां विचारः, आनन्दः अस्मिताचेतित्रयाणां सद्भावः।

तृतीयः—साधकस्य सात्विकाहङ्कारजन्या दशेन्द्रियविषयकभावनावस्थैव सानन्द-समाधिः। इन्द्रियाणां सुखस्वरूपत्वात् ? इन्द्रियेषु हीनसत्वयुक्तत्वात् सुखभावना प्रावल्यम्। आनन्दरूपायामस्यां दशायां विचार रहितः आनन्दो वर्तते केवलमानन्दः अस्मिता च तिष्ठतः। वितर्कविचारदशापेक्षया समुन्नतेयंदशा।

चतुर्थः—इन्द्रियजन्या अहङ्कारोपाधिका बुद्ध्यहङ्कार प्रकृतिपुरुषान्यतमविषयिणी अहमस्मीत्याकारा साधकभावना सास्मितासमाधिः। अस्यां दशायां केवलम् अस्मिताज्ञानमेव तिष्ठति केवलं स्वसत्ताभानातिरिक्तं किञ्चन न बुध्यते। इयं दशा पूर्वदशात्रयादुन्नता।

क्रमशश्चेयं चतुर्विधा सम्पद्यते तदुक्तं योगदर्शनाङ्के—

समाधिभूमौ प्रथमं वितर्कः किल जायते।
ततो विचार आनन्दानुगता तत्परा मता।
अस्मितानुगता नाम ततोऽवस्था प्रजायते॥

अयञ्च चतुर्विधः सम्प्रज्ञातसमाधिः प्रकारान्तरेण त्रिविधः ग्राह्यग्रहणग्रहीतृसमापत्ति-भेदात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्राह्यसमापत्तिः—स्थूलसूक्ष्मोभयग्राह्यस्वरूपाकाराविभासनं यत्र सा ग्राह्यसमापत्तिः। अत्रैव सवितर्क सविचारसमाध्योरन्तर्भावः।

ग्रहणसमापत्तिः—गृह्यन्तेऽर्था एभिरितिग्रहणानि इन्द्रियाणि तदाकारनिर्भासनं चित्तस्य यत्र सा ग्रहणसमापत्तिः। इयमेव सानन्दसमाधिरिति कथ्यते।

ग्रहीतृसमापत्तिः—गृहीता अस्मितास्पदं पुरुष एव। तदाकारेण चित्तस्य निर्भासनं यत्र सा ग्रहीतृसमापत्तिः। असावेव सास्मिता समाधिः।

समापत्तिः साक्षात्काररूपवृत्तिः समापत्तिरिति साक्षात्कारसंज्ञा इति नागोजीभट्टः। सेयं संप्रज्ञाताख्या समापत्तिः अवान्तरभेदाच्चतुर्धा—सवितर्का निर्वितर्का सविचारा निर्विचारा च। आद्ये द्वे स्थूलविषये। अन्त्ये च द्वे सूक्ष्मविषये। सवितर्का शब्दार्थज्ञानविकल्पसंकीर्णा निर्वितर्का अर्थमात्रनिर्भासा ध्येयाकारभावयुक्तेति यावत्। अत्र पूर्वापेक्षया उत्तरा उत्कृष्टा। सा किल सविचारा यत्र साधकः समाधिं द्वारीकृत्य सूक्ष्मभूताश्रयेण आत्मनोऽनुभवमात्र-मनुष्ठातुं शक्नोति। निर्विचारावस्थायां सूक्ष्मभूतादीनां संबन्धो न तिष्ठति केवलं परमात्मन एव संबन्धेन समाधिरनुष्ठीयते। इति संक्षेपेण सम्प्रज्ञातसमाधेर्विवेचनम्।

असम्प्रज्ञातसमाधिः—

सम्प्रज्ञाते समाधौ पूर्णे जाते सति यदा साधको अग्रे सरति तदानीम् अन्तःकरणे वहिर्जगतः पूर्णरूपेण निवृत्ते सति वृत्तयो नाविर्भवन्ति। वृत्तिरूपतरङ्गाणां पूर्णतया विनाशे अभ्यासपरवैराग्ययोः पूर्णावस्थया च असम्प्रज्ञातसमाधिरुदेति। तदुक्तं योगसुधाकरे—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः।
याऽसम्प्रज्ञातनामासौ समाधिरभिधीयते॥ पृ० ११८
भाष्यकृताप्युक्तम् – सर्ववृत्तिनिरोधे त्वसंप्रज्ञातः समाधिः १।१

अस्यामवस्थायां सम्प्रज्ञातस्य सवितर्काद्यवस्थाचतुष्टयस्य हानात् कल्पना विचार विवेकशक्तयोपि स्वयमेव विसृष्टाः भवन्ति केवलं ताभिः शक्तिभिः उपलब्धस्य तदानीन्तनस्य ज्ञानस्य स्मृतिः शिष्यते। विसंज्ञवत् स्वस्य बाह्यवस्तूनां च ज्ञानं न भवति तदा विहाय दृष्टज्ञातवस्तुस्मृतिम्। किन्तु सत्यां स्मृतौ तत्र किमपि निर्णेतुं न शक्नोति साधको विवेकाद्य-भावात्। आश्चर्यचकितवत् स्मृतिपथ समागतरूपादीनां केवलमालोचकः? इयमेवावस्था असम्प्रज्ञातसमाधिरिति गीयते शास्त्रे।

असम्प्रज्ञातसमाधिरेव निर्बीज-निर्वितर्क-निर्विकल्पक-शून्य-महाशून्य-धर्ममेध-निरोध-साम्य-सहज--निमीलन--समाधिशब्दैराख्यायते। समाधिरयमेव योगस्य परिपूर्णावस्था, भक्ति मार्गस्य पराभक्तिः, वेदान्तस्य ब्राह्मसद्भावः, सांख्यानां, अत्यन्तदुःख निवृत्तिः, वेदोक्त आत्मसाक्षात्कारः, बौद्धानां सम्यक् समाधिः, शैवानामुन्मनी भावः, कैवल्यम्, निर्वाणपदम् इत्यादि। अस्यामवस्थायां जीवस्य जीवत्वनाशः जीवः शिवत्वमेति। अनादि-कालतः रामुत्पन्ना अनन्तकालपर्यन्तं स्थायिनी च सृष्टि क्रिया यद्यपि तदानीमपि तिष्ठति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किन्तु योगसाधनपुरुषार्थमाचरन् जीवो मोक्षं लभते। मुक्तौ लब्धायां जीवप्रकृतिर्महाप्रकृतौ-लीनतां प्रपद्यते समुद्रे वारिविन्दुरिव जीवः परमात्मनि विलयमेति। मनोवागगोचरा मुक्तावस्थेयं योगसाधनलक्ष्यभूता वेदितव्या।

इत्थंभूतस्य असम्प्रज्ञातस्य अवस्थाद्वयं यदतिसूक्ष्मं साधारणबुद्धिपरं केवलं योगिगम्यं बाह्यलक्षणविहीनत्वात्। यदा योगस्य परांकाष्ठां प्राप्य असम्प्रज्ञातसमाधिमधिरुह्य महात्मानः आत्मारामाः सन्तः सांसारिकसकलसम्बन्धं विहाय उन्मुक्ताः स्तब्धाः निष्क्रियाश्च भवन्ति, तदा तेषामवस्था ब्रह्मकोटिनाम्ना व्यवह्रियते। यदा च ते महात्मानः तद्दशापन्नाः भगवतः समीहया लोकोपकारेषु निरतास्तिष्ठन्ति, दशेयं तस्य ईशकोटिनाम्ना ख्यायते। चलस्थिर-पवनवत् निष्क्रियः सक्रियश्चोभावपि महात्मानौ सिद्धौ स्तः केवलं तयोर्बाह्यलक्षणभेदः। ब्रह्मकोटिजीवन्मुक्तियोगिभिः संसारस्योपकारसंभावना नास्ति केवलमीशकोटिजीवन्मुक्तियोगि-भिरेव।

तदुक्तम्[1]—

परमहंसस्य प्रारब्धकर्मवैचित्र्यदर्शनात्।
ईशकोटि र्ब्रह्मकोटिरिति द्वे नामनी श्रुते॥
परमहंसो ब्रह्मकोटेर्मूकःस्तब्धो जडस्तथा।
उन्मत्तो बालचेष्टश्च न जगत्तेन लाभवत्॥
परहंसस्त्वीशकोटेः परांकाष्ठां गतोऽनिशम्।
निष्कामस्य व्रतस्यात्र जगज्जन्मादिशक्तिमत्॥
जगदीशप्रतिनिधिर्भूत्वा तत्कर्म संरतः।
जगद्धितार्थं विप्रर्षे एवं विद्धीशरूपिणम्॥

वृत्तिनाशरूपसंस्कारावशेषस्य असंप्रज्ञातसंज्ञक निर्विकल्पकसमाधेरिदमेव तात्पर्यं यत् सुवर्णमिश्रितः सीसकोऽग्नौ प्रक्षिप्तः सुवर्णमलं ज्वालयित्वा स्वयमपि ज्वलितो भवति, तथैव निरोधसंस्कारः पूर्णरूपेण चित्तवृत्तयः प्रणाश्य स्वयमेव प्रणश्यति। अनन्तरं कोपि संस्कारो नैव तिष्ठति केवलमन्ते स एव निर्लिप्तः सच्चिदानन्दस्वरूपः परमात्मैव अवशिष्यते। समाधिस्थो महात्मा स्वशरीरेण यत् किमप्याचरति तत्कर्मणां संस्कारो तदन्तःकरणं न स्पृशति निर्वासनत्वात्। व्युत्थानदशायाः तदीयाः सर्वेपि संस्कारा बह्निभृष्टवीजवत् व्यर्थतांयान्ति। अस्यां दशायां तस्य कार्याकार्यं शरीरस्य स्थितिरस्थितिर्वा समानतां भजति। अयमसंप्रज्ञात-समाधिः योगस्य पराकाष्ठा साधनस्य चरमं लक्ष्यमवधेयम्।

भवप्रत्ययोऽसम्प्रज्ञातसमाधिः—

असम्प्रज्ञातसमाधिर्द्विधा विभक्तो भवप्रत्यय उपायप्रत्ययश्च तत्र भवाज्जन्मनः

---

१. योगदर्शनाङ्के-७५ पृ० उद्धृतम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययो यस्य स भवप्रत्ययः। यस्य समाधेरायासं विनैव जन्मनः प्रतीतिः स इति भावः। अथवा भवन्ति जायन्तेऽत्र जन्तव इति भवोऽविद्या प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः समाधिः। वृत्तिहीनायामस्यां दशायां पुरुषश्चैतन्यमासाद्य द्रष्टुः साक्षिणो वा रूपेऽवस्थितो भवति। अथवा गभीरेणाज्ञानेनाच्छन्नो भूत्वा चैकतो यथा विषयज्ञानशून्यो भवति, तथैवापरतः स्वचित्स्वरूपोपलब्धितोपि वञ्चितो जायते। शास्त्रानुसारम् इयमेव प्रकृतिलयदशा जडसमाधि-दशा वा। योगिभिर्नेयं काम्या कदाचन। वृत्तिज्ञानशून्यत्वादियं यद्यपि असम्प्रज्ञातसमाध्यन्तर्गतैव तथापि ज्ञानोन्मेषाभावान्नेयं योगावस्था। अयमेव पतञ्जलिना भव प्रत्ययाख्योऽसम्प्रज्ञात-समाधिरुच्यते। उक्तञ्च योगसूत्रे—भवप्रत्ययो विदेहप्रकृतिलयानाम्, १।१९ इति। एष च समाधिर्विदेहानां पाट्कौशिक शरीररहितानां देवानां भूतेन्द्रियलीनानां संस्कारमात्रशेषमनसां प्रकृतिलयानां च भवति। उक्तञ्च गीतायाम्—

तत्र तु बुद्धिसंयोगं लभते पौर्वदैहिकम्।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः॥ ६।४३-४४

अस्यायं भावः—केचन योगिनो महात्मानो योगलक्ष्यभूतस्य असम्प्रज्ञातसमाधेः पूर्वावस्थाभिमुखं प्रयान्तो मध्ये एव तिष्ठन्ति नान्तं गच्छन्ति। यद्यपि ते सर्वाणीन्द्रियाणि विजित्य विषयवैराग्ययुक्ताः सम्पद्यन्ते तथापि निजान्तःकरणनिरोधरूपसंस्कारसाहाय्येन देहाध्यासशून्याःसन्तो महत्तत्वादिप्रकृतिविकारेषु विलीयन्ते, किं वा स्वकीयनिर्मलान्तःकरणेन मोक्षानन्दवत् स्वान्तःकरणप्रतिबिम्बितचैतन्याभाससुखं भुञ्जते। अर्थात् प्रकृतौ लीना अपि प्रकृति द्वारा कैवल्यसुखानुरूपसुखे निमग्नास्तिष्ठन्ति। एतादृशी लयावस्था भवप्रत्ययाख्या योगविघ्नकारिणी दशा, अतो नैव हिताधायिका। इयञ्चदशा समुद्भवति साधनवेगस्य वैराग्यस्य च परिपूर्णताभावे तादृशविघ्ने समुपस्थिते साधनतीव्रतायाः परवैराग्यस्य चाभावेन समाधिसमुन्नतभूमिमासादयन्तोपि निरुद्धाः साधका अग्रे न सरन्ति नापि कैवल्यमाप्नुवन्ति।

एतद्विघ्न संभावना मन्त्र-हठ-लययोगेष्वेव न तु राजयोगे तत्र हि तत्त्वज्ञानस्य वासनाक्षयस्य मनोनाशस्य च सहैव जायमानत्वात्। अपरेषु त्रिषु बहिः साधनानां समधिक-संवन्धसत्वात् सम्प्रज्ञातदशायां तादृशविघ्नप्राप्तेः संभावना। मन्त्रयोगे रूपमन्त्रयोरद्वैततया समाधिः समवाप्यते। अतोऽत्र महदादिषु विलयः समधिकः संभाव्यते। हठयोगसमाधेर्वायु-निरोधद्वारा लययोगसमाधेः नादविन्दोरद्वैततया सम्पाद्यमानत्वात् उभयत्रापि सूक्ष्मप्रकृति-साहाय्येन प्रतिविम्बिते आत्मरूपे विलयात् समुन्नति निरोधः संभाव्यते। अतएव हठयोगे अनेके विघ्नाः उत्पद्यन्ते ते भवप्रत्ययदशायां निरुद्धा न भवेयुः अतः तत्परित्याग एव वरीयान् अन्यथा विघ्नविहतः साधको मध्ये एव विरमति।

उपायप्रत्ययोऽसम्प्रज्ञातसमाधिः—

द्वितीयोऽसम्प्रज्ञातसमाधिरुपायप्रत्ययाख्यो योगिनां भवति अर्थात् विघ्नविरहितयोगिभिः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकोऽसम्प्रज्ञातसमाधिरधिगम्यते। योगिनां या वास्तविकी योगावस्था

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सा उपायप्रत्ययात्मकेन असम्प्रज्ञातसमाधिरूपेण परिचीयते। अत्र उपायो नाम प्रज्ञा शुद्धं ज्ञानम् इति यावत् ततो प्रत्ययः प्रतीतिर्यस्य, अथवा तदेव प्रत्ययः कारणं यस्य स उपायप्रत्ययः। सम्यग्ज्ञाने समुत्पद्य निरुद्धे सति योऽसम्प्रज्ञातसमाधिराविर्भवति न स ज्ञानानुदयकालिकेन असम्प्रज्ञातसमाधिना तुलनीयः। भवप्रत्ययावस्थायां कियत् कालं यावत् चित्ते निरुद्धे सत्यपि कालान्तरे तदुत्थानमवश्यम्भावि। यतो हि तावत् पर्यन्तं चित्तसंस्काराः पूर्णतया तिष्ठन्ति किन्तु प्रज्ञायाः समुत्पत्तौ क्रमशः संस्कारदाहाद् योऽसम्प्रज्ञात समाधिः प्रादुर्भवति तत्र-व्युत्थानस्य कापि न आशङ्का। सा च प्रज्ञा श्रद्धा वीर्य स्मृति समाधिपूर्विका। तदुक्तम्-श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् १।२० अत्र श्रद्धा, वीर्यम्, स्मृतिः, समाधिः, प्रज्ञा चेति ज्ञानप्राप्तेः स्वाभाविकः क्रमः। श्रद्धावाँल्लभते ज्ञानम्, इति गीता वाक्येपि ज्ञानप्राप्ति-मूले श्रद्धैव प्रतिष्ठापिता। सा हि जननीव कल्याणी योगिलोकान् याति विमार्गयात-जन्मनोऽनर्थात्। अतएव श्रद्धाहीनेन शतशः प्रयतितेपि ज्ञानप्राप्तेःसामर्थ्यं नाधिगम्यते। 'यो यच्छ्रद्धः स एव सः' इति। श्रद्धायां दृढीभूतायां ज्ञानाप्तये योगिनां दृढोत्साहरूपं वीर्यमभि-वर्धते। उत्साहयुक्तसाधनमनुतिष्ठन् साधको यदा ब्रह्मानन्दपथे अग्रे सरति तदा उत्तरोत्तरम् आनन्द एधते तस्य स्मरणमेव स्मृतिः सा वीर्यतो लभ्यते स्मृतौ सत्यामेव समाधिः सम्प्रज्ञातो जायते समाहितचित्तस्य प्रज्ञाविवेको उपावर्तते येन यथार्थं जानाति योगी तदभ्यासात् वैराग्याच्च असम्प्रज्ञातसमाधिर्भवति।

अस्यां दशायां योगिनामन्तःकरणं कदापि प्रज्ञां न त्यजति तेषामद्वैत स्थितिः सदैव तिष्ठति। विघ्ननिराकरणेन साधन तीव्रतायाः परवैराग्यस्य चावलम्बनेन योगी श्रद्धादिसाहा-य्येन विघ्नविरहितमनुतिष्ठन् कृतकृत्यतां प्रतिपद्यते। इयमेव द्वितीया श्रेष्ठा दशा अनवरोध-संज्ञिका उपायप्रत्ययावस्थेति। अत्र प्रथमत एव वैराग्यसंबन्धः शेषे वैराग्यपूर्णावस्थारूप-परवैराग्यसाहाय्येन साधकः प्रज्ञामधिगम्य कैवल्यमधिरोहति। भवप्रत्ययरूपे असम्प्रज्ञात-समाधौ चित्तस्य निरोधे सत्यपि अविद्या न निवर्तते अविद्यायास्तज्जनितसंज्ञायाश्च वर्तमाने आत्मा न मुच्यते।

संक्षेपेण समाधिस्वरूपं योगिभिः शास्त्रैश्च गम्यं प्रकटयितुं स्वल्पकायेऽस्मिन् निबन्धे यत्नो मया विहितः विशेषः योगिभ्यः शास्त्रेभ्यः साधकेभ्यः अनुभवतश्च करणीयः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"लोकादि" पदार्थ विचारः

• ना० श्री देवनाथाचार्यः

"लोकादि मग्नि तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा। सचापि तत्प्रत्यवदद्यथोक्तमथास्यमृत्युः पुनरेवाह तुष्टः ॥" (कठोपनिषत् १-१-१५)

सुप्रसिद्धा कठोपनिषदियम् । अध्यायद्वयात्मिकेयम् । एकैकस्मिन्नध्याये तिस्रस्तिस्त्रोवल्ल्यः । तत्र प्रथमेऽध्याये प्रथमवल्ल्यां पञ्चदशोऽयं श्लोकः । परमपावनं बालमहर्षेः नचिकेतस उपाख्यानं अत्र प्रतिपाद्यते ।

"लोकादिमग्नि···" इतीदं श्रुतिवाक्यम् । इतः पूर्वं त्रिषु वाक्येषु, द्वे वाक्ये नचिकेतसः, तृतीयन्तुमृत्योर्वाक्यम् ।

"स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति । उभेतीर्त्वा अशनायापिपासे शोकातिगोमोदते स्वर्ग लोके ॥" (कठोपनिषत् १-१-१२)

सत्वमग्नि ँ स्वर्ग्यमध्येषि मृत्योः । प्रब्रूहि त ँ श्रद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्ते, एतद्द्वितीयेन वृणे वरेण ॥" (कठोपनिषत् १-१-१३)

इतीदमुभयं नचिकेतसो वाक्यम् ।

"प्रते ब्रवीमि तदुमे निबोध स्वर्ग्यमग्नि नचिकेतः प्रजानन् । अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धित्वमेनं निहितं गुहायाम् ॥" (कठोपनिषत् १-१-१४) इतीदं मृत्योर्वाक्यम् ।

अस्मात्समनन्तरमेव प्रथमोपदर्शितं श्रुतेर्वाक्यम् । इदं वाक्यानां पौर्वापर्यं सर्वेजानन्त्येव । अथापि प्रकृतोपयोगितया अत्र प्रदर्शितम् ।

अत्र विषयस्य गंभीर वेदान्त तत्त्वात्मकतया मतत्रयानुसारिभिरपि स्वस्व नतानुसारेण अस्याः अन्यासाञ्चोपनिषदां भाष्यं प्रणीतं विराजते । तेषु प्रथमं[1] शंकर भगवत्पाद विरचितम् ।

---

१. गीताप्रेस-गोरखपूरमुद्रणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयं[1] श्रीमद्रंग रामानुज मुनिविरचितम्। तृतीयं श्री राघवेन्द्र स्वामिभिरनुगृहीतम्। एतेषु त्रिषु उपनिषद्भाष्येषु अद्य विचारः क्रियते।

पूर्वोपदर्शितस्य "लोकादिमग्नि···" इत्यस्य वाक्यस्य शांकर भाष्यस्था व्याख्यान पंक्तय इत्थम् :—

"लोकादिं=लोकानामादिम्। प्रथमशरीरित्वात्। तं प्रकृतं नचिकेतसा प्रार्थितं, उवाच =उक्तवान् मृत्युस्तस्मै नचिकेतसे। किञ्च या इष्टकाः = चेतव्याः स्वरूपेण, यावतीर्वा = संख्यया, यथावा = चीयतेऽग्निर्येन प्रकारेण, सर्वमेतदुक्तवानित्यर्थः। सचापि नचिकेता. तत् मृत्युनोक्तं यथावत् प्रत्ययेन, अवदत् = प्रत्युच्चारितवान्। अथ तस्य प्रत्युच्चारणेन तुष्टः सन् मृत्युः पुनरेवाह = वरत्रय व्यतिरेकेण अन्यं वरं दित्सुः" इति।

अत्र श्रीरङ्गरामानुज मुनि विरचितं भाष्यम् :—

"अनन्तरं श्रुतिवाक्यं "लोकादिमग्नि" मिति। लोकस्यादिं = हेतुं-स्वर्ग्यमितियावत्। तमग्निमुवाच। यल्लक्षणा इष्टकाश्चेतव्याः-यत्संख्याकाः-येन प्रकारेण चेतव्या.-तत्सर्वमुक्त-वानित्यर्थः। यावतीरिति पूर्वसवर्णश्छान्दसः। सचापीति। सच नचिकेताः तत् श्रुतं सर्वं तथैवानूदितवानित्यर्थः। अथास्येति-शिष्यस्यग्रहणसामर्थ्य दर्शनेन सन्तुष्टस्सन् मृत्युः पुनरप्युक्त-वान्" इति।

अत्र श्रीराघवेन्द्रस्वामिविरचितं द्वैतमतानुयायि भाष्यम् :—

"लोकादिं = सर्वलोकानामादिम्-काष्ठाभूतम्।
लोकादिः-प्रतिष्ठा-भगवानेव··········।" इति।

इमानि त्रीण्यपि भाष्याणि एतस्य वाक्यस्य एक रूपमेव व्याख्यानं समुपदर्शयन्ति। यत्र मुख्यतरस्य स्वसिद्धान्त सिद्धस्यार्थस्य व्याकोप प्रसक्तिःतत्रैव व्याख्या प्रकारे वैलक्षण्यं, तन्मूलकं स्वसिद्धान्तानुकूल्यसंपादनञ्च व्याख्यातृभिः क्रियते। अन्येषु स्थलेषु पूर्वतनीं व्याख्यामेवा विकलमनुसरन्ति ते। स्पष्टमेवेदं सहृदयानां प्रामाणिकानाम्। प्रकृत वाक्य विषये-त्रयाणामपि भाष्याणां अभिन्नएवार्थ वर्णनप्रकारः।

"लोकादिं" इतीदमौपनिषदं पदं "अग्निम्" इत्यस्य समनन्तरपदस्य विशेषणम्। "अग्निम्" इति द्वितीयं पदं विशेष्यम्। अग्निचयनप्रकरणमिदम्। अस्मिन् प्रकरणे "अग्नि" शब्दस्य प्रयोगः पौनः पुन्येन प्रदृश्यते। अर्थद्वयवांश्चायं शब्दः :—

(१) इष्टकोपधान संपादितंस्थंडिलम् श्येन-गरुड-कङ्क-रथचक्र-प्रभृति नानाकार

---

१. कुंभघोणमुद्रणम् (ग्रंथलिपिः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशिष्टम् । अस्यान्तरेवाग्निः प्रतिष्ठाप्य संरक्ष्यते ।

(२) साक्षात् ज्वलन एव ।

अनयोरुभयोरर्थयोः प्रमाणभूतानि कानिचन वेद वाक्यान्युदाहरामः :—

तत्र प्रथमस्यार्थस्य—

(१) "वृषाग्निं वृषणं भरन्" (तै. सं. ४-१)

(२) "सवामग्निं पुरीष्य······" (तै. सं. ४-१)

(३) "अग्निं पुरीष्यमंगिरस्वत्खनामि" (तै. सं. ४-१)

द्वितीयस्य : —

(१) "मातापुत्रं यथोपस्थे साग्निं बिभर्तुगर्भआ" (तै. सं. ४-१)

(२) सञ्चेध्यस्वाग्ने······" (तै. सं. ४-२)

(३) दिवस्परि प्रथमं जज्ञे अग्निः · ······" (तै. सं. ४-१)

एवं बहूनि वाक्यानि वेद विदां न दुर्लभानि । "चितश्चासि सञ्चितश्चास्यग्ने" इत्यादिकमपि जागर्त्येव ।

"अग्नि चयनं" नाम अग्न्याधारभूतस्य नानाकार विकल्पितस्य स्थंडिलस्य निर्माणम् । तदर्थं मृदाहरणादिकं मन्त्रपूर्वकं क्रियते । तदर्थमृदाहरणं कुर्वन् रासभः "अग्निं भरन्" इति वेदमन्त्रेणैव निर्दिश्यते । एकैकस्य चयनस्यापि प्रतिनियततया इष्टकास्सन्ति । तत्सर्वं याज्ञिकानां वेदविदां अनुष्ठाने सुप्रतिष्ठितमस्ति । इदं सर्वं उपनिषद्भाष्यकाराः सुनिपुणं जानन्त्येव । "या इष्टकाय वतीर्वायथावा" इत्यत्र शंकरभाष्ये—

"किञ्च याइष्टकाश्चेतव्याः स्वरूपेण, यावतीर्वा संख्यया, यथावाचीयतेऽग्निर्येन प्रकारेण, सर्व मेतत् उक्तवानित्यर्थः"

इति पंक्तयोऽत्र भाव्याः ।

तथा "सत्वमग्निं······" इति त्रयोदशवाक्यभाष्ये, श्रीरंगरामानुजाचार्याः, "स्थंडिलरूपस्याग्नेः स्वर्ग प्रयोजनकत्वञ्च उपासनाद्वारेति उत्तरत्र स्फुटम्" इति भाषन्ते ।

अयं नाचिकेताग्निः इष्टका समूहनिर्वर्तितस्थंडिलरूप एवेति नूनमेते विजानन्ति । एवं वदन्नहमेवोपहास्यतां भजामि ।

एवं विलक्षणप्रज्ञाशालिनां त्रयाणामपिभाष्यकाराणां "लोकादिं" इति पदव्याख्यानं किञ्चिदिव अन्यथा भूतमुपलभामहे । सर्वं एवैते व्याख्यातारोब्रह्मनिष्ठाः । सत्यां प्रसक्तौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परब्रह्म प्रतिपादकतयैव औपनिषदानि पदानि झडिति एतेषां मनसि प्रतिभान्ति । उपासनाकाण्डे च उपास्यस्य महिमा असकृत्संकीर्त्यत एव । तेन तेषां व्याख्या प्रकारः अभ्यास पाटवेन ब्रह्मस्वरूप प्रतिपादनैकपरो भवति । प्रकरणलब्धोऽर्थः हन्त ! सर्वथा उपेक्षितो भवति । अयं "लोकादि" शब्दस्तथाभूत एव । इदं प्रकरणपरामर्शपूर्वकं निरूपयामः ।

नाचिकेताग्निचयन प्रकरणमिदमितिपूर्वमेवावोचाम । अत्र इष्टकोपधानप्रकारः सूत्रकारेण एवं संगृह्यते :—

"एतेन नाचिकेतो व्याख्यातः । नात्र लेखा भवन्ति । एकविंशति हिरण्येष्टकाः शर्करावाऽभ्यक्ताः उपधानकाले नाभ्यामेवोपधीयन्ते-चतुरस्रंपरिमण्ल वा, "लोकोऽसि स्वर्गोऽसि" इत्यनुवाकेन प्रतिमन्त्रम्"

इति।

"काठकं "इति समाख्यातः प्रश्नत्रयात्मकः वेदभागः याजुषैरधीयमानो विराजते । तत्रद्वितीयः प्रश्नः "लोकोऽसि स्वर्गोऽसि" इत्युपक्रम्यते ।

एकविंशतिरिष्टकाः मन्त्रपूर्वकमुपधीयन्तेऽत्र । लोकोऽसि स्वर्गोऽसि ।···तया-देवतयाङ्गिरस्वद्ध्रुवासीद" इति मन्त्रोपधेया इष्टका तासामिष्टकानामादिभूता । तस्य मन्त्रस्य आदिमत्वात् "लोकादिमग्निं तमुवाच तस्मै···" इति श्रुति वचने अस्याग्नेः "लोकादित्वं विशेषणतया प्रयुक्तम् । अत्रत्यो "लोक" शब्दः, "सृष्टीरुपदधाति" इत्यादाविव तच्छब्द-घटितमन्त्रोपधेयेष्टकापरः ; "तद्वानासामुपधाने मन्त्रः इतीष्टकासु लुक्चमतोः ।" (अष्टाध्यायी ४-४-१२५) इति व्याकरणस्मृत्या "लोकपदसहित मन्त्रोपधेयाइष्टका अत्र "लोक" पदेन निर्दिश्यते । तस्याः आदौ उपधीयमानत्वात् अयमग्निः नाचिकेतः "लोकादि" रित्युच्यते । काठके द्वितीयप्रश्ने, एकविंशति संख्याका नाचिकेताग्नेः इष्टका एकविंशत्यनुवाकपठितैर्मन्त्रै-रुपधेयाः इति विस्पष्टं पठ्यते । कठवल्ल्यामपि "याइष्टकायावतीर्वा यथावा" इति लोका-दीष्टकानामेव प्रस्तावोदृश्यते । एवं सति, अस्य "लोकादि" पदस्य भाष्यत्रयेऽपि प्राकरणिकार्थं सर्वथाउपेक्ष्य, लोकानामादिं" "इत्यादिवाक्यैः वैदिकयाज्ञिकसंप्रदायबहिर्भूतोऽर्थः कथं वर्णितः ? कथन्तरां अस्यार्थस्य ब्रह्मभावनाफलस्य सावित्र-चातुर्होत्र-वैश्वसृजादिष्वग्निषुनातिव्याप्तिः ? कथन्तमांइतर व्यावर्तकतया अस्य विशेषणस्य नाचिकेताग्नौ प्रयोगोपपत्तिः ? इति आर्ष संस्कृतिमद्भिः वैदिकै विचारयितव्यम् ।

शङ्कर भाष्य व्याख्याता आनन्दगिरिः [1]स्वटीकायां, "सप्रपञ्चमग्निज्ञानं चयन प्रकर-णात् द्रष्टव्यमिति श्रुतिरस्मान् बोधयतीत्याह "श्रुतेर्वचनमिति" इति लिखति । अग्नि प्रकरणं

---

१. आनन्दाश्रममुद्रणम् १९३५.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनसा अनुसंदधानोऽप्ययं व्याख्याता, भाष्यस्थस्य "लोकादि" पदव्याख्यानस्यैव उपोद्बलकतया "सप्रपञ्च" मिति विवरणं प्रदर्शयति । नतु प्राकरणिकमिष्टकाभिप्रायं लोकादिपदं विवृणोति ।

अस्यैव शङ्करभाष्यस्य "गोपालटीका" इत्यप्येका व्याख्या वर्तते । तत्रत्याइमाः पंक्तयः—

"…चेतव्याः-उपधातव्याः इति पूर्वेणान्वितम् । यथा शब्दार्थमाह येनेति । तत्तदिष्टका-प्रकाशक तत्तन्मन्त्रोच्चारणेनेत्यर्थः । तदग्निज्ञानं यथोक्तावधारण सामर्थ्यं नचिकेतस आह यथावदिति ।" इति ।

अडैयार्[1] मुद्रणमपि अस्य व्याख्यानस्य वर्तते । तत्र, "लोकादिर्ब्रह्मजज्ञोऽग्निः" इति शाङ्करभाष्यपंक्तेः, "ब्रह्मविवर्तत्वेन लोक्यन्त इति लोकाः । अनन्तकोटिब्रह्माण्डानि । तत्कल्पना-धिकरणं-तेषामादिः । कारणं विना कार्यंनोदेति इति श्रुतेः । लोकादिमग्नि-ईश्वरं हिरण्यगर्भंवा-तदीयविज्ञानञ्च उपदिदेशेत्यर्थः ।"

इति व्याख्यान पंक्तयो दृश्यन्ते । न कुत्रापि लोकदिपदस्येष्टका परत्वं निर्दिश्यते ।

तत्र किं कारणम् ? सर्वज्ञा अपि व्याख्यातारएते, स्वगुरुचरणानां व्याख्यान रीति-मुल्लङ्घ्य स्वातन्त्र्येण किमपि वक्तुं नेच्छन्ति-अथवा-आचार्यपादानामवज्ञाकृता स्यादिति बिभ्यति । नत्वेतद्युक्तमिव । अवश्यवक्तव्यस्यार्थस्योपेक्षणं नैवयुज्यते ।

अत एवहि पूर्वमीमांसादर्शन भाष्यकारः तत्र भवान् शबर स्वामी, "इदं पदेभ्यः केभ्यश्चिदुत्तरं सूत्रम् । कानि तानि पदानि ?" इत्यादि ग्रंथेन सूत्रे लब्धास्पदां न्यूनतां तत्र तत्र परिहरति ।

अन्यच्चात्रावधेयम्—कर्मणः लघुत्वेफलस्याप्यल्पत्वम् । कर्मणोगुरुत्वे तत्फलस्यापि अधिकत्वम् । इत्ययं पूर्व मीमांसकानां सिद्धान्तः । "फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात्" (१-२-१७) इति पूर्व मीमांसा सूत्रे इदं स्पष्टतरमुच्यते । तथा दाक्षायण-यज्ञाधिकरणेऽपि (पू. मी. द. २-३-४) अधिकायाससाध्यस्य कर्मणः फलेऽपि आधिक्यं सिद्धान्तितम् । अतएव स्वल्पायास साध्याग्निहोत्रस्य, तदपेक्षया अधिक प्रयास साध्यस्य दर्शपूर्ण-मासयागस्य, ततोऽपि बह्वायाससाध्यस्य ज्योतिष्टोम यागस्य च यद्यपि "स्वर्ग" रूपमेकमेव फल श्रुतम्; तथापि तत्र तारतम्यमवश्याभ्युपेतव्यम् । अन्यथा गुरुकल्पस्य एकान्ततः अननुष्ठानापत्ते-रिति । यजुर्वेदभाष्योपक्रमे सायणेनापि अयं विषयो निरूपितः "तरति ब्रह्महत्यां योऽश्वमेधेन यजतेयउचैनमेवं वेद" इत्यादि वाक्योदाहरणेन ।

---

१. आनन्दाश्रममुद्रणम् १९३५.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदे च तत्रतत्र कर्मानुष्ठानस्य यदेवफलं, तदेव तद्विषयकस्य वेदनस्याप्युद्घुष्यते। तादृशस्थलेषु अयमेव निर्वाहो मीमांसक संमतः। कर्मानुष्ठानं बहुप्रयास द्रव्य व्ययसाध्यं-ऋत्विक् साहाय्यापेक्षञ्च। तद्विषयकं ज्ञानन्तु न तथा। एक व्यक्ति साध्यं-मनः प्रणिधान मात्रापेक्षञ्च। कथमनयोः तुल्यफलत्वं शक्य शङ्कम् ?

उपनिषत्स्वपि तत्रतत्र कर्मानुष्ठान तुल्यमेव तत्कर्म वेदनस्यापिफलं श्रूयते। प्रकृते अग्नि प्रकरण एवेदं सुप्रसिद्धम्। "यएत मग्निं चिनुते। यउचैनमेवं वेद।" इत्यादि बहुतरं दृश्यत एव। अत्रापि पूर्व मीमांसान्यायेन वेदनस्य अल्पफलत्वं, कर्मानुष्ठानस्यतु अधिकफलत्वं स्वारसिकतया अङ्गीकर्तव्यमापतति। औपनिषदानि प्रत्यक्षवचनानि अविच्छिन्न स्मृति सन्तानरूपध्यानोपासनादि पदाभिधेयस्य ब्रह्मविषयकज्ञानस्य अनन्ताक्षय्यफलत्वं प्रतिपादयन्त्येव। "परीक्ष्यलोकान् कर्मचितान् ब्राह्मणः······" इत्यादिकमत्र भाव्यम्। पूर्व तन्त्रनिष्ठास्तु, इदं सर्वमेवार्थवादरूपमिति वदेयुः। "विद्याप्रशंसा" (पू. मी. द. १-२-१४) इति जैमिनि सूत्रं अत्र तेषां प्रमाणी भवति। क्लिष्ट एवायं विचारः। प्रसंगात् अत्र प्रस्तुतः, "लोकादि" शब्दार्थ विचारस्योपयोगितया।

तटस्थानां प्रामाणिकानां वैदिकानां आर्षसंस्कृति शालिनां सहृदयानां पुरस्तात् इमं "लोकादि" पदार्थ विचारं सन्निधापयामि। इति शम्।

□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धम्मसोण्डक कथा रसवाहिन्याम्

—डॉ० शारदा गांधी

'रसवाहिनी'[1] त्र्यधिकशतकथानां सङ्ग्रहः। एता कथा प्राचीनकाल अर्हद्भिः श्राविता आसन्। तासु काश्चित् बुद्धकालीना अन्या बुद्धोत्तरकालीनाश्च सन्ति। आसु त्र्यधिकशत-कथासु चत्वारिंशत् कथा जम्बुद्वीपेन सम्बद्धा अन्यास्त्र्यधिकषष्टिकथाश्च लङ्काद्वीपेन सम्बद्धाः। रसवाहिन्या वर्तमानोपलब्धसिंहलीभाषासंस्करणं वैदेहथेरेन त्रयोदशशत्यां चतुर्दशशत्यां वा उपनिबद्धं इति मन्यते। अद्यावधिः रसवाहिन्या संपादनं संस्करणञ्च रोमनलिप्यां देवनागरी-लिप्यां च न केनापि कस्मिंश्चित् प्रदेशे विहितम्। सहस्सवत्थुप्पकरणं-सीहलवत्थु-रसवाहिनी-सद्धम्मालङ्कारा: चत्वार्यप्येतानि पुस्तकानि सिंहललिप्यां सन्ति। एषां च पुस्तकानामनुवादः संपादनं प्रकाशनञ्च रोमनलिप्यां देवनागरीलिप्यामपि चापेक्ष्यते। सिंहलद्वीपस्य कथाना-मध्ययनाय लेखनाय च 'सहस्सवत्थोः' 'सीहलवत्थो'श्च संपादनं रसवाहिन्या पूर्वं विधेयम्। सहस्सवत्थुप्पकरणं रसवाहिनीञ्चाश्रित्य मया शोधपत्रं सप्तविंशत्यधिवेशने (AIOC) कुरुक्षेत्रे

---

१. (क) रसवाहिनी, १९६१ ईस्व्यां सम्पादिता
(सिंहली-भाषा-संस्करणम्);

(ख) ,, सरणतिस्सथेरेन सम्पादिता
प्रथमो भागः, १९१३ ईस्व्यां,
द्वितीयो भागः, १९२० ईस्व्यां, कोलम्बोस्थित-जिनालोक-मुद्रणालये;

(ग) ,, सिरिसुदस्सिथेरेन सम्पादिता,
प्रथमो भागः, २४९३/१९०१;

(घ) ,, सरणतिस्साभिधानथेरेन सम्पादिता,
जिनालङ्कारमुद्रणालयः, कोलम्बो, १९२३;

(ङ) Sarattha Dipika or Rasavāhini tika by sri Siddha thera, published dy Jinaloka press, colombo, १९०७;
(Sinhalese Edition)

(च) 'रसवाहिनी-सन्नय' (सिंहलीभाषाटीकासहितम्) एम. जे. धर्मसेनेन सम्पादितः, १९१३ ईस्व्याम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१९७४ ईस्व्यां पठितमासीत्।[1] तत्र सांस्कृतिकदृष्ट्या सहस्सवत्थोः रसवाहिन्या च महत्त्वं प्रतिपादितम्। वाल्पोलराहुलेन[2] रहवाहिन्या कथानां माहात्म्यं स्वीकृत्य लिखितमस्ति यत्—"It has been rightly observed that the stories of the Rasavāhini "are useful to us now, in that they throw new and interesting light on the manners, customs and social conditions of ancient India and Ceylon, perhaps some of them contain materials of Historical importance hidden in their half-mythical tales."

वैदेहथेरेन रसवाहिन्या[3] मङ्गलाचरणश्लोकेषूपनिबद्धं यद् रट्ठपालनाम्ना अनुराधपुर-स्थित-गुत्तवङ्क-परिवेणवासिना शीलाचारगुणानामुद्भवभूतेन स्थविरेण एता कथाः सिंहल-भाषायां पुरा प्रोक्ताः। तासु पुनरुक्त्यादिदोषा आसन्। तान् निराकृत्य ताः कथा पालिभाषाया-मुपनिबद्धाः भिक्षूणां हिताय। ताः कथा अत्रधानेन भदद्भिः श्रोतव्या। भवद्भिरेता मागधी-भाषायां मदुक्ताः कथा सर्वदा समादरणीया इति च। रसवाहिन्या कथा प्रवचनपरम्परया लिखितपरम्परया च समागताः वर्तमानोपलब्धसंस्करणमलंकुर्वन्ति।

रसवाहिनीकथा 'सहस्सवत्थुप्पकरणे' 'सहस्सवत्थु-अट्ठकथायां' वाऽऽधारिता इति प्रायेण विद्वद्भिः स्वीकृतम्। रसवाहिन्यां द्विविधा कथास्सन्ति। तासु काश्चित् जम्बुद्वीपे इतरास्तु सिंहलद्वीपे रचिता। सिंहलद्वीप एव इतिहासकारैः ताम्रपर्णी-ताम्रद्वीप-रत्नद्वीप-राक्षसीद्वीप-लङ्काद्वीप[4] इत्यभिधानैः संबोधितः। जम्बुद्वीपभागकथासु चत्वारिंशत् कथास्सन्ति। ताश्च चतुर्षु

---

१. Dr. Mrs. Sharda gandhi, "Sahassavatthu and Rasavāhini", Meerut university sanskrit Research Journal, १९७८, P ५१-५६,

२. Walpola Rahula—'History of Buddhism in Ceylon, १९६६, Introduction p. xii.

३. तत्थ तत्थूपपन्नानि वत्थूनि अहरा पुरे।
अभासु दीपभासाय टपेसुं तं पुरातनं.
महाविहारे तं गुत्तवङ्क-परिवेणवासिको।
'रट्ठपालो'ति नामेन सीलाचारगुणाकरो।
हिताय परिवत्तेसि पजानं पालिभासतो।
पुनरुत्तादिदोसेहि तमासि सब्बमाकुलं।
अनाकुलं करिस्सामि तं सुणोथ समाहिता
वीतरागा पुरे वोचुं यस्मा तस्मा हि भासितं
एतं आदरणीयं हि साधु साधूहि सब्बदाति॥"

रसवाहिनी, १९६१, पृ. १

४. डा० अंगनेलाल—संस्कृत बौद्ध साहित्य में भारतीय जीवन, लखनऊ, १९६८, पृ. ८,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्गेषु दशशो विभाजिताः सन्ति। चतुर्वर्गेषु विभाजितासु चत्वारिंशत् कथासु प्रमुखवस्तोः नाम्ना वर्गस्य नाम परिलक्षितं धम्मसोण्डकवर्गादिरूपेण। लंकाद्वीपकथासु त्रिषष्टिः कथा सन्ति या षड्वर्गेषु दशशो विभाजिताः सप्तमे च वर्गे कथात्रयं वर्तते। जम्बुद्वीप एव भारतवर्षं विद्यते। अस्य जम्बुद्वीप नाम कथं जातं ? 'सुमेरुपर्वतराजस्य दक्षिणदिग्-भागे दशसहस्रयोजनानि विस्तृतं निश्चयेन एकशतराजनिम्बुद्वीपनामा जम्बुद्वीपः कथ्यते। जम्बुद्वीपे तत्र तत्र गणनां कृत्वा इदं नाम जम्बुफलानामतिशयेन जातत्वात् जातम्' इति सिद्धथेरमहोदयानां विचारः।[१] बौद्ध-संस्कृत-साहित्ये[२] पृथिव्या चतुर्णां द्वीपानां नामानि उपलभ्यन्ते तेषां विस्तारश्च निर्दिष्टः। अश्वघोषेन[३] पृथिव्या सप्तद्वीपानामुल्लेखो कृतः। रसवाहिन्या अध्ययनेन भौगोलिकं ऐतिहासिकञ्च तथ्यंज्ञानं भवति।

'रसवाहिनी' 'कथा' काव्यमिति मन्यते। सर्वत्र शान्तरसस्य प्राधान्यम्। प्रकृतेर्वर्णनं रमणीयं मनोहरञ्च। प्रकृतेर्कोमलं भयावहञ्च रूपं तत्र परमकौशलेन निरूपितम्। रसवाहिन्या लेखकः गद्यस्य लेखने नितरां प्रवीण इति। स्वभावतः सरलं नितान्तप्रौढं च गद्यमेतद् पालिभाषायाम्। रसालङ्कारयोर्मधुरमेलने भाषाभावयोः परस्परसंपर्के कल्पनावर्णनयोरनुरूप-सङ्घटने पालिसाहित्ये प्राचीनार्वाचीनसर्वकथातिशायिनी सुमधुरा 'रसवाहिनी' ति विभावयन्ति सहृदयाः। धर्मवीररसगर्भशान्तरससंपन्ना सर्वा एताः कथाः।[४]

'रसवाहिनी' पदस्यार्थः 'रससरित्' 'रसतरङ्गिणी', 'रसप्रवाहिणी', 'आनन्देन युक्ता' वा इति ("Mellifluent" or "River of taste" or "flow of taste" or "Joy-giver" or "pleasure producer")[५] 'सहस्स' शब्दस्यार्थः 'आनन्देन-युक्त' इति विज्ञापितः। व्युत्पत्तौ द्वयोः साम्यमेवेदं साधयति यद् रसवाहिनी-कथा सहस्सवत्थुमाश्रित्य लिखिता आसन् इति।

---

१. Siddha thera, Sarattha Dipika or Rasavāhini-tika Jinaloka press, colombo, १९०७, P. ४. (ceylonese Edition).

२. "अनेन प्रवेशेनायं जम्बुद्वीपः सप्तयोजनसहस्राणि। गोदानीयोऽष्टौ योजनसहस्राणि। पूर्वविदेहो नव-योजन-सहस्राणि। उत्तरकुरुद्वीपो दशयोजनसहस्राणि। ललितविस्तरः, संपादकः पी. एल. वैद्यः, दरभंगा, १९५८, पृ. १०४, पंक्ति ११-१३,

३. सौन्दरनन्द, सर्ग १७, श्लोक ५८.

४. डॉ० श्रीमती शारदा गांधी—'धम्मसोण्डक-कथाया साहित्यिकमूल्यम्' संविद्पत्रिका, भारतीयविद्या भवन, बम्बई, अगस्त, १९७९.

५. Walpola Rahula, 'History of Buddhism in Ceylon, १९६६ Colombo, Introduction, P. xxxiv

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रसवाहिन्यां वर्णितं धम्मसोण्डकवस्तुसारमेवमस्ति—

कथाया प्रारम्भात् पूर्व लेखकेनं नमस्कारात्मकं मङ्गलाचरणं कृतम् ।[1] देवानां मनुष्याणां च शरणभूतं, ब्रह्मादिदेवानां शिरोमण्डित-मुकुट-निबद्ध-मणिभिः शोभमानं (यतो हि तैरपि बुद्धपादयुगलं सदा वन्दितं वर्तते), पद्मपत्राभां धारयन्तं, मृदु-कोमल-चारु-वर्णं, चक्रवत् सनाभिकमलस्य लक्षणमादधानं, शासकस्य उपशासकस्य च बुद्धस्य पादयुगलं अहं वन्दे इति' अस्मिन् शलोके लेखकेन बुद्धवन्दना विहिता । ततः प्रणमति धर्मम् । प्रमादरहितेन जिनस्वरूपेण बुद्धेन चिरकालं धर्मो यः साधितः, भावकः यमेकमात्रधर्मं क्षेममार्गमिति सञ्जानाति, यश्च धर्मः कल्पवृक्षवत् जनानामिच्छापूर्तौ समर्थः मणिरिव च शोभते, यत्तुल्यं निश्चयेन नास्ति इतरो धर्मः, तमतुलनीयं धर्ममार्गमहं प्रणमामि इति । ततः प्रणमति संघम् । यद् सङ्घस्य शरणगमनेन इन्द्रियाणि शान्तानि स्युः, यः सङ्घः सुगतस्य बुद्धस्य पुत्र इव वर्तते, तं विशुद्धं दक्षिणासंपन्नममृतदं पवित्रपुण्यक्षेत्रं, शरणागतानां रक्षणे समर्थं तेषाञ्च सर्वदुःखापहारिण-मनघं सङ्घं मणिमिव महार्घमहं प्रणमामि इति । एवं मङ्गलाचरणविधानानन्तरं कथयति कथाविषये । रत्नत्रयेण पुण्येन युक्तोहं मनसि स्थितं निखिलं पापमपनीय, धर्मरसेन युक्तां मधुरां 'रसवाहिनीम्' श्रावयामि[2] भो भो भिक्षवः सत्पुरुषेभ्यः आमोदप्रदं धर्मरसं (फालिभाषायां)

---

१. नमो तस्मै भगवते अर्हते सम्यक्सम्बुद्धाय ।

१. शास्तूपशास्तु-चरणं शरणं जनानाम् ।
ब्रह्मादिमौलिमणिरंसि समावहन्तम् ।
पङ्केरुहाभ मुदु कोमल चारुवर्णं ।
वन्दामि चक्रवरलक्षणमादधानम् ।

२. सिद्धं जिनेन चिरकालमतन्द्रितेन
यं भावको समधिगच्छति क्षेममार्गम् ।
यं कल्पवृक्षरुचिदानमणीव भाति ।
तं धर्ममार्गमसमं प्रणमामि निश्चयम् ।

३. शान्तेन्द्रियं सुगतसूनुवरं विशुद्धम् ।
यं दक्षिणेय्यममृतदं शुचि-पुण्य-क्षेत्रम् ।
त्राणेषितं शरणमुज्झित-सर्वदुःखम् ।
वन्दामि संघमनघं शिरसा महार्घम् ।

२. यं प्राप्तमेषः रतनत्रयतोऽमृतेन पुण्येन तेन दुरितं सकलं प्रणुद्धम् ।
वक्षाम्यहं सुमधुरं रसवासिहनीं तं भो भो शृण्वन्तु सुजनाभिमुदावहा सा ।

''धम्मरसो'ति पालि-धम्मरसो, अत्थरसो नाम तस्सट्ठ-कथारसो, कुसला वा धम्मा धम्मरसो तेसं विपाको अत्थरसो उभोपेते सब्बरसानं पवरा उत्तमा, तेनाह भगवा "सब्बं रसं धम्म-रसो जिनाती"ति आदि, तदुभयं रसं वहति एत्थ एतिस्सानि'रसवाहिनी नाम ।"
Siddha thera, Sarttha Dipika or Rasavāhini-tika, colombo, १९०७, P. ३.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रिषष्टिकथानां रसं कुशलकर्मणां दानादीनां धर्माणां वा धर्मरसं च आत्मलाभाय (अत्थरसो) प्राप्तं रसं वा शृण्वन्तु इति ।

आसु कथासु न केवलं कथावस्तु एव मनोरञ्जकं वर्तते रसमुत्पादयत अपितु नीति-प्रवचनमार्गेण धर्मरसोप्यत्र भूयः प्रवाहितः इत्येव धर्मस्यार्थस्य च उभयोरपि रसं एषा प्रवाहयतीति रसवाहिनीत्यभिधानं सार्थकमेवेति ज्ञातव्यम् ।

अथ भूमिकारूपेण कथयति लेखकः तेषु तेषु स्थानेषूत्पन्नानि वस्तूनि प्राचीनकाल अर्हद्भिः प्रदीपवद् प्रकाशाय प्रज्ञापितानि, तानि मया गुत्तवङ्कपरिवेणनामक—महाविहार-वासिना शील (प्रज्ञाशीलसमाधित्रिरत्नम्) सदाचारादीनां प्रभवस्थानानीव, भिक्षूजनानां हिताय पालिभाषायां (मागधीभाषायां) अनूदितानि । प्राचीनैरर्हद्भिः ता कथा सिंहलभाषायां कथिता । अर्हन्त अत्र तत्र परिभ्रमन्ति स्म कथा श्रावयन्तः । ता एव श्रुतिपरम्परया श्रुता कथा मया सिंहलभाषातः पालिभाषायामुपनिवद्ध्य संकलिताः । पूर्वोक्ता कथा पुनरुक्त्यादि-दोषैर्व्याप्ताः सन्ति, तासु ते दोषा अपि निराकृता इति रसवाहिन्या माहात्म्यं प्रतिपाद्य प्रारभते कथाम् । जम्बुद्वीपकथासु प्रथमा कथा धम्मसोण्डकमहाराजस्य कथाऽस्ति ।

अस्माकं भगवान् शास्ता कश्यपो[1] नाम बुद्धो, भद्रकल्पे[2]ऽस्मिन् संसारे जातः । भगवतो बुद्धस्योपदेशे लुप्ते सति शीघ्रमेव अस्माकं बोधिसत्त्वो वाराणसीराज्ये राजमहिष्या कुक्षौ निर्वाणं प्राप्नोति । तस्य प्रसवानन्तरमेव सर्वसत्त्वानां मनसि धर्मसंज्ञा (धर्मभावना) संजाता, अतएवास्य नाम धर्मं सोढा इति धम्मसोण्डकःजातः । स राजकुमारः विशालेन परिवारेण वृद्धिगतः, सर्वेषु शिष्येषु अग्रगण्यो भूत्वा साफल्यं प्राप्य पित्रा प्रदत्तेन राज्येन सत्कारं लब्ध्वा दानादि-दशकुशलकर्मसु निपुणः, पितरि दिवंगत अमात्यैः तस्य राज्याभिषेकः कृतः ।

धम्मसोण्डक-महाराजा देवनगरतुल्ये वाराणसी-नगरे चक्रवर्तीराज इव मासार्धमासं राज्यं कुर्वन् सिरिनामक-प्रासादस्य शयनगृहे स्थित एवमचिन्तयत् "ममेवं राज्यश्रिया भोगो दिवाकरेण विरहितं नभ इव, धर्मेणरहितं राज्यं इव न शोभत इति । तेनोक्तम्—'अहं पूर्व-जन्मनि प्राप्तेन पुण्येन संपन्नोऽस्मि । देवपुर्यामिन्द्र इव च एतद् राज्ये सर्वोत्तमे समभिषिक्त-श्चास्मि । तथा चाहं नयनानन्दकरेण मनोज्ञरूपेण युक्तः, श्रवणामृतदायिना शब्दराशिना संपन्नः शोभनेन गन्धेन समायुक्तः रसज्ञपुण्येन रसास्वादनेन च संपन्नः । सुखप्रदेन गात्रस्पर्शेन च समृद्धि प्राप्तोऽहं अतीव समृद्धिशाली अस्मि । परन्तु एतन्मात्रेणैव यद्यहं प्रमादभावमाप्नोमि,

---

१. चतुर्विंशतिः बुद्धा तेषु कस्सपः वा कस्सपदशवलः ।
G. P. Malalasekara, DPP Names, vol. I, London, १९६०, P. ५४४.

२. "एतादृशः कल्पः यत्र पञ्चबुद्धं जातम् ।"
G. P. Malalasekara, Dictionary of Pali Proper Names, vol. II, London, १९६०, P. ३४०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तन्न युक्तं, मया प्रमादभावश्च त्याज्य' इति' अपि च निश्चयामास यत्—

"दर्शयिष्यामि अंगं अपि जीवितञ्च धान्यं धनं चापि प्रसन्नचित्तः।
श्रोष्यामि धर्मं शिवमादधानं जिनेरितं जातिजरापहारिम् ।
न शोभते यथाकाशं जलं धामपतिं विना ।
राज्यकरणं तथा मह्यं विना धर्मं न शोभते ।
न शोभते यथा रात्रिर्निशानाथं विना सदा ।
राज्यकरणं तथा मय विना धर्मं न शोभते ।
अलङ्कृतोऽपि च हस्ति विना दंष्ट्रा न शोभते ।
राज्यकरणं तथा मह्यं विना धर्मं न शोभते ।
यथा कल्लोलमालीयं विना वेलं न शोभते ।
राज्यकरणं तथा मह्यं विना धर्मं न शोभते ।
यथा सुमण्डितो राजा कपटी नैव शोभते ।
राज्यकरणं तथा मह्यं विना धर्मं न शोभते ।
धर्ममेव श्रोष्यामि धर्मे मे रमते मनो ।
न हि धर्मेण परमस्ति धर्ममूलं त्रिसंपदमिति ।[२]

एवं चिन्तयित्वा प्रासादात् बहिरागत्य सुसज्जितः सम्मिश्रिते श्वेतच्छत्रेणालंकृते राजसिंहासन अमात्यगणैः सह परिवृत उपविश्य देवराजः शक्र इव शोभमान उपविष्टो राजा

---

१. १. पुण्येन शीलादिमयेन पूर्वे
कृतेन प्राप्तोऽस्मि अतन्द्रितेन ।
पुरन्दरपुर इव देवराजा
राजते समृद्धे पुर उत्तमे हि ॥
२. रूपेन हारि नयनुत्सवेन
शब्देन तुल्यं श्रवणामृतेन ।
गन्धेन घ्राणुत्सव-शोभनेन
रसज्ञपुण्येन रसेन चापि ।
३. स्पर्शेण गात्रस्य सुखप्रदेन
समृद्धि प्राप्तोऽस्मि समृद्धिकोऽहम् ।
नैव एत्तकेनेव प्रमादभावं
अपवर्जितुं युक्तरूपमिति ज्ञात्वा ।

रसवाहिनी, पृ. २.

२. 'त्रिसम्पदमिति' पदेन 'देवयोनि-मनुष्यजीवितं-निर्वाणप्राप्तेश्चोल्लेखो।'
M. J. Dharmasena, Rasavāhini-Sannaya.
(Sinhalese Edition)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमात्यान् प्राह—"युष्मासु यः कोऽपि बुद्धोपदिष्टेषु धर्मेषु किञ्चिदपि धर्मं जानाति स धर्मं श्रावयतु, धर्मं श्रोतुमिच्छामि" इति। ते सर्वेऽब्रोवन्, "देद, वयं धर्मं न जानीम इति।" तेषामुत्तरं श्रुत्वा असंतुष्टो राजा—

"हस्तिषु सहस्रमूल्यं धनं स्थापयित्वा नगरेषु भेरिमुद्घोष्य श्रावयति—'यः कश्चिज्जनोऽल्पमपि धर्मं जानाति, धनलोभेन गाथाया चतुर्थांशोऽपि धर्ममुपदिशेत, तेन मे दीर्घरात्र्यः हिताय सुखाय च भविष्यन्तीति" तदनन्तरं तेन उद्घोष्यमाणेऽपि धर्मोपदेशकं अप्राप्य पुनः पुनः अनेकवारं उद्घोषितं, ग्रामे-निगमे-जनपदे-श्रेष्ठिस्थाने-सेनापतिस्थाने च पुनः पुनः श्वेतच्छत्रं प्रसारितं कथितं च यः कोऽपि मह्यं धर्म उपदेक्ष्यति तस्मै राज्यं ददामि, राज्यं विहाय तस्य दासत्वमङ्गीकरोमि इति।[1]" धर्मोपदेशकं अप्राप्य उद्विग्नमना धर्मगवेषकः सन् राज्य-भारं अमात्येभ्यः समर्प्य ग्राम-निगम-राजधानीं परित्यज्य महावनं प्राविशत्।

महावनं प्रविशति महासत्त्वे (बोधिसत्वे) धम्मसोण्डकस्य पुण्यप्रकाशेन शक्रासनं उष्णापितम्। शक्रोऽचिन्तयत् "केन कारणेन अकामं मम सिंहासनं उष्णायते?" देवराजेन शक्रेण सकले जम्बुद्वीपेऽवलोकितं ज्ञातञ्च, धम्मसोण्डक-महाराजा सद्धर्माय आत्मसुखाय च राज्यं धर्मं सर्वं वस्तु जीवितमपि विहाय अरण्यं प्रविष्टः।[2] इदं ज्ञायत, अस्मिन्नेव कल्पे बुद्धो प्रकटितो भविष्यति। बुद्धः बोधिसत्त्वा वा अद्यैव महारण्यं प्रविष्टः सद्धर्मं अलभ्य महादुःखं प्राप्तवान्। नोचितमिदमिति व्यचिन्तयत्) अहं तत्र गत्वा धर्मामृतरसेन अभिषिञ्चनं कृत्वा राज्ये प्रतिष्ठाप्य आत्मनः शक्रस्वरूपं त्यक्त्वा भयानकं राक्षसवेषं निर्माय ,महासत्त्वस्याभिमुखे समीप एव आत्मनः स्वरूपं दर्शयिष्यामि इति।[3]

---

१. तथा चोक्तम्—
पुरे भेरिं समाघोष्य धम्मसोण्डक नराधिपो।
धर्मोपदेशकं शास्ता अलभ्य धनकोटिभिः।
दासो भवामि अपहायाहं राजतः देशकस्य मे।
इच्छाह सो महीपालो अहो धर्मेषु लोलता।
राज्यं समर्प्य अमात्यानां मनोरमम्।
एवं प्रविष्टः स राजा गवेषं धर्ममुत्तमम् इति।

रसवाहिनी, पृ. ३.

२. व्याघ्रश्च सिंह महिषोरग हस्ति-दीपि
मृगाकुलं कंटकशैलवृक्षम्।
नराणामिन्द्रो प्रविश्य काननं
इतस्ततः परिभ्रमामि धर्मकामुकः।

३. तेनैव सो लोकमुदीक्षमाणेन
अपश्यत् धीरं विपिने चरन्तं।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ महासत्त्वेन आत्मनः समीपे स्थितः राक्षस अदर्शि। तं दृष्ट्वा राज्ञः धम्मसोण्डकस्य अस्य भयं चित्तस्योद्विग्नत्वं वा नाभूत्। पुनः पुना राज्ञा चिन्तितम् "अपि नाम एवंभूतराक्षसतः धर्मो ज्ञातव्यः येनाहं तस्मात् नूनं धर्मं श्रोष्यामि। तस्मात् मे दीर्घरात्र्यः हिताय सुखाय च भविष्यन्ति। अद्य मया तस्य समीपे गत्वा स पृष्टव्य" इति। राक्षसेन सार्द्धं संल्लपन्नेवं प्राह—

अस्मिन् वने तरुखण्डमण्डिते सुफुल्लितानेकलताकुलाकुले।
अधिगृहीतोऽसि महानुभाव पृच्छामि त्वां देव वद शङ्काम्।
धर्मं गवेषयन् वनमागतोऽस्मि अपहाय राज्यमपि ज्ञातिसङ्घम्।
जानासि चेत् सम्यक् वा वद मह्यम् एकामपि गाथां सुगतेन देशिताम्।

ततो यक्षः प्राह—

धर्मं प्रजानाम्यहमेकदेशं जिनेरितं साधुतरं रसानाम्।
देशयिष्यामि चाहं तव धर्ममग्रं त्वं हि किं काङ्क्षसि देशकस्येति।"

प्राह राजा—

राज्ये स्थितो ऋषिरिव अश्रममहं स च भो अनल्परूपं प्रकरोमि पूजाम्।
इदानीमेकः वनमध्यप्राप्तः देहमिमं स्थापयित्वा।
यदिच्छसि त्वं मम मांसलोहितं
करोम्यहं सङ्ग्रहमद्य तेन

मयाद्य तं धर्मरसेन सम्यक्
सन्तर्प्य गमनं वरमिति मत्वा
सुभीमाञ्जनकूटवर्णं महामुखं
निर्गत-भीमदंष्टाम्।
दिनग्निसंकाश-विशालनेत्रं।
मध्येन भग्नं चिपिटग्रनासं।
खरताम्रदंष्ट्रं घनश्मश्रुवन्तं।
नीलोदरं गर्जितभीमघोषम्।
करोरुह-तीक्ष्णं लोहितायत
विशाल धवलायत खड्गहस्तम्।
गदायुधेनाङ्कितमन्यवाहुं
दंष्ट्रोष्ठभीमं सवली ललाटं।
मनुष्य-मांसादन-रक्तपातं
भयानकं कर्कशं यक्षवर्णम्।
समर्प्य वनन्तरेऽस्मिन्
दर्शयिष्यामि आत्मानं स नराधिपस्येति।"

रसवाहिनी, पृ० ३, ४.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न चास्त्यन्यं तव अर्चनीयं
उपदिश धर्मं सुगतप्रशास्तम् ।[1]

ततो यक्षः प्राह[2]—
भुक्त्वा मांसं स्वहिताय शान्त्वा (प्रशाम्य)
पिपासां रुधिरं पिवित्वा
धर्मं कथयतु प्रभवामि तुभ्यं
वक्तुं न शक्नोमि क्षुधापरेतो' ति ।

अथ महासत्त्वः प्राह—
भुक्त्वा त्वं मम प्रथमं हि यक्ष
पश्चात्तु देशिष्यसि कस्य धर्मम् ?
धर्मस्य मह्यं तव मांसलाभं
त्वमेव जानीहि यथा भवेयमिति ॥[3]

एवमुक्तः शक्रो देवानामिन्द्रः—

"साधु महाराज अहमेव युक्तं जानामिति ज्ञात्वा तस्य समीपे त्रिक्रोश-परिमाणोन्नतमिव[4] दुर्गमं अञ्जनवर्णं विशालं पर्वतं निर्माय, "महाराज इममारुह्य पर्वतशिखरे स्थितः मम मुखे पततु, अथ मुखे पतन्तं धर्मं देशिष्यामि।" एवं सति तुभ्यं धर्मप्रतिलाभः मह्यं च मांसप्रतिलाभो भविष्यतीति ।

अथ प्राह महासत्त्वः—
"संसारवन्तेषु विवर्त्तमाना
प्राप्नोति दुक्खं जनता अनेका।
एवं हि भो आत्मनः वा परस्य
अर्थाय न भवसि, भवसि तुच्छं।

---

१. रसवाहिनी, पृ० ४.

२. रसवाहिनी, पृ० ४.

३. अत्र शक्रस्य राक्षसरूपेण, यक्षरूपेण च लेखकेन वर्णनं कृतम्। महाभारते 'भीमः', 'भीमसेनः' वा पाण्डवेषु एकः पाण्डोः पुत्र इति प्रसिद्धः। भीमसेनजातके स कुविन्दरूपेण निरूपितः। गीतायां लिखितमस्ति—
'पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः'
श्रीमद्भगवद्गीता, अ०I, श्लोक १५.
श्रीमलालशेखरेण भीमनामा एकस्य संतस्य निर्देशः कृतः। अन्यत्र कोशेष्वपि भीमस्य राक्षसरूपेणोल्लेखोऽस्ति।

४. गात्रशब्द अत्र मानरूपेण प्रयुक्तः। गात्रमेकमीलतुल्यं भवति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्मिन् विषये मह्यं प्रमाणशङ्का नास्ति।
अदातारस्य प्राणापहारीति च परदारिकापहर्तृ न
प्रणहारक इति मृषा अभाषितम्।
त्वमद्य पासीति अकार्षि दोषं।
प्रगृह्य दुःखं वहुशः ददन्ति।
एतं हि भो आत्मनः वा परस्य
अर्थाय न भवसि तुच्छं।
वृक्षात् पपाता पतित्वा केचिद्
भूतप्रेतादिना (दुब्बन्धिया) दुर्गाद् पतिता
विषभक्षणेन च मृताः।
व्याधीभिः नाना खरवेदनाभिः
मरन्ति सत्त्वा अथ वेदनाभिः।
एतं हि भो आत्मनः वा परस्य
अर्थाय न भवसि, भवसि तुच्छं।
व्याघ्र-मत्स्योरग-कुक्ष्यां हि
मनसः मे नास्ति प्रमाणशङ्का।
एवं हि भो आत्मनः वा परस्य
अर्थाय न भवसि, भवसि तुच्छं।
एतदद्य मे दुस्त्याज्यं आत्मदानं
न भवति देवेश्वरादिकस्य।
सर्वज्ञभावं पुनः प्राप्य
संसारतो निस्तरणाय सत्त्वे
त्वं सम्यक् मह्यं बहुशोपकारी
तस्मात् तवेदं वचनं करोमि
अशङ्कितः दिश मह्यं धर्मं
समृद्धितोऽदानि मनोरथस्त इति।"[1]

एवं च पुनः विदित्वा महासत्त्वः पर्वतमारुह्य स्थित आह—

"अहमद्य राज्येन सार्द्धं जीवितञ्च
शरीरमांसञ्च सद्धर्मस्यार्थं ददामीति।"

सौमनस्यं प्राप्तो सम्यक् धर्मं उपदेक्ष्यत इति ज्ञात्वा स महादंष्ट्रे महामुखे विवृत्य स्थिते तस्याभिमुखं उत्पतति।

---

१. रसवाहिनी, पृ० ५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शक्रो देवानामिन्द्रो सौमनस्ययुक्तः विस्मितो भूतः। आत्मभावं विहाय अलङ्कृत-दिव्यआत्मभावं प्राप्य आकाशे तरुण सूर्य इव, अवभासमानः आकाशतः पतन्तं महासत्त्वं उभयोः हस्तयोः दृढं प्रतिगृह्य देवलोकं नीत्वा पाण्डुकम्बलशिलासने स्थापयित्वा दिव्यमयैः गन्धमालादीभिः पूजयित्त्वा स्वयं धर्मं श्रुत्वा प्रसन्नो प्रसन्नाकारं कृत्वा कश्यपदशवलेन[1] देशितं अनित्यत्वादि-परिदीपकम्।

"अनित्या वत संस्कारा, उत्पाद-वय-धर्मिणः ।
